# BhojaVritti

# ભોજવૃત્તિ

## Document Information

Text title : Bhoja-Vritti

File name : bhojavritti.itx

Category : yoga

Location : doc_yoga

Author : Dhareshvara Bhojadeva

Proofread by : Dr. Suryanshu Ray suryansuray at yahoo.com

Description-comments : Commentary on Patanjali Yoga Sutras

Latest update : Dec. 21, 2009, June 8, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# ભોજવૃત્તિ

॥ પાતઞ્જલયોગસૂત્રમ્ ॥

ધારેશ્વરભોજદેવવિરચિતરાજમાર્તણ્ડવૃત્તિસમેતં

દેહાર્દ્ધયોગઃ શિવયોઃ સ શ્રેયાંસિ તનોતુ વઃ ।
દુષ્પ્રાપમપિ યત્સ્મૃત્યા જનઃ કૈવલ્યમશ્નુતે ॥ ૧॥

ત્રિવિધાન્યપિ દુઃખાનિ યદનુસ્મરણાન્નૃણામ્ ।
પ્રયાન્તિ સદ્યો વિલયં તં સ્તુમઃ શિવમવ્યયમ્ ॥ ૨॥

પતઞ્જલિમુનેરુક્તિઃ કાપ્યપૂર્વા જયત્યસૌ ।
પુંપ્રકૃત્યોર્વિયોગોઽપિ યોગ ઇત્યુદિતો યયા ॥ ૩॥

જયન્તિ વાચઃ ફણિભર્તુરાન્તરસ્ફુરત્તમસ્તોમનિશાકરત્વિષઃ ।
વિભાવ્યમાનાઃ સતતં મનાંસિ યાઃ સતાં સદાનન્દમયાનિ કુર્વતે ॥ ૪॥

શબ્દાનામનુશાસનં વિદધતા પાતઞ્જલે કુર્વતા વૃત્તિં
રાજમૃગાઙ્કસંજ્ઞકમપિ વ્યતન્વતા વૈદ્યકે ।
વાક્ચેતોવપુષાં મલઃ ફણિભૃતાં ભર્ત્રેવ યેનોદ્ધૃતસ્તસ્ય
શ્રીરણરઙ્ગમલ્લનૃપતેર્વાચો જયન્ત્યુજ્જ્વલાઃ ॥ ૫॥

દુર્બોધં યદતીવ તદ્વિજહતિ સ્પષ્ટાર્થમિત્યુક્તિભિઃ
સ્પષ્ટાર્થેષ્વતિવિસ્તૃતિં વિદધતિ વ્યર્થૈઃ સમાસાદિકૈઃ ।
અસ્થાનેઽનુપયોગિભિશ્ચ બહુભિર્જલ્પૈર્ભ્રમં તન્વતે
શ્રોતૃણામિતિ વસ્તુવિપ્લવકૃતઃ સર્વેઽપિ ટીકાકૃતઃ ॥ ૬॥

ઉત્સૃજ્ય વિસ્તરમુદસ્ય વિકલ્પજાલં
ફલ્ગુપ્રકાશમવધાર્ય ચ સમ્યગર્થાન્ ।
સન્તઃપતઞ્જલિમતે વિવૃતિર્મયેય-
માતન્યતે બુધજનપ્રતિબોધહેતુઃ ॥ ૭॥

અથ સમાધિપાદઃ ॥ ૧॥

અથ યોગાનુશાસનમ્ ॥ સમાધિ ૧॥

વૃત્તિઃ — અનેન સૂત્રેણ શાસ્ત્રસ્ય
સમ્બન્ધાભિધેયપ્રયોજનાન્યાખ્યાયન્તે ।
અથશબ્દોઽધિકારદ્યોતકો મઙ્ગલાર્થકશ્ચ । યોગો યુક્તિઃ સમાધાનમ્ ।
યુજ સમાધૌ (ધા૦ પા૦ ૪।૬૭)। અનુશિષ્યતે વ્યાખ્યાયતે
લક્ષણભેદોપાયફલૈર્યેન તદનુશાસનમ્ । યોગસ્યાનુશાસનં
યોગાનુશાસનમ્ । તદા શાસ્ત્રપરિસમાપ્તેરધિકૃતં
બોદ્ધવ્યમિત્યર્થઃ ।
તત્ર શાસ્ત્રસ્ય વ્યુત્પાદ્યતયા યોગઃ સસાધનઃ સફલોઽભિધેયઃ ।
તદ્વ્યુત્પાદનં ચ ફલમ્ । વ્યુત્પાદિતસ્ય યોગસ્ય કૈવલ્યં ફલમ્ ।
શાસ્ત્રાભિધેયયોઃ પ્રતિપાદ્યપ્રતિપાદકભાવલક્ષણઃ સમ્બન્ધઃ ।
અભિધેયસ્ય તત્ફલસ્ય ચ કૈવલ્યસ્ય સાધ્યસાધનભાવઃ । એતદુક્તં
ભવતિ — વ્યુત્પાદ્યસ્ય યોગસ્ય સાધનાનિ શાસ્ત્રેણ પ્રદર્શ્યન્તે ।
તત્સાધનસિદ્ધો યોગઃ કૈવલ્યાખ્યં ફલમુત્પાદયતિ ॥ ૧॥

તત્ર કો યોગ ઇત્યાહ —

યોગશ્ચિત્તવૃત્તિનિરોધઃ ॥ સમાધિ ૨॥

વૃત્તિઃ — ચિત્તસ્ય નિર્મલસત્ત્વપરિણામરૂપસ્ય યા
વૃત્તયોઽઙ્ગાઙ્ગિભાવપરિણામરૂપાસ્તાસાં નિરોધો બહિર્મુખતયા
પરિણતિવિચ્છેદાદન્તર્મુખતયા પ્રતિલોમપરિણામેન સ્વકારણે લયો યોગ
ઇત્યાખ્યાયતે । સ ચ નિરોધઃ સર્વાસાં ચિત્તભૂમીનાં સર્વપ્રાણિનાં
ધર્મઃ કદાચિત્ કસ્યાઞ્ચિદ્ભૂમવાવિર્ભવતિ ।
તાશ્ચ ક્ષિપ્તં મૂઢં વિક્ષિપ્તમ્ એકાગ્રં નિરુદ્ધમિતિ ચિત્તસ્ય
ભૂમયશ્ચિત્તસ્યાવસ્થાવિશેષાઃ । તત્ર ક્ષિપ્તં રજસ ઉદ્રેકાદસ્થિરં
બહિર્મુખતયા સુખદુઃખાદિવિષયેષુ વિકલ્પિતેષુ વ્યવહિતેષુ વા રજસા
પ્રેરિતમ્ । તચ્ચ સદૈવ દૈત્યદાનવાદીનામ્ । મૂઢં તમસ ઉદ્રેકાત્
કૃત્યાકૃત્યવિભાગમન્તરેણ ક્રોધાદિભિર્વિરુદ્ધકૃત્યેષ્વેવ
નિયમિતમ્ ।
તચ્ચ સદૈવ રક્ષઃપિશાચાદીનામ્ । વિક્ષિપ્તં તુ
સત્ત્વોદ્રેકાદ્વૈશિષ્ટ્યેન

પરિહૃત્ય દુઃખસાધનં સુખસાધનેષ્વેવ શબ્દાદિષુ પ્રવૃત્તમ્ ।
તચ્ચ સદૈવ દેવાનામ્ ।
એતદુક્તં ભવતિ — રજસા પ્રવૃત્તિરૂપં તમસા પરાપકારનિયતં
સત્ત્વેન સુખમયં ચિત્તં ભવતિ । એતાસ્તિસ્રશ્ચિત્તાવસ્થાઃ
સમાધાવનુપયોગિન્યઃ । એકાગ્રનિરુદ્ધરૂપે દ્વે ચ
સત્ત્વોત્કર્ષાદ્યથોત્તરમવસ્થિતત્ત્વાત્ સમાધાવુપયોગં ભજેતે ।
સત્ત્વાદિક્રમવ્યુત્ક્રમે ત્વયમભિપ્રાયઃ — દ્વયોરપિ
રજસ્તમસોરત્યન્તહેયત્વેઽપ્યેતદર્થં રજસઃ પ્રથમમુપાદાનમ્ ।
યાવન્ન પ્રવૃત્તિર્દર્શિતા તાવન્નિવૃત્તિર્ન શક્યતે દર્શયિતુમિતિ
દ્વયોર્વ્યત્યયેન પ્રદર્શનમ્ । સત્ત્વસ્ય ત્વેતદર્થં પશ્ચાત્
પ્રદર્શનં
યત્, તસ્યોત્કર્ષેણોત્તરે દ્વે ભૂમી યોગોપયોગિન્યાવિતિ ।
અનયોર્દ્વયોરેકાગ્રનિરુદ્ધયોર્ભૂમ્યોર્યશ્ચિત્તસ્યૈકાગ્રતારૂપઃ પરિણામઃ
સ
યોગ ઇત્યુક્તં ભવતિ । એકાગ્રે બહિર્વૃત્તિનિરોધઃ । નિરુદ્ધે ચ
સર્વાસાં
વૃત્તિનાં સંસ્કારાણાં ચ પ્રવિલય ઇત્યનયોરેવ ભૂમ્યોર્યોગસ્ય
સમ્ભવઃ ॥ ૨॥

ઇદાનીં સૂત્રકારશ્ચિત્તવૃત્તિનિરોધપદાનિ વ્યાખ્યાતુકામઃ પ્રથમં
ચિત્તપદં વ્યાચષ્ટે —

તદા દ્રષ્ટુઃ સ્વરૂપેઽવસ્થાનમ્ ॥ સમાધિ ૩॥

વૃત્તિઃ — દ્રષ્ટુઃ પુરુષસ્ય તસ્મિન્ કાલે સ્વરૂપે
ચિન્માત્રતાયામવસ્થાનં
સ્થિતિર્ભવતિ । અયમર્થઃ — ઉત્પન્નવિવેકખ્યાતેશ્ચિત્સંક્રમાભાવાત્
કર્તૃત્વાભિમાનનિવૃત્તૌ પ્રોચ્છિન્નપરિણામાયાં બુદ્ધાવાત્મનઃ
સ્વરૂપેણાવસ્થાનં સ્થિતિર્ભવતિ ॥ ૩॥

વ્યુત્થાનદશાયાં તુ તસ્ય કિં રૂપમિત્યાહ —

વૃત્તિસારૂપ્યમિતરત્ર ॥ સમાધિ ૪॥

વૃત્તિઃ — ઇતરત્ર યોગાદન્યસ્મિન્ કાલે વૃત્તયો યા
વક્ષ્યમાણલક્ષણાસ્તાભિઃ સારૂપ્યં તદ્રૂપત્વમ્ । અયમર્થઃ —

યાદૃશ્યો વૃત્તયઃ
સુખદુઃખમોહાત્મિકાઃ પ્રાદુર્ભવન્તિ તાદૃગ્રૂપ એવ સંવેદ્યતે
વ્યવહર્તૃભિઃ પુરુષઃ । તદેવં યસ્મિન્નેકાગ્રતયા પરિણતે
ચિતિશક્તેઃ
સ્વસ્મિન્ રૂપે પ્રતિષ્ઠાનં ભવતિ યસ્મિંશ્ચેન્દ્રિયવૃત્તિદ્વારેણ
વિષયાકારેણ પરિણતે પુરુષસ્તદ્રૂપાકાર ઇવ પરિભાવ્યતે । યથા
જલતરઙ્ગેષુ ચલત્સુ ચન્દ્રશ્ચલન્નિવ પ્રતિભાષતે તચ્ચિત્તમ્ ॥ ૪॥

વૃત્તિપદં વ્યાખ્યાતુમાહ —

વૃત્તયઃ પઞ્ચતય્યઃ ક્લિષ્ટાઽક્લિષ્ટાઃ ॥ સમાધિ ૫॥

વૃત્તિઃ — વૃત્તયશ્ચિત્તપરિણામવિશેષાઃ ।
વૃત્તિસમુદાયલક્ષણસ્યાઽવયવિનો યાઽવયવભૂતા
વૃત્તયસ્તદપેક્ષયા તયપ્પ્રત્યયઃ (અષ્ટા૦
૫।૨।૪૨)। એતદુક્તં ભવતિ — પઞ્ચ વૃત્તયઃ કીદૃશ્યઃ ।
ક્લિષ્ટા અક્લિષ્ટાઃ । ક્લેશૈર્વક્ષ્યમાણલક્ષણૈરાક્રાન્તાઃ ક્લિષ્ટાઃ ।
તદ્વિપરીતા અક્લિષ્ટાઃ ॥ ૫॥

એતા એવ પઞ્ચ વૃત્તયઃ સઙ્ક્ષિપ્ય ઉદ્દિશ્યન્તે —

પ્રમાણવિપર્યયવિકલ્પનિદ્રાસ્મૃતયઃ ॥ સમાધિ ૬॥

વૃત્તિઃ — આસાં ક્રમેણ લક્ષણમાહ —

પ્રત્યક્ષાનુમાનાગમાઃ પ્રમાણાનિ ॥ સમાધિ ૭॥

વૃત્તિઃ — અત્રાતિપ્રસિધ્દત્વાત્ પ્રમાણાનાં શાસ્ત્રકારેણ
ભેદનિરૂપણેનૈવ
ગતત્વાલ્લક્ષણસ્ય પૃથક્ લક્ષણં ન કૃતમ્ । પ્રમાણલક્ષણન્તુ
—
અવિસંવાદિ જ્ઞાનં પ્રમાણમિતિ । ઇન્દ્રિયદ્વારેણ
બાહ્યવસ્તૂપરાગાચ્ચિત્તસ્ય
તદ્વિષયસામાન્યવિશેષાત્મનોઽર્થસ્ય વિશેષાવધારણપ્રધાના વૃત્તિઃ
પ્રત્યક્ષમ્ । ગૃહીતસમ્બન્ધાલ્લિઙ્ગાલ્લિઙ્ગિનિ સામાન્યાધ્યવસાયોઽનુમાનમ્ ।
આપ્તવચનમાગમઃ ॥ ૭॥

એવં પ્રમાણરૂપાં વૃત્તિં વ્યાખ્યાય વિપર્યયરૂપામાહ —

વિપર્યયો મિથ્યાજ્ઞાનમતદ્રૂપપ્રતિષ્ઠમ્ ॥ સમાધિ ૮॥

વૃત્તિઃ — અતથાભૂતેઽર્થે તથોત્પદ્યમાનં જ્ઞાનં વિપર્યયઃ ।
યથા શુક્તિકાયાં રજતજ્ઞાનમ્ । અતદ્રૂપપ્રતિષ્ઠમિતિ ।
તસ્યાર્થસ્ય યદ્રૂપં તસ્મિન્ રૂપે ન
પ્રતિષ્ઠતિ તસ્યાર્થસ્ય યત્ પારમાર્થિકં રૂપં ન તત્ પ્રતિભાસયતીતિ
યાવત્ । સંશયોઽપ્યતદ્રૂપપ્રતિષ્ઠિતત્વાન્મિથ્યાજ્ઞાનમ્ । યથા
સ્થાણુર્વા પુરુષો વેતિ ॥ ૮॥

વિકલ્પવૃત્તિં વ્યાખાતુમાહ —

શબ્દજ્ઞાનાનુપાતી વસ્તુશૂન્યો વિકલ્પઃ ॥ સમાધિ ૯॥

વૃત્તિઃ — શબ્દજનિતં જ્ઞાનં શબ્દજ્ઞાનમ્ । તદનુપતિતું
શીલં યસ્ય સઃ શબ્દજ્ઞાનાનુપાતી । વસ્તુનસ્તથાત્વમનપેક્ષમાણો
યોઽધ્યવસાયઃ સ વિકલ્પ ઇત્યુચ્યતે । યથા પુરુષસ્ય ચૈતન્યં
સ્વરૂપમિતિ । અત્ર દેવદત્તસ્ય કમ્બલ ઇતિ શબ્દજનિતે જ્ઞાને ષષ્ઠ્યા
યોઽધ્યવસિતો ભેદસ્તમિહાવિદ્યમાનમપિ સમારોપ્ય પ્રવર્તતેઽધ્યવસાયઃ ।
વસ્તુતસ્તુ ચૈતન્યમેવ પુરુષઃ ॥ ૯॥

નિદ્રાં વ્યાખ્યાતુમાહ —

અભાવપ્રત્યયાલમ્બના વૃત્તિર્નિદ્રા ॥ સમાધિ ૧૦॥

વૃત્તિઃ — અભાવપ્રત્યય આલમ્બનં યસ્યાઃ સા તથોક્તા । એતદુક્તં
ભવતિ — યા સન્તતમુદ્રિક્તત્વાત્તમસઃ સમસ્તવિષયપરિત્યાગેન
પ્રવર્તતે વૃત્તિઃ સા નિદ્રા । તસ્યાશ્ચ સુખમહમસ્વાપ્સમિતિ
સ્મૃતિદર્શનાત્ સ્મૃતેશ્ચાનુભવવ્યતિરેકેણાનુપપત્તેર્વૃત્તિત્ત્વમ્ ॥ ૧૦॥

સ્મૃતિં વ્યાખ્યાતુમાહ —

અનુભૂતવિષયાસમ્પ્રમોષઃ સ્મૃતિઃ ॥ સમાધિ ૧૧॥

વૃત્તિઃ — પ્રમાણેનાનુભૂતસ્ય વિષયસ્ય યોઽયમસમ્પ્રમોષઃ
સંસ્કારદ્વારેણ
બુદ્ધાવારોહઃ સા સ્મૃતિઃ । તત્ર પ્રમાણવિપર્યયવિકલ્પા જાગ્રદવસ્થાઃ ।
તા એવ તદનુભવબલાત્ પ્રક્ષીયમાણાઃ સ્વપ્નઃ var (પ્રત્યક્ષાયમાણાઃ ) ।
નિદ્રા ત્વસંવેદ્યમાનવિષયા । સ્મૃતિશ્ચ
પ્રમાણવિપર્યયવિકલ્પનિદ્રાનિમિત્તઃ ॥ ૧૧॥

એવં વૃત્તીર્વ્યાખ્યાય સોપાયં નિરોધં વ્યાખ્યાતુમાહ —

અભ્યાસવૈરાગ્યાભ્યાં તન્નિરોધઃ ॥ સમાધિ ૧૨॥

વૃત્તિઃ — અભ્યાસવૈરાગ્યે વક્ષ્યમાણલક્ષણે તાભ્યાં
પ્રકાશપ્રવૃત્તિનિયમરૂપા યા વૃત્તયસ્તાસાં નિરોધો ભવતીત્યુક્તં
ભવતિ । તાસાં વિનિવૃત્તબાહ્યાભિનિવેશાનામન્તર્મુખતયા સ્વકારણ
એવ ચિત્તે શક્તિરૂપતયાઽવસ્થાનમ્ । તત્ર વિષયદોષદર્શનજેન
વૈરાગ્યેણ તદ્વૈમુખ્યમુત્પાદ્યતે । અભ્યાસેન ચ સુખજનકં
શાન્તપ્રવાહપ્રદર્શનદ્વારેણ દૃઢસ્થૈર્યમુત્પાદ્યતે । ઇત્થં
તાભ્યાં ભવતિ ચિત્તવૃત્તિનિરોધઃ ॥ ૧૨॥

અભ્યાસં વ્યાખ્યાતુમાહ —

તત્ર સ્થિતૌ યત્નોઽભ્યાસઃ ॥ સમાધિ ૧૩॥

વૃત્તિઃ — વૃત્તિરહિતસ્ય ચિત્તસ્ય સ્વરૂપનિષ્ઠઃ પરિણામઃ
સ્થિતિસ્તસ્યાં યત્ન ઉત્સાહઃ પુનઃપુનસ્તથાત્વેન ચેતસિ નિવેશનમભ્યાસ
ઇત્યુચ્યતે ॥ ૧૩॥

તસ્યૈવ વિશેષમાહ —

સ તુ દીર્ઘકાલનૈરન્તર્યસત્કારાસેવિતો દૃઢભૂમિઃ ॥ સમાધિ ૧૪॥

વૃત્તિઃ — બહુકાલં નૈરન્તર્યેણાદરાતિશયેન ચ સેવ્યમાનો
દૃઢભૂમિઃ સ્થિરો ભવતિ । દાર્ઢ્યાય પ્રભવતીત્યર્થઃ ॥ ૧૪॥

વૈરાગ્યસ્ય લક્ષણમાહ —

દૃષ્ટાનુશ્રવિકવિષયવિતૃષ્ણસ્ય વશીકારસંજ્ઞા વૈરાગ્યમ્ ॥ સમાધિ ૧૫॥

વૃત્તિઃ — દ્વિવિધો હિ વિષયો દૃષ્ટ આનુશ્રવિકશ્ચ ।
દૃષ્ટ ઇહૈવોપલભ્યમાનઃ શબ્દાદિઃ । દેવલોકાદાવાનુશ્રવિકઃ ।
અનુશ્રૂયતે ગુરુમુખાદિત્યનુશ્રવો વેદસ્તત આગત આનુશ્રવિકઃ ।
તયોર્દ્વયોરપિ વિષયયોઃ પરિણામવિરસત્વદર્શનાદ્વિગતગર્ધસ્ય
યા વશીકારસંજ્ઞા મમૈતે વશ્યા નાહમેતેષાં વશ્ય ઇતિ યોઽયં
વિમર્શસ્તદ્વૈરાગ્યમુચ્યતે ॥ ૧૫॥

તસ્યૈવ વિશેષમાહ —

તત્પરં પુરુષખ્યાતેર્ગુણવૈતૃષ્ણ્યમ્ ॥ સમાધિ ૧૬॥

વૃત્તિઃ — તદ્વૈરાગ્યં પરં પ્રકૃષ્ટં પ્રથમં વૈરાગ્યં
વિષયવિષયં દ્વિતીયં ગુણવિષયમુત્પન્નગુણપુરુષવિવેકખ્યાતેરેવ
ભવતિ । નિરોધસમાધેરત્યન્તાનુકૂલત્વાત્ ॥ ૧૬॥

એવં યોગસ્ય સ્વરૂપમુક્ત્વા સમ્પ્રજ્ઞાતસ્વરૂપભેદમાહ —

વિતર્કવિચારાનન્દાસ્મિતારૂપાનુગમાત્સમ્પ્રજ્ઞાતઃ ॥ સમાધિ ૧૭॥

વૃત્તિઃ — સમાધિરિતિ શેષઃ । સમ્યક્ સંશયવિપર્યયરહિતત્વેન
પ્રજ્ઞાયતે પ્રકર્ષેણ જ્ઞાયતે ભાવ્યસ્ય રૂપં યેન સ સમ્પ્રજ્ઞાતઃ
સમાધિર્ભાવનાવિશેષઃ । સ વિતર્કાદિભેદાચ્ચતુર્વિધઃ —
સવિતર્કઃ સવિચારઃ સાનન્દઃ સાસ્મિતશ્ચ । ભાવના ભાવ્યસ્ય
વિષયાન્તરપરિહારેણ ચેતસિ પુનઃપુનર્નિવેશનમ્ । ભાવ્યં ચ
દ્વિવિધમ્ — ઈશ્વરસ્તત્ત્વાનિ ચ । તાન્યપિ દ્વિવિધાનિ જડાજડભેદાત્ ।
જડાનિ ચતુર્વિંશતિઃ । અજડઃ પુરુષઃ ।
તત્ર યદા મહાભૂતાનીન્દ્રિયાણિ સ્થૂલાનિ વિષયત્વેનાદાય
પૂર્વાપરાનુસન્ધાનેન શબ્દાર્થોલ્લેખસમ્ભેદેન ચ ભાવના
ક્રિયતે તદા સવિતર્કઃ સમાધિઃ । અસ્મિન્નેવાવલમ્બને
પૂર્વાપરાનુસન્ધાનશબ્દોલ્લેખશૂન્યત્વેન યદા ભાવના
પ્રવર્તતે તદા નિર્વિતર્કઃ । તન્માત્રાન્તઃકરણલક્ષણં
સૂક્ષ્મવિષયમાલમ્બ્ય તસ્ય દેશકાલધર્માવચ્છેદેન યદા ભાવના
તદા સવિચારઃ । તસ્મિન્નેવાવલમ્બને દેશકાલધર્માવચ્છેદં
વિના ધર્મિમાત્રાવભાસિત્વેન ભાવના ક્રિયમાણા નિર્વિચાર ઇત્યુચ્યતે ।
એવંપર્યન્તઃ સમાધિઃ ગ્રાહ્યસમાપત્તિરિતિ વ્યપદિશ્યતે ।
યદા તુ રજસ્તમોલેશાનુવિદ્ધમન્તઃકરણસત્ત્વં ભાવ્યતે
તદા ગુણભાવાચ્ચિતિશક્તેઃ સુખપ્રકાશમયસ્ય સત્ત્વસ્ય
ભાવ્યમાનસ્યોદ્રેકાત્ સાનન્દઃ સમાધિર્ભવતિ । તસ્મિન્નેવ સમાધૌ
યે બદ્ધધૃતયસ્તત્ત્વાન્તરં પ્રધાનપુરુષરૂપં ન પશ્યન્તિ
તે વિગતદેહાહંકારત્વાદ્વિદેહશબ્દવાચ્યાઃ । ઇયં ગ્રહણસમાપત્તિઃ ।

તતઃ પરં રજસ્તમોલેશાનભિભૂતશુદ્ધસત્ત્વમાલમ્બનીકૃત્ય યા
પ્રવર્તતે ભાવના તસ્યાં ગ્રાહ્યસ્ય ન્યગ્ભાવાચ્ચિતિશક્તેરુદ્રેકાત્
સત્તામાત્રાવશેષત્વેન સમાધિઃ સાસ્મિત ઇત્યુચ્યતે । ન

ચાહંકારાસ્મિતયોરભેદઃ શઙ્કનીયઃ । યતો યત્રાન્તઃકરણમહમિતિ ઉલ્લેખેન વિષયાન્ વેદયતે સોઽહંકારઃ । યત્રાન્તર્મુખતયા પ્રતિલોમપરિણામે પ્રકૃતિલીને ચેતસિ સત્તામાત્રમવભાતિ સાઽસ્મિતા । અસ્મિન્નેવ સમાધૌ યે કૃતપરિતોષાઃ પરં પરમાત્માનં પુરુષં ન પશ્યન્તિ તેષાં ચેતસિ સ્વકારણે લયમુપાગતે પ્રકૃતિલયા ઇત્યુચ્યન્તે । યે પરં પુરુષં જ્ઞાત્વા ભાવનાયાં પ્રવર્તન્તે તેષામિયં વિવેકખ્યાતિર્ગ્રહીતૃસમાપત્તિરિત્યુચ્યતે ।
તત્ર સમ્પ્રજ્ઞાતે સમાધૌ ચતસ્રોઽવસ્થાઃ શક્તિરૂપતયાઽવતિષ્ઠન્તે । તત્રૈકૈકસ્યાસ્ત્યાગ ઉત્તરોત્તરેતિ ચતુરવસ્થોઽયં સમ્પ્રજ્ઞાતઃ સમાધિઃ ॥ ૧૭॥

અસમ્પ્રજ્ઞાતમાહ —

વિરામપ્રત્યયાભ્યાસપૂર્વઃ સંસ્કારશેષોઽન્યઃ ॥ સમાધિ ૧૮॥

વૃત્તિઃ — વિરમ્યતેઽનેનેતિ વિરામો વિતર્કાદિચિન્તાત્યાગઃ । વિરામશ્ચાસૌ પ્રત્યયશ્ચેતિ વિરામપ્રત્યયઃ । તસ્યાભ્યાસઃ પૌનઃપુન્યેન ચેતસિ નિવેશનમ્ । તત્ર યા કાચિદ્વૃત્તિરુલ્લસતિ તસ્યા નેતિ નેતીતિ નૈરન્તર્યેણ પર્યુદસનં વિરામપ્રત્યયાભ્યાસઃ । તત્પૂર્વઃ સમ્પ્રજ્ઞાતસમાધિઃ । સંસ્કારશેષોઽન્યસ્તદ્વિલક્ષણોઽયમસમ્પ્રજ્ઞાત ઇત્યર્થઃ । ન તત્ર કિઞ્ચિદ્વેદ્યમ્ । અસમ્પ્રજ્ઞાતો નિર્બીજઃ સમાધિઃ । ઇહ ચતુર્વિધશ્ચિત્તસ્ય પરિણામઃ — વ્યુત્થાનં સમાધિપ્રારમ્ભ એકાગ્રતા નિરોધશ્ચ । તત્ર ક્ષિપ્તમૂઢે ચિત્તભૂમી વ્યુત્થાનમ્ । વિક્ષિપ્તા ભૂમિઃ સત્વોદ્રેકાત્ સમાધિપ્રારમ્ભઃ । નિરુદ્ધૈકાગ્રતે ચ પર્યન્તભૂમી । પ્રતિપરિણામં ચ સંસ્કારાઃ । તત્ર વ્યુત્થાનજનિતાઃ સંસ્કારાઃ સમાધિપ્રારમ્ભજૈઃ સંસ્કારૈઃ પ્રત્યાહન્યન્તે । તજ્જાશ્ચૈકાગ્રતાજૈઃ । નિરોધજનિતૈરેકાગ્રતાજા નિરોધજાઃ સંસ્કારાઃ સ્વરૂપં ચ હન્યન્તે । યથા સુવર્ણસંવલિતં ધ્માયમાનં સીસકમાત્માનં સુવર્ણમલં ચ નિર્દહતિ । એવમેકાગ્રતાજનિતાન્ સંસ્કારાન્ નિરોધજાઃ સ્વાત્માનં ચ નિર્દહન્તિ ॥ ૧૮॥

તદેવં યોગસ્ય સ્વરૂપં ભેદં ચ સંક્ષેપેણોપાયાંશ્ચાભિધાય વિસ્તારરૂપેણોપાયં યોગાભ્યાસપ્રદર્શનપૂર્વકમુપક્રમતે —

ભવપ્રત્યયો વિદેહપ્રકૃતિલયાનામ્ ॥ સમાધિ ૧૯॥

વૃત્તિઃ — વિદેહાઃ પ્રકૃતિલયાશ્ચ વિતર્કાદિભૂમિકાસૂત્રે (૧।૧૭) વ્યાખ્યાતાઃ । તેષાં સમાધિર્ભવપ્રત્યયઃ । ભવઃ સંસારઃ સ એવ પ્રત્યયઃ કારણં યસ્ય સ ભવપ્રત્યયઃ । અયમર્થઃ — આધિમાત્રાન્તર્ભૂતા એવ તે સંસારે [આવિર્ભૂતા એવ સંસારે તે] તથાવિધસમાધિભાજો ભવન્તિ । તેષાં પરતત્ત્વાऽદર્શનાદ્યોગાભાસોऽયમ્ । અતઃ પરતત્ત્વજ્ઞાને તદ્ભાવનાયાં ચ મુક્તિકામેન મહાન્ યત્નો વિધેય ઇત્યેતદર્થમુપદિષ્ટમ્ ॥ ૧૯ ॥

તદન્યેષાન્તુ —

શ્રદ્ધાવીર્યસ્મૃતિસમાધિપ્રજ્ઞાપૂર્વક ઇતરેષામ્ ॥ સમાધિ ૨૦ ॥

વૃત્તિઃ — વિદેહપ્રકૃતિલયવ્યતિરિક્તાનાં શ્રદ્ધાદિપૂર્વકઃ શ્રદ્ધાદયઃ પૂર્વે ઉપાયા યસ્ય સ શ્રદ્ધાદિપૂર્વકઃ । તે ચ શ્રદ્ધાદયઃ ક્રમાદુપાયોપેયભાવેન પ્રવર્તમાનાઃ સમ્પ્રજ્ઞાતસમાધેરુપાયતાં પ્રતિપદ્યન્તે । તત્ર શ્રદ્ધા યોગવિષયે ચેતસઃ પ્રસાદઃ । વીર્યમુત્સાહઃ । સ્મૃતિરનુભૂતાસમ્પ્રમોષઃ । સમાધિરેકાગ્રતા । પ્રજ્ઞા પ્રજ્ઞાતવ્યવિવેકઃ । તત્ર શ્રદ્ધાવતો વીર્યં જાયતે યોગવિષય ઉત્સાહવાન્ ભવતિ । સોત્સાહસ્ય ચ પાશ્ચાત્યાસુ ભૂમિષુ સ્મૃતિરુત્પદ્યતે । તત્સ્મરણાચ્ચ ચેતઃ સમાધીયતે । સમાહિતચિત્તશ્ચ ભાવ્યં સમ્યગ્વિવેકેન જાનાતિ । ત એતે સમ્પ્રજ્ઞાતસ્ય સમાધેરુપાયાસ્તસ્યાભ્યાસાત્ પરાચ્ચ વૈરાગ્યાદ્ભવત્યસમ્પ્રજ્ઞાતઃ ॥ ૨૦ ॥

ઉક્તોપાયવતાં યોગિનામુપાયભેદાદ્ભેદાનાહ —

તીવ્રસંવેગાનામાસન્નઃ ॥ સમાધિ ૨૧ ॥

વૃત્તિઃ — સમાધિલાભ ઇતિ શેષઃ। સંવેગઃ ક્રિયાહેતુર્દૃઢતરઃ સંસ્કારઃ । સ તીવ્રો યેષામધિમાત્રોપાયાનાં તેષામાસન્નઃ સમાધિલાભઃ સમાધિફલં ચાસન્નં ભવતિ । શીઘ્રમેવ સમ્પદ્યત ઇત્યર્થઃ ॥ ૨૧ ॥

કે તે તીવ્રસંવેગા ઇત્યાહ —

મૃદુમધ્યાધિમાત્રત્વાત્તતોऽપિ વિશેષઃ ॥ સમાધિ ૨૨ ॥

વૃત્તિઃ — તેભ્ય ઉપાયેભ્યો મૃદ્વાદિભેદભિન્નેભ્ય ઉપાયવતાં વિશેષો ભવતિ । મૃદુર્મધ્યોऽધિમાત્ર ઇત્યુપાયભેદાઃ । તે

પ્રત્યેકં મૃદુસંવેગમધ્યસંવેગતીવ્રસંવેગભેદાત્ ત્રિધા ।
તદ્ભેદેન ચ નવ યોગિનો ભવન્તિ — મૃદૂપાયો મૃદુસંવેગો
મધ્યસંવેગસ્તીવ્રસંવેગશ્ચ । મધ્યોપાયો મૃદુસંવેગો
મધ્યસંવેગસ્તીવ્રસંવેગશ્ચ । અધિમાત્રોપાયો મૃદુસંવેગો
મધ્યસંવેગસ્તીવ્રસંવેગશ્ચ । અધિમાત્ર ઉપાયે તીવ્રે સંવેગે ચ
મહાન્ યત્નઃ કર્તવ્ય ઇતિ ભેદોપદેશઃ ॥ ૨૨॥

ઇદાનીમેતદુપાયવિલક્ષણં સુગમમુપાયાન્તરં દર્શયિતુમાહ —

ઈશ્વરપ્રણિધાનાદ્વા ॥ સમાધિ ૨૩॥

વૃત્તિઃ — ઈશ્વરો વક્ષ્યમાણલક્ષણઃ । તત્ર પ્રણિધાનં
ભક્તિવિશેષો વિશિષ્ટમુપાસનં સર્વક્રિયાણાં તત્રાર્પણમ્ ।
વિષયસુખાદિકં ફલમનિચ્છન્ સર્વાઃ ક્રિયાસ્તસ્મિન્
પરમગુરાવર્પયતિ । તત્પ્રણિધાનં સમાધેસ્તત્ફલલાભસ્ય ચ
પ્રકૃષ્ટ ઉપાયઃ ॥ ૨૩॥

ઈશ્વરસ્ય પ્રણિધાનાત્ સમાધિલાભ ઇત્યુક્તમ્ । તત્રેશ્વરસ્ય સ્વરૂપં
પ્રમાણં પ્રભાવં વાચકમુપાસનાક્રમં તત્ફલં ચ ક્રમેણ વક્તુમાહ
—

ક્લેશકર્મવિપાકાશયૈરપરામૃષ્ટઃ પુરુષવિશેષ ઈશ્વરઃ ॥ સમાધિ ૨૪॥

વૃત્તિઃ — ક્લિશ્નન્તીતિ ક્લેશા અવિદ્યાદયો વક્ષ્યમાણાઃ ।
વિહિતનિષિદ્ધવ્યામિશ્રરૂપાણિ કર્માણિ । વિપચ્યન્ત ઇતિ વિપાકાઃ
કર્મફલાનિ જાત્યાયુર્ભોગાઃ । આફલવિપાકાચ્ચિત્તભૂમૌ શેરત ઇત્યાશયો
વાસનાખ્યસંસ્કારઃ । તૈરપરામૃષ્ટસ્ત્રિષ્વપિ કાલેષુ ન સંસ્પૃષ્ટઃ ।
પુરુષવિશેષોઽન્યેભ્યઃ પુરુષેભ્યો વિશિષ્યતે ઇતિ વિશેષ ઈશ્વરઃ
ઈશનશીલ ઇચ્છામાત્રેણ સકલજગદુદ્ધરણક્ષમઃ ।
યદ્યપિ સર્વેષામાત્મણાં ક્લેશાદિસ્પર્શો નાસ્તિ તથાપિ
ચિત્તગતાસ્તેષામુપદિશ્યન્તે । યથા યોદ્ધૃગતો જયપરાજયૌ સ્વામિનઃ ।
અસ્ય તુ ત્રિષ્વપિ કાલેષુ તથાવિધોઽપિ ક્લેશાદિપરામર્શો નાસ્તિ । અતઃ
સવિલક્ષણ એવ ભગવાનીશ્વરઃ । તસ્ય ચ તથાવિધમૈશ્વર્યમનાદેઃ
સત્ત્વોત્કર્ષાત્ । તસ્ય સત્ત્વોત્કર્ષસ્ય પ્રકૃષ્ટાજ્જ્ઞાનાદેવ । ન
ચાનયોર્જ્ઞાનૈશ્વર્યયોરિતરેતરાશ્રયત્વં પરસ્પરાનપેક્ષત્વાત્ ।
તે દ્વે જ્ઞાનૈશ્વર્યે ઈશ્વરસત્ત્વે વર્તમાને અનાદિભૂતે

તેન તથાવિધેન સત્ત્વેન તસ્યાનાદિરેવ સમ્બન્ધઃ ।
પ્રકૃતિપુરુષસંયોગવિયોગયોરીશ્વરેચ્છાવ્યતિરેકેણાનુપપત્તેઃ ।
યથેતરેષાં પ્રાણિનાં સુખદુઃખમોહાત્મકતયા પરિણતં ચિત્તં
નિર્મલે સાત્ત્વિકે ધર્માનુપ્રખ્યે પ્રતિસઙ્ક્રાન્તં ચિચ્છાયાસંક્રાન્તે
સંવેદ્યં ભવતિ નૈવમીશ્વરસ્ય । તસ્ય કેવલ એવ સાત્ત્વિકઃ
પરિણામ ઉત્કર્ષવાનનાદિસમ્બન્ધેન ભોગ્યતયા વ્યવસ્થિતઃ । અતઃ
પુરુષાન્તરવિલક્ષણતયા સ એવ ઈશ્વરઃ ।
મુક્તાત્મનાન્તુ પુનઃપુનઃ ક્લેશાદિયોગસ્તૈસ્તૈઃ
શાસ્ત્રોક્તૈરુપાયૈર્નિવર્તિતઃ । અસ્ય પુનઃ સર્વદૈવ તથાવિધત્વાન્ન
મુક્તાત્મતુલ્યત્વમ્ । ન ચેશ્વરાણામનેકત્વમ્ । તેષાં તુલ્યત્વે
ભિન્નાભિપ્રાયત્વાત્ કાર્યસ્યૈવાનુપપત્તેઃ । ઉત્કર્ષાપકર્ષયુક્તત્વે
ય એવોત્કૃષ્ટઃ સ એવેશ્વરસ્તત્રૈવ કાષ્ઠાપ્રાપ્તત્વાદૈશ્વર્યસ્ય ॥ ૨૪॥

એવમીશ્વરસ્ય સ્વરૂપમભિધાય પ્રમાણમાહ —

તત્ર નિરતિશયં સાર્વજ્ઞ્યબીજમ્ ॥ સમાધિ ૨૫॥

વૃત્તિઃ — તસ્મિન્ ભગવતિ સર્વજ્ઞત્વસ્ય
યદ્બીજમતીતાનાગતાદિગ્રહણસ્યાલ્પત્વં મહત્વં ચ મૂલત્વાદ્બીજમિવ બીજમ્ ।
તત્ તત્ર નિરતિશયં કાષ્ઠાં પ્રાપ્તમ્ । દૃષ્ટા હ્યલ્પત્વમહત્વાદીનાં
ધર્માણાં સાતિશયાનાં કાષ્ઠાપ્રાપ્તિઃ । યથા પરમાણાવલ્પત્વસ્યાકાશે
પરમમહત્વસ્ય । એવં જ્ઞાનાદયોઽપિ ચિત્તધર્માસ્તારતમ્યેન
પરિદૃશ્યમાનાઃ ક્વચિન્નિરતિશયતામાસાદયન્તિ । યત્ર ચૈતે
નિરતિશયાઃ સ ઈશ્વરઃ ।
યદ્યપિ સામાન્યમાત્રેઽનુમાનસ્ય પર્યવસિતત્વાન્ન
વિશેષાવગતિઃ સમ્ભવતિ તથાપિ શાસ્ત્રાદસ્ય સર્વજ્ઞત્વાદયો
વિશેષા અવગન્તવ્યાઃ । તસ્ય સ્વપ્રયોજનાભાવે કથં
પ્રકૃતિપુરુષયોઃ સંયોગવિયોગાવાપાદયતીતિ નાઽઽશઙ્કનીયં તસ્ય
કારુણિકત્વાદ્ભૂતાનુગ્રહ એવ પ્રયોજનમ્ । કલ્પપ્રલયમહાપ્રલયેષુ
નિઃશેષાન્ સંસારિણ ઉદ્ધરિષ્યામીતિ તસ્યાધ્યવસાયઃ । યદ્યસ્યેષ્ટં
તત્તસ્ય પ્રયોજનમિતિ ॥ ૨૫॥

એવમીશ્વરસ્ય પ્રમાણમભિધાય પ્રભાવમાહ —

સ પૂર્વેષામપિ ગુરુઃ કાલેનાનવચ્છેદાત્ ॥ સમાધિ ૨૬॥

વૃત્તિઃ — આદ્યાનાં સ્રષ્ટૄણાં બ્રહ્માદીનામપિ સ ગુરુરુપદેષ્ટા યતઃ સ કાલેન નાવચ્છિદ્યતેઽનાદિત્વાત્ । તેષાં બ્રહ્માદીનાં પુનરાદિમત્ત્વાદસ્તિ કાલેનાવચ્છેદઃ ॥ ૨૬॥

એવં પ્રભાવમુક્ત્વોપાસનોપયોગાય વાચકમાહ —

તસ્ય વાચકઃ પ્રણવઃ ॥ સમાધિ ૨૭॥

વૃત્તિઃ — ઇત્થમુક્તસ્વરૂપસ્યેશ્વરસ્ય વાચકોઽભિધાયકઃ પ્રકર્ષેણ નૂયતે સ્તૂયતેઽનેનેતિ નૌતિ સ્તૌતીતિ વા પ્રણવ ઓંકારઃ । તયોશ્ચ વાચ્યવાચકલક્ષણઃ સમ્બન્ધો નિત્યઃ સંકેતેન પ્રકાશ્યતે ન તુ કેનચિત્ ક્રિયતે । યથા પિતાપુત્રયોર્વિદ્યમાન એવ સમ્બન્ધોઽસ્યાયં પિતાઽસ્યાયં પુત્ર ઇતિ કેનચિત્ પ્રકાશ્યતે ॥ ૨૭॥

ઉપાસનમાહ —

તજ્જપસ્તદર્થભાવનમ્ ॥ સમાધિ ૨૮॥

વૃત્તિઃ — તસ્ય સાર્ધત્રિમાત્રિકસ્ય પ્રણવસ્ય જપો યથાવદુચ્ચારણં તદ્વાચ્યસ્ય ચેશ્વરસ્ય ભાવનં પુનઃપુનશ્ચેતસિ નિવેશનમેકાગ્રતાયા ઉપાયઃ । અતઃ સમાધિસિદ્ધ્યે યોગિના પ્રણવો જપ્યસ્તદર્થ ઈશ્વરશ્ચ ભાવનીય ઇત્યુક્તં ભવતિ ॥ ૨૮॥

ઉપાસનાયાઃ ફલમાહ —

તતઃ પ્રત્યક્ચેતનાઽધિગમોઽપ્યન્તરાયાભાવશ્ચ ॥ સમાધિ ૨૯॥

વૃત્તિઃ — તસ્માજ્જપાત્તદર્થભાવનાયાશ્ચ યોગિનઃ પ્રત્યક્ચેતનાઽધિગમો ભવતિ । વિષયપ્રાતિકૂલ્યેન સ્વાન્તઃકરણાભિમુખમઞ્ચતિ યા ચેતના દૃક્શક્તિઃ સા પ્રત્યક્ચેતના તદધિગમો જ્ઞાનં ભવતીત્યર્થઃ । અન્તરાયા વક્ષ્યમાણાઃ । તેષામભાવઃ શક્તિપ્રતિબન્ધોઽપિ ભવતિ ॥ ૨૯॥

અથ કેઽન્તરાયા ઇત્યાશઙ્કાયામાહ —

વ્યાધિસ્ત્યાનસંશયપ્રમાદાલસ્યાવિરતિભ્રાન્તિદર્શનાલબ્ધભૂમિકત્વાનવસ્થિતત્વાનિ ચિત્તવિક્ષેપાસ્તેઽન્તરાયાઃ ॥ સમાધિ ૩૦॥

વૃત્તિઃ — નવૈતે રજસ્તમોબલાત્ પ્રવર્તમાનાશ્ચિત્તસ્ય વિક્ષેપા ભવન્તિ । તૈરેકાગ્રતાવિરોધિભિશ્ચિત્તં વિક્ષિપ્યત ઇત્યર્થઃ ।

તત્ર વ્યાધિર્ધાતુવૈષમ્યનિમિત્તો જ્વરાદિઃ । સ્ત્યાનમકર્મણ્યતા ચિત્તસ્ય । ઉભયકોટ્યાલમ્બનં જ્ઞાનં સંશયઃ — યોગઃ સાધ્યો ન વેતિ । પ્રમાદોऽનવધાનતા સમાધિસાધનેષ્વૌદાસીન્યમ્ । આલસ્યં કાયચિત્તયોર્ગુરુત્વં યોગવિષયે પ્રવૃત્ત્યભાવહેતુઃ । અવિરતિશ્ચિત્તસ્ય વિષયસમ્પ્રયોગાત્મા ગર્ધઃ । ભ્રાન્તિદર્શનં શુક્તિકાયાં રજતવદ્વિપર્યયજ્ઞાનમ્ । અલબ્ધભૂમિકત્વં કુતશ્ચિન્નિમિત્તાત્ સમાધિભૂમેરલાભોऽસમ્પ્રાપ્તિઃ । અનવસ્થિતત્ત્વં લબ્ધાયામપિ ભૂમૌ ચિત્તસ્ય તત્રાપ્રતિષ્ઠા । ત એતે સમાધેરેકાગ્રતાયા યથાયોગં પ્રતિપક્ષત્વાદન્તરાયા ઇત્યુચ્યતે ॥ ૩૦॥

ચિત્તવિક્ષેપકારકાનન્યાનપ્યન્તરાયાન્ પ્રતિપાદયિતુમાહ —

દુઃખદૌર્મનસ્યાઙ્ગમેજયત્વશ્વાસપ્રશ્વાસા વિક્ષેપસહભુવઃ ॥ સમાધિ ૩૧॥

વૃત્તિઃ — કુતશ્ચિન્નિમિત્તાદુત્પન્નેષુ વિક્ષેપેષુ એતે દુઃખાદયઃ પ્રવર્તન્તે । તત્ર દુઃખં ચિત્તસ્ય રજસઃ પરિણામો બાધનાલક્ષણો યદ્બાધાત્ પ્રાણિનસ્તદુપઘાતાય પ્રવર્તન્તે । દૌર્મનસ્યં બાહ્યાભ્યન્તરૈઃ કારણૈર્મનસો દૌઃસ્થ્યમ્ । અઙ્ગમેજયત્વં સર્વાઙ્ગીનો વેપથુરાસનમનઃસ્થૈર્યસ્ય બાધકઃ । પ્રાણો યદ્બાહ્યં વાયુમાચામતિ સ શ્વાસઃ, યત્ કૌષ્ઠ્યં વાયું નિઃશ્વસિતિ સ પ્રશ્વાસઃ । એતે વિક્ષેપૈઃ સહ પ્રવર્તમાના યથોદિતાભ્યાસવૈરાગ્યાભ્યાં નિરોદ્ધવ્યા ઇત્યેષામુપદેશઃ ॥ ૩૧॥

સોપદ્રવવિક્ષેપપ્રતિષેધાર્થમુપાયાન્તરમાહ —

તત્પ્રતિષેધાર્થમેકતત્ત્વાભ્યાસઃ ॥ સમાધિ ૩૨॥

વૃત્તિઃ — તેષાં વિક્ષેપાણાં પ્રતિષેધાર્થમેકસ્મિન્ કસ્મિંશ્ચિદભિમતે તત્ત્વેऽભ્યાસશ્ચેતસઃ પુનઃપુનર્નિવેશનં કાર્યઃ । યદ્બલાત્ પ્રત્યુદિતાયામેકાગ્રતાયાં તે વિક્ષેપાઃ પ્રણાશમુપયાન્તિ ॥ ૩૨॥

ઇદાનીં ચિત્તસંસ્કારાપાદકપરિકર્મકથનમુપાયાન્તરમાહ —

મૈત્રીકરુણામુદિતોપેક્ષાણાં સુખદુઃખપુણ્યાપુણ્યવિષયાનાં ભાવનાતશ્ચિત્તપ્રસાદનમ્ ॥ સમાધિ ૩૩॥

વૃત્તિઃ — મૈત્રી સૌહાર્દમ્ । કરુણા કૃપા । મુદિતા હર્ષઃ । ઉપેક્ષૌદાસીન્યમ્ । એતા યથાક્રમં સુખિતેષુ દુઃખિતેષુ

પુણ્યવત્સ્વપુણ્યવત્સુ ચ વિભાવયેત્ । તથાહિ — સુખિતેષુ સાધુષુ એષાં સુખિત્વમિતિ મૈત્રીં કુર્યાન્ન તુ ઈર્ષ્યામ્ । દુઃખિતેષુ કથં નુ નામૈષાં દુઃખનિવૃત્તિઃ સ્યાદિતિ કૃપામેવ કુર્યાન્ન તાટસ્થ્યમ્ । પુણ્યવત્સુ પુણ્યાનુમોદનેન હર્ષમેવ કુર્યાન્ન તુ કિમેતે પુણ્યવન્ત ઇતિ વિદ્વેષમ્ । અપુણ્યવત્સુ ચૌદાસીન્યમેવ ભાવયેન્નાનુમોદનં ન વા દ્વેષમ્ । સૂત્રે સુખદુઃખાદિશબ્દૈસ્તદ્વન્તઃ પ્રતિપાદિતાઃ । તદેવં મૈત્ર્યાદિપરિકર્મણા ચિત્તે પ્રસીદતિ સુખેન સમાધેરાવિર્ભાવો ભવતિ । પરિકર્મ ચૈતદ્બાહ્યં કર્મ । યથા ગણિતે મિશ્રકાદિવ્યવહારો ગણિતનિષ્પત્તયે સંકલિતાદિકર્મોપકારકત્વેન પ્રધાનકર્મનિષ્પત્તયે ભવત્યેવં દ્વેષરાગાદિપ્રતિપક્ષભૂતમૈત્ર્યાદિભાવનયા સમુત્પાદિતપ્રસાદં ચિત્તં સમ્પ્રજ્ઞાતાદિસમાધિયોગ્યં સમ્પદ્યતે । રાગદ્વેષાવેવ મુખ્યતયા વિક્ષેપમુત્પાદયતઃ । તૌ ચેત્ સમૂલમુન્મૂલિતૌ સ્યાતાં તદા પ્રસન્નત્વાન્મનસો ભવત્યેકાગ્રતા ॥ ૩૩॥

ઉપાયાન્તરમાહ —

પ્રચ્છર્દનવિધારણાભ્યાં વા પ્રાણસ્ય ॥ સમાધિ ૩૪॥

વૃત્તિઃ — પ્રચ્છર્દનં કૌષ્ટ્યસ્ય વાયોઃ પ્રયત્નવિશેષાન્માત્રાપ્રમાણેન બહિર્નિઃસારણમ્ । માત્રાપ્રમાણેનૈવ પ્રાણસ્ય વાયોર્બહિર્ગતિવિચ્છેદો વિધારણા । સા ચ દ્વાભ્યાં પ્રકારાભ્યાં બાહ્યસ્યાભ્યન્તરાપૂરણેન પૂરિતસ્ય વા તત્રૈવ નિરોધેન । તદેવં રેચકપૂરકકુમ્ભકસ્ત્રિવિધઃ પ્રાણાયામશ્ચિત્તસ્ય સ્થિતિમેકાગ્રતાયાં નિબધ્નાતિ સર્વાસામિન્દ્રિયવૃત્તીનાં પ્રાણવૃત્તિપૂર્વકત્વાત્ । મનઃપ્રાણયોશ્ચ સ્વવ્યાપારપરસ્પરમેકયોગક્ષેમત્વાજ્જીયમાણઃ પ્રાણઃ સમસ્તેન્દ્રિયવૃત્તિનિરોધદ્વારેણ ચિત્તસ્યૈકાગ્રતાયાં પ્રભવતિ । સમસ્તદોષક્ષયકારિત્વં ચાસ્યાગમે શ્રૂયતે । દોષકૃતાશ્ચ સર્વા વિક્ષેપવૃત્તયઃ । અતો દોષનિર્હરણદ્વારેણાપ્યસ્યૈકાગ્રતાયાં સામર્થ્યમ્ ॥ ૩૪॥

ઇદાનિમુપાયાન્તરપ્રદર્શનોપક્ષેપેણ સમ્પ્રજ્ઞાતસ્ય સમાધેઃ પૂર્વાઙ્ગં કથયતિ —

વિષયવતી વા પ્રવૃતિરુત્પન્ના સ્થિતિનિબન્ધિની ॥ સમાધિ ૩૫॥

વૃત્તિઃ — મનસ ઇતિ વાક્યશેષઃ । વિષયા

ગન્ધરસરૂપસ્પર્શશબ્દાસ્તે વિદ્યન્તે ફલત્વેન યસ્યાઃ સા
વિષયવતી પ્રવૃત્તિર્મનસઃ સ્થૈર્યં કરોતિ । તથાહિ નાસાગ્રે
ચિત્તં ધારયતો દિવ્યગન્ધસંવિદુપજાયતે । તાદૃશ્ય એવ જિહ્વાગ્રે
રસસંબિત્ । તાલ્વગ્રે રૂપસંવિત્ । જિહ્વામધ્યે સ્પર્શસંવિત્ । જિહ્વામૂલે
શબ્દસંવિત્ । તદેવં તત્તદિન્દ્રિયદ્વારેણ તસ્મિંસ્તસ્મિન્વિષયે દિવ્યે
જાયમાના સંવિચ્ચિત્તસ્યૈકાગ્રતાયા હેતુર્ભવતિ । અસ્તિ યોગસ્ય ફલમિતિ
યોગિનઃ સમાશ્વાસોત્પાદનાત્ ॥ ૩૫॥

એવમ્વિધમેવોપાયાન્તરમાહ —

વિશોકા વા જ્યોતિષ્મતી ॥ સમાધિ ૩૬॥

વૃત્તિઃ — પ્રવૃત્તિરુત્પન્ના ચિત્તસ્ય સ્થિતિનિબન્ધિનીતિ
વાક્યશેષઃ । જ્યોતિઃશબ્દેન સાત્ત્વિકઃ પ્રકાશ ઉચ્યતે । સ પ્રશસ્તો
ભૂયાનતિશયવાંશ્ચ વિદ્યતે યસ્યાઃ સા જ્યોતિષ્મતી પ્રવૃત્તિઃ । વિશોકા
વિગતઃ સુખમયસત્ત્વાભ્યાસવશાચ્છોકો રજઃપરિણામો યસ્યાઃ સા વિશોકા
ચેતસઃ સ્થિતિનિબન્ધિની । અયમર્થઃ — હૃત્પદ્મસમ્પૂટમધ્યે
પ્રશાન્તકલ્લોલક્ષીરોદધિપ્રખ્યં ચિત્તસ્ય સત્ત્વં ભાવયતઃ
પ્રજ્ઞાલોકાત્ સર્વવૃત્તિક્ષયે ચેતસઃ સ્થૈર્યમુત્પદ્યતે ॥ ૩૬॥

ઉપાયાન્તરપ્રદર્શનદ્વારેણ સમ્પ્રજ્ઞાતસમાધેર્વિષયં દર્શયતિ
—

વીતરાગવિષયં વા ચિત્તમ્ ॥ સમાધિ ૩૭॥

વૃત્તિઃ — મનસઃ સ્થિતિનિબન્ધનં ભવતીતિ શેષઃ । વીતરાગઃ
પરિત્યક્તવિષયાભિલાષસ્તસ્ય યચ્ચિત્તં પરિહૃતક્લેશં
તદાલમ્બનીકૃતં ચેતસઃ સ્થિતિહેતુર્ભવતિ ॥ ૩૭॥

એવંવિધમુપાયાન્તરમાહ —

સ્વપ્નનિદ્રાજ્ઞાનાલમ્બનં વા ॥ સમાધિ ૩૮॥

વૃત્તિઃ — પ્રત્યસ્તમિતબાહ્યેન્દ્રિયવૃત્તેર્મનોમાત્રેણૈવ યત્ર
ભોક્તૃત્વમાત્મનઃ સ સ્વપ્નઃ । નિદ્રા પૂર્વોક્તલક્ષણા । તદાલમ્બનં
સ્વપ્નાલમ્બનં નિદ્રાલમ્બનં વા જ્ઞાનમાલમ્બ્યમાનં ચેતસઃ સ્થિતિં
કરોતિ ॥ ૩૮॥

નાનારુચિત્વાત્ પ્રાણિનાં યસ્મિન્ કસ્મિંશ્ચિદ્વસ્તુનિ યોગિનઃ શ્રદ્ધા

ભવતિ । તસ્ય ધ્યાનેનાપીષ્ટસિદ્ધિરિતિ પ્રતિપાદયિતુમાહ —

યથાભિમતધ્યાનાદ્વા ॥ સમાધિ ૩૯॥

વૃત્તિઃ — યથાભિપ્રેતે વસ્તુનિ બાહ્યે ચન્દ્રાદાવભ્યન્તરે
નાડિચક્રાદૌ વા ભાવ્યમાને ચેતઃ સ્થિરીભવતિ ॥ ૩૯॥

એવમુપાયાન્ પ્રદર્શ્ય ફલદર્શનાયાહ —

પરમાણુપરમમહત્ત્વાન્તોઽસ્ય વશીકારઃ ॥ સમાધિ ૪૦॥

વૃત્તિઃ — એભિરુપાયૈશ્ચિત્તસ્ય સ્થૈર્યં ભાવયતો યોગિનઃ
સૂક્ષ્મવિષયભાવનાદ્વારેણ પરમાણ્વન્તો વશીકારોઽપ્રતિઘાતરૂપો જાયતે ।
ન ક્વચિત્ પરમાણુપર્યન્તે સૂક્ષ્મે વિષયેઽસ્ય મનઃ પ્રતિહન્યતે
ઇત્યર્થઃ । એવં સ્થૂલમાકાશાદિપરમમહત્વપર્યન્તં ભાવયતો ન
ક્વચિચ્ચેતસઃ પ્રતિઘાત ઉત્પદ્યતે સર્વત્ર સ્વાતન્ત્ર્યં ભવતીત્યર્થઃ ॥ ૪૦॥

એવમેભિરુપાયૈઃ સંસ્કૃતસ્ય ચેતસઃ કીદૃગ્રૂપં ભવતીત્યાહ —

ક્ષીણવૃત્તેરભિજાતસ્યેવ મણેર્ગ્રહીતૃગ્રહણગ્રાહ્યેષુ
તત્સ્થતદઞ્જનતા સમાપત્તિઃ ॥ સમાધિ ૪૧॥

વૃત્તિઃ — ક્ષીણા વૃત્તયો યસ્ય સ ક્ષીણવૃત્તિસ્તસ્ય
ગ્રહીતૃગ્રહણગ્રાહ્યેષ્વાત્મેન્દ્રિયવિષયેષુ તત્સ્થતદઞ્જનતા
સમાપત્તિર્ભવતિ । તત્સ્થત્વં તત્રૈકાગ્રતા । તદઞ્જનતા
તન્મયત્વમ્ । ક્ષીણભૂતે ચિત્તે વિષયસ્ય ભાવ્યમાનસ્યૈવોત્કર્ષઃ ।
variation ન્યગ્ભૂતે ચિત્તે
તથાવિધા સમાપત્તિસ્તદ્રૂપઃ પરિણામો ભવતીત્યર્થઃ ।
દૃષ્ટાન્તમાહાઽભિજાતસ્યેવ મણેરિતિ । યથાઽભિજાતસ્ય
નિર્મલસ્ફટિકમણેસ્તત્તદુપાધિવશાત્ તત્તદ્રૂપાપત્તિરેવં નિર્મલસ્ય
ચિત્તસ્ય તત્તદ્ભાવનીયવસ્તૂપરાગાત્તત્તદ્રૂપાપત્તિઃ ।
યદ્યપિ ગ્રહીતૃગ્રહણગ્રાહ્યેષુ ઇત્યુક્તં તથાપિ
ભૂમિકાક્રમવશાદ્ગ્રાહ્યગ્રહણગ્રહીતૃષુ ઇતિ બોધ્યમ્ । યતઃ પ્રથમં
ગ્રાહ્યનિષ્ઠ એવ સમાધિસ્તતો ગ્રહણનિષ્ઠસ્તતોઽસ્મિ તામાત્રરૂપો
ગ્રહીતૃનિષ્ઠઃ કેવલસ્ય પુરુષસ્ય ગ્રહીતુર્ભાવ્યત્વાસમ્ભવાત્ ।
તતશ્ચ સ્થૂલસૂક્ષ્મગ્રાહ્યોપરક્તં ચિત્તં તત્ર સમાપન્નં ભવતિ ।
એવં ગ્રહણે ગ્રહીતરિ ચ સમાપન્નં બોધ્યવ્યમ્ ॥ ૪૧॥

ઇદાનીમુક્તાયા એવ સમાપત્તેશ્ચાતુર્વિધ્યમાહ —

શબ્દાર્થજ્ઞાનવિકલ્પૈઃ સઙ્કીર્ણા સવિતર્કા સમાપત્તિઃ ॥ સમાધિ ૪૨॥

વૃત્તિઃ — શ્રોત્રેન્દ્રિયગ્રાહ્યઃ સ્ફોટરૂપો વા શબ્દઃ । અર્થો જાત્યાદિઃ ।
જ્ઞાનં સત્ત્વપ્રધાના બુદ્ધિવૃત્તિઃ । વિકલ્પ ઉક્તલક્ષણઃ । તૈઃ
સંકીર્ણાઃ । યસ્યામેતે શબ્દાદયસ્ત્રયઃ પરસ્પરાધ્યાસેન વિકલ્પરૂપેણ
પ્રતિભાસન્તે ગૌરિતિ શબ્દો ગૌરિત્યર્થો ગૌરિતિ જ્ઞાનમિત્યનેનાકારેણ
સા સવિતર્કા સમાપત્તિરુચ્યતે ॥ ૪૨॥

ઉક્તલક્ષણવિપરીતાં નિર્વિતર્કામાહ —

સ્મૃતિપરિશુદ્ધૌ સ્વરૂપશૂન્યેવાઽર્થમાત્રનિર્ભાસા નિર્વિતર્કા ॥ સમાધિ ૪૩॥

વૃત્તિઃ — શબ્દાર્થસ્મૃતિપ્રવિલયે સતિ
પ્રત્યુદિતસ્પષ્ટગ્રાહ્યાકારપ્રતિભાસતયા ન્યગ્ભૂતજ્ઞાનાંશત્વેન
સ્વરૂપશૂન્યેવ નિર્વિતર્કા સમાપત્તિઃ ॥ ૪૩॥

ભેદાન્તરં પ્રતિપાદયિતુમાહ —

એતયૈવ સવિચારા નિર્વિચારા ચ સૂક્ષ્મવિષયા વ્યાખ્યાતા ॥ સમધિ ૪૪॥

વૃત્તિઃ — એતયૈવ સવિતર્કયા નિર્વિતર્કયા ચ સમાપત્ત્યા
સવિચારા નિર્વિચારા ચ વ્યાખ્યાતા । કીદૃશી । સૂક્ષ્મવિષયા
સૂક્ષ્મસ્તન્માત્રેન્દ્રિયાદિર્વિષયો યસ્યાઃ સા તથોક્તા ।
એતેન પૂર્વસ્યાઃ સ્થૂલવિષયત્વં પ્રતિપાદિતં ભવતિ ।
સા હિ મહાભૂતેન્દ્રિયાલમ્બના । શબ્દાર્થવિષયત્વેન
શબ્દાર્થવિકલ્પસહિતત્વેન દેશકાલધર્માદ્યવચ્છિન્નઃ સૂક્ષ્મોઽર્થઃ
પ્રતિભાતિ યસ્યાં સા સવિચારા । દેશકાલધર્માદિરહિતો ધર્મિમાત્રતયા
સૂક્ષ્માર્થસ્તન્માત્રેન્દ્રિયરૂપઃ પ્રતિભાતિ યસ્યાં સા નિર્વિચારા ॥ ૪૪॥

અસ્યા એવ સૂક્ષ્મવિષયાયાઃ કિમ્પર્યન્તઃ સૂક્ષ્મવિષય ઇત્યાહ —

સૂક્ષ્મવિષયત્વં ચાલિઙ્ગપર્યવસાનમ્ ॥ સમાધિ ૪૫॥

વૃત્તિઃ — સવિચારનિર્વિચારયોઃ સમાપત્ત્યોર્યત્
સૂક્ષ્મવિષયત્વમુક્તં તદલિઙ્ગપર્યવસાનમ્ । ન ક્વચિલ્લીયતે
ન વા કિઞ્ચિલ્લિઙ્ગતિ ગમયતીત્યલિઙ્ગં પ્રધાનમ્ । તત્પર્યન્તં
સૂક્ષ્મવિષયત્વમ્ । તથાહિ — ગુણાનાં પરિણામે ચત્વારિ પર્વાણિ

— વિશિષ્ટલિઙ્ગમવિશિષ્ટલિઙ્ગં લિઙ્ગમાત્રમલિઙ્ગં ચેતિ ।
વિશિષ્ટલિઙ્ગં ભૂતેન્દ્રિયાણિ । અવિશિષ્ટલિઙ્ગાં તન્માત્રાન્તઃકરણાનિ ।
લિઙ્ગમાત્રં બુદ્ધિઃ । અલિઙ્ગમ્ પ્રધાનમિતિ । નાતઃ પરં
સૂક્ષ્મમસ્તીત્યુક્તં ભવતિ ॥ ૪૫॥

એતાસાં સમાપત્તીનાં પ્રકૃતે પ્રયોજનમાહ —

તા એવ સબીજઃ સમાધિઃ ॥ સમાધિ ૪૬॥

વૃત્તિઃ — તા એવોક્તલક્ષનાઃ સમાપત્તયઃ સબીજઃ સહ
બીજેનાલમ્બનેન વર્તત ઇતિ સબીજઃ સમ્પ્રજ્ઞાતઃ સમાધિરુચ્યતે સર્વાસાં
સાલમ્બનત્વાત્ ॥ ૪૬॥

અથેતરાસાં સમાપત્તીનાં નિર્વિચારફલત્વાન્નિર્વિચારાયાઃ ફલમાહ —

નિર્વિચારવૈશારદ્યેઽધ્યાત્મપ્રસાદઃ ॥ સમાધિ ૪૭॥

વૃત્તિઃ — નિર્વિચારત્વં વ્યાખ્યાતમ્ (૧।૪૪)। વૈશારદ્યં
નૈર્મલ્યમ્ । સવિતર્કાં સ્થૂલવિષયામપેક્ષ્ય નિર્વિતર્કાયાઃ પ્રાધાન્યમ્ ।
તતોઽપિ સૂક્ષ્મવિષયાયાઃ સવિચારાયાઃ । તતોઽપિ નિર્વિચારાયાઃ ।
તસ્યાસ્તુ નિર્વિકલ્પરૂપાયાઃ પ્રકૃષ્ટાભ્યાસવશાદ્વૈશારદ્યે
નૈર્મલ્યે સત્યધ્યાત્મપ્રસાદઃ સમુપજાયતે । ચિત્તં ક્લેશવાસનારહિતં
સ્થિતિપ્રવાહયોગ્યં ભવતિ । એતદેવ ચિત્તસ્ય વૈશારદ્યં યત્ સ્થિતૌ
દાર્ઢ્યમ્ ॥ ૪૭,,
તસ્મિન્ સતિ કિં ભવતીત્યાહ —

ઋતમ્ભરા તત્ર પ્રજ્ઞા ॥ સમધિ ૪૮॥

વૃત્તિઃ — ઋતં સત્યં વિભર્તિ કદાચિદપિ ન
વિપર્યયેણાચ્છાદ્યતે સા ઋતમ્ભરા પ્રજ્ઞા તસ્મિન્ ભવતીત્યર્થઃ ।
તસ્માચ્ચ પ્રજ્ઞાલોકાત્ સર્વં યથાવત્ પશ્યન્ યોગી પ્રકૃષ્ટં
યોગં પ્રાપ્નોતિ ॥ ૪૮॥

અસ્યાઃ પ્રજ્ઞાન્તરાદ્વૈલક્ષણ્યમાહ —

શ્રુતાનુમાનપ્રજ્ઞાભ્યામન્યવિષયા વિશેષાર્થત્વાત્ ॥ સમાધિ ૪૯॥

[ પ્રજ્ઞાભ્યાં સામાન્યવિષયા ઇતિ પાઠોઽપિ દૃશ્યતે । ]

વૃત્તિઃ — શ્રુતમાગમજ્ઞાનમ્ । અનુમાનમુક્તલક્ષણમ્

(૧।૭)। તાભ્યાં યા જાયતે પ્રજ્ઞા સા સામાન્યવિષયા । ન હિ શબ્દલિઙ્ગયોરિન્દ્રિયવદ્વિશેષપ્રતિપત્તૌ સામર્થ્યમ્ । ઇયં પુનઃ નિર્વિચારવૈશારદ્યસમુદ્ભવા પ્રજ્ઞા તાભ્યાં વિલક્ષણા વિશેષવિષયત્વાત્ । અસ્યાં હિ પ્રજ્ઞાયાં સૂક્ષ્મવ્યવહિતવિપ્રકૃષ્ટાનામપિ વિશેષઃ સ્ફુટેનૈવ રૂપેણ ભાસતે । અતસ્તસ્યામેવ યોગિના પરઃ પ્રયત્નઃ કર્તવ્ય ઇત્યુપદિષ્ટં ભવતિ ॥ ૪૯॥

અસ્યાઃ પ્રજ્ઞાયાઃ ફલમાહ —

તજ્જઃ સંસ્કારોઽન્યસંસ્કારપ્રતિબન્ધી ॥ સમાધિ ૫૦॥

વૃત્તિઃ — તયા પ્રજ્ઞયા જનિતો યઃ સંસ્કારઃ સોઽન્યાન્ સંસ્કારાન્ વ્યુત્થાનજાન્ સમાધિજાંશ્ચ સંસ્કારાન્ પ્રતિબધ્નાતિ સ્વકાર્યકરણાક્ષમાન્ કરોતીત્યર્થઃ । યતસ્તત્ત્વરૂપતયાઽનયા જનિતાઃ સંસ્કારા બલવત્વાદતત્ત્વરૂપપ્રજ્ઞાજનિતાન્ સંસ્કારાન્ બાધિતું શક્નુવન્તિ । અતસ્તામેવ પ્રજ્ઞામભ્યસેદિત્યુક્તં ભવતિ ॥ ૫૦॥

એવં સમ્પ્રજ્ઞાતસમાધિમભિધાયાસમ્પ્રજ્ઞાતં વક્તુમાહ —

તસ્યાપિ નિરોધે સર્વનિરોધાન્નિર્બીજઃ સમાધિઃ ॥ સમાધિ ૫૧॥

વૃત્તિઃ — તસ્યાપિ સમ્પ્રજ્ઞાતસ્ય નિરોધે વિલયે સતિ સર્વાસાં ચિત્તવૃત્તીનાં કારણે પ્રવિલયાદ્યા સંસ્કારમાત્રાદ્વૃત્તિરુદેતિ તસ્યાં નેતિ નેતિ કેવલં પર્યુદસનાન્નિર્બીજઃ સમાધિર્ભવતિ યસ્મિન્ સતિ પુરુષઃ સ્વરૂપનિષ્ઠઃ શુદ્ધો ભવતિ ॥ ૫૧॥

તદત્રાધિકૃતસ્ય યોગસ્ય લક્ષણં ચિત્તવૃત્તિનિરોધપદાનાં વ્યાખ્યાનમભ્યાસવૈરાગ્યલક્ષણસ્યોપાયદ્વયસ્ય સ્વરૂપં ભેદં ચાભિધાય સમ્પ્રજ્ઞાતાસમ્પ્રજ્ઞાતભેદેન યોગસ્ય મુખ્યામુખ્યભેદમુક્ત્વા યોગાભ્યાસપ્રદર્શનપૂર્વકં વિસ્તારેણોપાયાન્ પ્રદર્શ્ય સુગમોપાયપ્રદર્શનપરતયા ઈશ્વરસ્ય સ્વરૂપપ્રમાણપ્રભાવવાચકોપાસનાનિ તત્ફલાનિ ચ નિર્ણીય ચિત્તવિક્ષેપાંસ્તત્તત્સહભુવશ્ચ દુઃખાદીન્ વિસ્તરેણ ચ તત્પ્રતિષેધોપાયાનેકત્વાભ્યાસમૈત્ર્યાદિપ્રાણાયામાદીન્ સમ્પ્રજ્ઞાતાસમ્પ્રજ્ઞાતપૂર્વાઙ્ગભૂતવિષયવતી પ્રવૃત્તિરિત્યાદીનાખ્યાયોપસંહારદ્વારેણ ચ સમાપત્તિં લક્ષણફલસહિતાં સ્વસ્વવિષયસહિતાં ચોક્ત્વા

સમ્પ્રજ્ઞાતાસમ્પ્રજ્ઞાતયોરુપસંહારમભિધાય
સબીજપૂર્વકનિર્બીજસમાધિરભિહિત ઇતિ વ્યાકૃતો યોગપાદઃ ।

ઇતિ ધારેશ્વરભોજદેવવિરચિતાયાં રાજમાર્તણ્ડાભિધાયાં
પાતઞ્જલવૃત્તૌ સમાધિપાદઃ ॥ ૧॥

ઇતિ સમાધિપાદઃ ॥ ૧॥

——————————————————

અથ સાધનપાદઃ ॥ ૨॥

તે તે દુષ્પ્રાપયોગર્દ્ધિસિદ્ધયે યેન દર્શિતાઃ ।
ઉપાયાઃ સ જગન્નાથસ્ત્ર્યક્ષોઽસ્તુ પ્રાર્થિતાપ્તયે ॥

તદેવં પ્રથમે પાદે સમાહિતચિત્તસ્ય સોપાયં યોગમભિધાય
વ્યુત્થિતચિત્તસ્યાપિ કથમુપાયાભ્યાસપૂર્વકો યોગઃ સ્વાસ્થ્યમુપયાતીતિ
તત્સાધનાનુષ્ઠાનપ્રતિપાદનાય ક્રિયાયોગમાહ —

તપઃ સ્વાધ્યાયેશ્વરપ્રણિધાનાનિ ક્રિયાયોગઃ ॥ સાધન ૧॥

વૃત્તિઃ — તપઃ શાસ્ત્રાન્તરોપદિષ્ટં કૃચ્છ્રચાન્દ્રાયણાદિ ।
સ્વાધ્યાયઃ પ્રણવપૂર્વાણાં મન્ત્રાણાં જપઃ । ઈશ્વરપ્રનિધાનં
સર્વક્રિયાણાં તસ્મિન્ પરમગુરૌ ફલનિરપેક્ષતયા સમર્પણમ્ । એતાનિ
ક્રિયાયોગ ઇત્યુચ્યતે ॥ ૧॥

સ કિમર્થમિત્યાહ —

સમાધિભાવનાર્થઃ ક્લેશતનૂકરણાર્થશ્ચ ॥ સાધન ૨॥

વૃત્તિઃ — ક્લેશા વક્ષ્યમાણાસ્તેષાં તનૂકરણં
સ્વકાર્યકરણપ્રતિબન્ધઃ । સમાધિરુક્તલક્ષણઃ
(૧।૧૭)। તસ્ય ભાવના ચેતસિ પુનઃપુનર્નિવેશનં
સાઽર્થઃ પ્રયોજનં યસ્ય સ તથોક્તઃ । એતદુક્તં ભવતિ —
એતે તપઃપ્રભૃતયોઽભ્યસ્યમાનાશ્ચિત્તગતાનવિદ્યાદીન્ ક્લેશાન્
શિથિલીકુર્વન્તઃ સમાધેરુપકારકતાં ભજન્તે । તસ્માત્ પ્રથમં
ક્રિયાયોગવિધાનપરેણ યોગિના ભવિતવ્યમિત્યુપદિષ્ટમ્ ॥ ૨॥

ક્લેશતનૂકરણાર્થ ઇત્યુક્તમ્ । તત્ર કે ક્લેશા ઇત્યાહ —

અવિદ્યાઽસ્મિતારાગદ્વેષાભિનિવેશાઃ ક્લેશાઃ ॥ સાધન ૩॥

વૃત્તિઃ — અવિદ્યાદયાઃ વક્ષ્યમાણલક્ષણાઃ પઞ્ચ । તે બાધનાલક્ષણં પરિતાપમુપજનયન્તઃ ક્લેશશબ્દવાચ્યા ભવન્તિ । તે હિ ચેતસિ પ્રવર્તમાનાઃ સંસ્કારલક્ષણં ગુણપરિણામં દ્રઢયન્તિ ॥ ૩॥

સત્યપિ સર્વેષાં તુલ્યક્લેશત્વે મૂલભૂતત્વાદવિદ્યાયાઃ પ્રાધાન્યં પ્રતિપાદયિતુમાહ —

અવિદ્યા ક્ષેત્રમુત્તરેષાં પ્રસુપ્તતનુવિચ્છિન્નોદારાણામ્ ॥ સાધન ૪॥

વૃત્તિઃ — અવિદ્યા મોહોઽનાત્મન્યાત્માભિમાન ઇતિ યાવત્ । સા ક્ષેત્રં પ્રસવભૂમિરુત્તરેષામસ્મિતાદીનાં પ્રત્યેકં પ્રસુપ્તતન્વાદિભેદેન ચતુર્વિધાનામ્ । અતો યત્રાવિદ્યા વિપર્યયજ્ઞાનરૂપા શિથિલીભવતિ તત્ર ક્લેશાનામસ્મિતાદીનાં નોદ્ભવો દૃશ્યતે । વિપર્યયજ્ઞાનસદ્ભાવે ચ તેષામુદ્ભવદર્શનાત્ સ્થિતમેવ મૂલત્વમવિદ્યાયાઃ ।
પ્રસુપ્તતનુવિચ્છિન્નોદારાણામિતિ । તત્ર યે ક્લેશાશ્ચિત્તભૂમૌ સ્થિતાઃ પ્રબોધકાભાવે સ્વકાર્યં નારભન્તે તે પ્રસુપ્તા ઇત્યુચ્યન્તે । યથા બાલાવસ્થાયાં બાલસ્ય હિ વાસનારૂપાઃ સ્થિતા અપિ ક્લેશાઃ પ્રબોધકસહકાર્યભાવે નાભિવ્યજ્યન્તે ।
તે તનવો યે સ્વસ્વપ્રતિપક્ષભાવનયા શિથિલીકૃતકાર્યસમ્પાદનશક્તયો વાસનાઽવશેષતયા ચેતસ્યવસ્થિતાઃ પ્રભૂતાં સામગ્રીમન્તરેણ સ્વકાર્યમારબ્ધુમક્ષમા યથાઽભ્યાસવતો યોગિનઃ ।
તે વિચ્છિન્ના યે કેનચિદ્બલવતા ક્લેશેનાભિભૂતશક્તયસ્તિષ્ઠન્તિ યથા દ્વેષાવસ્થાયાં રાગો રાગાવસ્થાયાં વા દ્વેષઃ । ન હ્યનયોઃ પરસ્પરવિરુદ્ધયોર્યુગપત્ સમ્ભવોઽસ્તિ ।
તે ઉદારા યે પ્રાપ્તસહકારિસન્નિધયઃ સ્વં સ્વં કાર્યમભિનિર્વર્તયન્તિ યથા સદૈવ યોગપરિપન્થિનો વ્યુત્થાનદશાયામ્ ।
એષાં પ્રત્યેકં ચતુર્વિધાનામપિ મૂલભૂતત્વેન સ્થિતાઽપ્યવિદ્યાઽન્વયિત્વેન પ્રતીયતે । ન હિ ક્વચિદપિ ક્લેશાનાં વિપર્યયાન્વયનિરપેક્ષાણાં સ્વરૂપમુપલભ્યતે । તસ્માત્ [પા૦ તસ્યાં ચ] મિથ્યાજ્ઞાનરૂપાયામવિદ્યાયાં સમ્યગ્જ્ઞાનેન નિવર્તિતાયાં દગ્ધબીજકલ્પાનામેષાં ન ક્વચિત્ પ્રરોહોઽસ્તિ । અતોઽવિદ્યાનિમિત્તત્વમવિદ્યાન્વયશ્ચૈતેષાં નિશ્ચીયતે ।

અતઃ સર્વેઽપ્યવિદ્યાવ્યપદેશભાજઃ । સર્વેષાં ચ ક્લેશાનાં
ચિત્તવિક્ષેપકારિત્વાદ્યોગિના પ્રથમમેવ તદુચ્છેદે યત્નઃ કાર્ય ઇતિ ॥ ૪॥

અવિદ્યાલક્ષણમાહ —

અનિત્યાશુચિદુઃખાનાત્મસુ નિત્યશુચિસુખાત્મખ્યાતિરવિદ્યા ॥ સાધન ૫॥

વૃત્તિઃ — અતસ્મિંસ્તત્પ્રતિભાસોઽવિદ્યેત્યવિદ્યાયાઃ
સામાન્યલક્ષણમ્ । તસ્યા એવ ભેદપ્રતિપાદનમ્ — અનિત્યેષુ
ઘટાદિષુ નિત્યત્વાભિમાનોઽવિદ્યેત્યુચ્યતે । એવમશુચિષુ કાયાદિષુ
શુચિત્યાભિમાનો દુઃખેષુ વિષયેષુ સુખાભિમાનોઽનાત્મશરીર
આત્માભિમાનઃ । એતેનાપુણ્યે પુણ્યભ્રમોઽનર્થેઽર્થભ્રમો વ્યાખ્યાતઃ ॥ ૫॥

અસ્મિતાં લક્ષયિતુમાહ —

દૃગ્દર્શનશક્ત્યોરેકાત્મતેવાસ્મિતા ॥ સાધન ૬॥

વૃત્તિઃ — દૃક્ષક્તિઃ પુરુષઃ ।
દર્શનશક્તી રજસ્તમોભ્યામનભિભૂતઃ સાત્વિકઃ
પરિણામોઽન્તઃકરણરૂપઃ । અનયોર્ભોક્તૃભોગ્યત્વેન
જડાજડત્વેનાત્યન્તભિન્નરૂપયોરેકતાભિમાનોઽસ્મિ તેત્યુચ્યતે ।
યથા પ્રકૃતિર્વસ્તુતઃ કર્તૃત્વભોક્તૃત્વરહિતાપિ
કર્ત્ર્યહમિત્યભિમન્યતે [પા૦ યથા પ્રકૃતિવતા કર્તૃત્વરહિતેનાપિ
કર્તાહમિત્યભિમન્યતે] સોઽયમસ્મિતાખ્યો વિપર્યાસઃ ક્લેશઃ ॥ ૬॥

રાગસ્ય લક્ષણમાહ —

સુખાનુશયી રાગઃ ॥ સાધન ૭॥

વૃત્તિઃ — સુખમનુશેત ઇતિ સુખાનુશયી । સુખજ્ઞસ્ય
સુખાનુભૂતિપૂર્વકઃ સુખસાધનેષુ તૃષ્ણારૂપો ગર્ધો રાગસંજ્ઞકઃ
ક્લેશઃ ॥ ૭॥

દ્વેષલક્ષણમાહ —

દુઃખાનુશયી દ્વેષઃ ॥ સાધન ૮॥

વૃત્તિઃ — દુઃખમુક્તલક્ષણમ્ । તદભિજ્ઞસ્ય
તદનુસ્મૃતિપૂર્વકં તત્સાધનેષ્વનભિલષતો યોઽયં નિન્દાત્મકઃ
ક્રોધઃ સ દ્વેષલક્ષણઃ ક્લેશઃ ॥ ૮॥

અભિનિવેશસ્ય લક્ષણમાહ —

સ્વરસવાહી વિદુષોઽપિ તથારૂઢોઽભિનિવેશઃ ॥ સાધન ૯॥

વૃત્તિઃ — પૂર્વજન્માનુભૂતમરણદુઃખાનુભવવાસનાબલાદ્ભયરૂપઃ સમુપજાયમાનઃ શરીરવિષયાદિભિર્મમ વિયોગો મા ભૂદિત્યન્વહમનુબન્ધરૂપઃ સર્વસ્યૈવાઽઽકૃમેર્બ્રહ્મપર્યન્તં નિમિત્તમન્તરેણ પ્રવર્તમાનોઽભિનિવેશાખ્યઃ ક્લેશઃ ॥ ૯॥

તદેવં વ્યુત્થાનસ્ય ક્લેશાત્મકત્વાદેકાગ્રતાઽભ્યાસકામેન પ્રથમં ક્લેશાઃ પરિહર્તવ્યાઃ । ન ચાજ્ઞાતાનાં તેષાં પરિહારઃ કર્તું શક્ય ઇતિ તજ્જ્ઞાનાય તેષામુદ્દેશં લક્ષણં ક્ષેત્રં વિભાગં ચાભિધાય સ્થૂલસૂક્ષ્મભેદભિન્નાનાં તેષાં પ્રહાણોપાયવિભાગમાહ —

તે પ્રતિપ્રસવહેયાઃ સૂક્ષ્માઃ ॥ સાધન ૧૦॥

વૃત્તિઃ — તે સુક્ષ્માઃ ક્લેશાઃ યે વાસનારૂપેણૈવ સ્થિતાઃ સ્વવૃત્તિરૂપં પરિણામં નારભન્તે । તે પ્રતિપ્રસવેન પ્રતિલોમપરિણામેન હેયાસ્ત્યક્તવ્યાઃ । સ્વકારણેઽસ્મિતાયાં કૃતાર્થં સવાસનં ચિત્તં યદા પ્રવિષ્ટં ભવતિ તદા કુતસ્તેષાં નિર્મૂલાનાં સમ્ભવઃ ॥ ૧૦॥

સ્થૂલાનાં હાનોપાયમાહ —

ધ્યાનહેયાસ્તદ્વૃત્તયઃ ॥ સાધન ૧૧॥

વૃત્તિઃ — તેષાં ક્લેશાનામારબ્ધકાર્યાણાં યાઃ સુખદુઃખમોહાત્મિકા વૃત્તયસ્તા ધ્યાનહેયાઃ । ધ્યાનેનૈવ ચિત્તૈકાગ્રતાલક્ષણેન હાતવ્યા ઇત્યર્થઃ । ચિત્તપરિકર્માભ્યાસમાત્રેણૈવ સ્થૂલત્વાત્ તાસાં નિવૃત્તિર્ભવતિ । યથા વસ્ત્રાદૌ સ્થૂલો મલઃ પ્રક્ષાલનમાત્રેણૈવ નિવર્તતે । યસ્તત્ર સૂક્ષ્માંશઃ સ તૈસ્તૈરુપાયૈરુત્તાપનપ્રભૃતિભિરેવ નિવર્તયિતું શક્યતે ॥ ૧૧॥

એવં ક્લેશાનાં તત્ત્વમભિધાય કર્માશયસ્ય તદભિધાતુમાહ —

ક્લેશમૂલઃ કર્માશયો દૃષ્ટાદૃષ્ટજન્મવેદનીયઃ ॥ સાધન ૧૨॥

વૃત્તિઃ — કર્માશય ઇત્યનેન સ્વરૂપં તસ્યાભિહિતમ્ । અતો વાસનારૂપાણ્યેવ કર્માણિ । ક્લેશમૂલ ઇત્યનેન

કારણમભિહિતં યતઃ કર્મણાં શુભાશુભાનાં ક્લેશા એવ
નિમિત્તમ્ । દૃષ્ટાદૃષ્ટજન્મવેદનીય ઇત્યનેન ફલમુક્તમ્ ।
અસ્મિન્નેવ જન્મનિ અનુભવનીયો દૃષ્ટજન્મવેદનીયઃ ।
જન્માન્તરાનુભવનીયોઽદૃષ્ટજન્મવેદનીયઃ ।
તથાહિ — કાનિચિત્ પુણ્યાનિ દેવતારાધનાદીનિ તીવ્રસંવેગેન
કૃતાનિ ઇહૈવ જન્મનિ જાત્યાયુર્ભોગલક્ષણં ફલં પ્રયચ્છન્તિ
યથા નન્દીશ્વરસ્ય ભગવન્મહેશ્વરારાધનબલાદિહૈવ જન્મનિ
જાત્યાદયો વિશિષ્ટાઃ પ્રાદુર્ભૂતાઃ । એવમન્યેષાં વિશ્વામિત્રાદીનાં
તપઃપ્રભાવાજ્જાત્યાયુષી । કેષાઞ્ચિજ્જાતિરેવ યથા તીવ્રસંવેગેન
દુષ્ટકર્મકૃતાં નહુષાદીનાં જાત્યન્તરાદિપરિણામઃ । ઉર્વશ્યાશ્ચ
કાર્તિકેયવને લતારૂપતયા । એવં વ્યસ્તસમસ્તત્વેન યથાયોગ્યં યોજ્યમિતિ ॥ ૧૨॥

ઇદાનીં કર્માશયસ્ય સ્વભેદભિન્નં ફલમાહ —

સતિ મૂલે તદ્વિપાકો જાત્યાયુર્ભોગાઃ ॥ સાધન ૧૩॥

વૃત્તિઃ — મૂલમુક્તલક્ષણાઃ ક્લેશાઃ । તેષ્વનભિભૂતેષુ સત્સુ
કર્મણાં કુશલાકુશલરૂઉપાણાં વિપાકઃ ફલં જાત્યાયુર્ભોગા ભવન્તિ ।
જાતિર્મનુષ્યાદિઃ । આયુશ્ચિરકાલમેકશરીરસમ્બન્ધઃ । ભોગા
વિષયા ઇન્દ્રિયાણિ સુખસંવિદ્દુઃખસંવિચ્ચ સુખદુઃખાદીનિ
કર્મકરણભાવબોધનવ્યુત્પત્યા ભોગશબ્દસ્ય । ઇદમત્ર
તાત્પર્યમ્ — ચિત્તભૂમાવનાદિકાલસઞ્ચિતાઃ કર્મવાસના
યથા યથા પાકમુપયાન્તિ તથા તથા ગુણપ્રધાનભાવેન સ્થિતા
જાત્યાયુર્ભોગલક્ષણં સ્વકાર્યમારભન્તે ॥ ૧૩॥

ઉક્તાનાં કર્મફલત્વેન જાત્યાદીનાં સ્વકારણકર્માનુસારિણાં
કાર્યકર્તૃત્વમાહ —

તે હ્લાદપરિતાપફલાઃ પુણ્યાપુણ્યહેતુત્વાત્ ॥ સાધન ૧૪॥

વૃત્તિઃ — હ્લાદઃ સુખમ્ પરિતાપો દુઃખં તૌ ફલં યેષાં તે
તથોક્તાઃ । પુણ્યં કુશલં કર્મ તદ્વિપરીતમપુણ્યં તે કર્મણી કારણં
યેષાં તેષાં ભાવસ્તસ્માત્ । એતદુક્તં ભવતિ — પુણ્યકર્મારબ્ધા
જાત્યાયુર્ભોગા હ્લાદફલાઃ । અપુણ્યકર્મારબ્ધાસ્તુ પરિતાપફલાઃ । એતચ્ચ
પ્રાણિમાત્રાપેક્ષયા દ્વૈવિધ્યમ્ ॥ ૧૪॥

યોગિનસ્તત્સર્વં દુઃખમિત્યાહ —

પરિણામતાપસંસ્કારદુઃખૈર્ગુણવૃત્તિવિરોધાચ્ચ દુઃખમેવ સર્વં
વિવેકિનઃ ॥ સાધન ૧૫॥

વૃત્તિઃ — વિવેકિનઃ પરિજ્ઞાતક્લેશાદિવિવેકસ્ય
દૃશ્યમાત્રં સકલમેવ ભોગસાધનં સવિષં
સ્વાદ્વન્નમિવ દુઃખમેવ પ્રતિકૂલવેદનીયમેવેત્યર્થઃ ।
યસ્માદત્યન્તાભિજાતો યોગી દુઃખલેશેનાપ્યુદ્વિજતે । યથા —
અક્ષિપાત્રમૂર્ણાતન્તુસ્પર્શમાત્રેણૈવ મહતીં પીડામનુભવતિ
નેતરદઙ્ગં તથા વિવેકી સ્વલ્પદુઃખાનુબન્ધેનાપ્યુદ્વિજતે ।
કથમિત્યાહ — પરિણામતાપસંસ્કારદુઃખૈઃ ।
વિષયાણામુપભુજ્યમાનાનાં યથાયથં
ગર્ધાભિવૃદ્ધેસ્તદપ્રાપ્તિકૃતસ્ય સુખદુઃખસ્યાપરિહાર્યતયા
દુઃખાન્તરસાધનત્વાન્નાસ્ત્યેવ સુખરૂપતેતિ પરિણામદુઃખત્વમ્ ।
ઉપગૃહ્યમાણેષુ સુખસાધનેષુ તત્પ્રતિપન્થિનં પ્રતિ દ્વેષસ્ય
સર્વદૈવાવસ્થિતત્વાત્ સુખાનુભવકાલેઽપિ તાપદુઃખં દુષ્પરિહરમિતિ
તાપદુઃખતા ।
સંસ્કારદુઃખં તુ સ્વાભિમતાનભિમતવિષયસન્નિધાને
સુખસંવિદ્દુઃખસંવિચ્ચોપજાયમાના તથાવિધમેવ સ્વક્ષેત્રે
સંસ્કારમારભતે । સંસ્કારાચ્ચ પુનસ્તથાવિધસંવિદનુભવ
ઇત્યપરિમિતસંસ્કારોત્પત્તિદ્વારેણ સર્વસ્યૈવ દુઃખાનુવેધાદ્દુઃખત્વમ્ ।
એવમુક્તં ભવતિ — ક્લેશકર્માશયવિપાકસંસ્કારાનુચ્છેદાત્
સર્વસ્યૈવ દુઃખત્વમ્ ।
ગુણવૃત્તિવિરોધાચ્ચેતિ । ગુણાનાં સત્વરજસ્તમસાં યા વૃત્તયઃ
સુખદુઃખમોહરૂપાઃ પરસ્પરમભિભાવ્યાભિભાવકત્વેન વિરુદ્ધા જાયન્તે ।
તાસાં સર્વત્રૈવ દુઃખાનુવેધાદ્ દુઃખત્વમ્ ।
એતદુક્તં ભવતિ — ઐકાન્તિકીમાત્યન્તિકીં ચ દુઃખનિવૃત્તિમિચ્છતો
વિવેકિન ઉક્તરૂપકારણચતુષ્ટયાઃ સર્વે વિષયા દુઃખરૂપતયા
પ્રતિભાન્તિ । તસ્માચ્ચ સર્વકર્મવિપાકો દુઃખરૂપ એવેત્યુક્તં ભવતિ ॥ ૧૫॥

તદેવમુક્તસ્ય ક્લેશકર્માશયવિપાકરાશેરવિદ્યાપ્રભવત્વાદવિદ્યાયાશ્ચ
મિથ્યાજ્ઞાનરૂપતયા સમ્યગ્જ્ઞાનોચ્છેદ્યત્વાત્ સમ્યગ્જ્ઞાનસ્ય ચ
સસાધનહેયોપાદેયાવધારણરૂપત્વાત્ તદભિધાનમાહ —

હેયં દુઃખમનાગતમ્ ॥ સાધન ૧૬॥

વૃત્તિઃ — ભૂતસ્યાતિક્રાન્તત્વાદનુભૂયમાનસ્ય
ત્યક્તુમશક્યત્વાદનાગતમેવ સંસારદુઃખં હાતવ્યમિત્યુક્તં ભવતિ ॥ ૧૬॥

હેયહેતુમાહ —

દ્રષ્ટૃદૃશ્યયોઃ સંયોગો હેયહેતુઃ ॥ સાધન ૧૭॥

વૃત્તિઃ — દ્રષ્ટા ચિદ્રૂપઃ પુરુષઃ । દૃશ્યં બુદ્ધિસત્ત્વં ।
તયોરવિવેકખ્યાતિપૂર્વકો યોઽસૌ સંયોગો ભોક્તૃભોગ્યત્વેન
સન્નિધાનં સ હેયસ્ય દુઃખસ્ય ગુણપરિણામરૂપસ્ય સંસારસ્ય હેતુઃ
કારણમ્ । તન્નિવૃત્યા સંસારનિવૃત્તિર્ભવતીત્યર્થઃ ॥ ૧૭॥

દ્રષ્ટૃદૃશ્યયોઃ સંયોગ ઇત્યુક્તમ્ । તત્ર દૃશ્યસ્ય સ્વરૂપં કાર્યં
પ્રયોજનં ચાહ —

પ્રકાશક્રિયાસ્થિતિશીલં ભૂતેન્દ્રિયાત્મકં ભોગાપવર્ગાર્થં દૃશ્યમ્ ॥ સાધન ૧૮॥

વૃત્તિઃ — પ્રકાશઃ સત્ત્વસ્ય ધર્મઃ । ક્રિયા પ્રવૃત્તિરૂપા
રજસઃ । સ્થિતિર્નિયમરૂપા તમસઃ । તાઃ પ્રકાશક્રિયાસ્થિતયઃ શીલં
સ્વાભાવિકં રૂપં યસ્ય તત્તથાવિધમિતિ સ્વરૂપમસ્ય નિર્દિષ્ટમ્ ।
ભૂતેન્દ્રિયાત્મકમિતિ । ભૂતાનિ સ્થૂલસૂક્ષ્મભેદેન
દ્વિવિધાનિ પૃથિવ્યાદીનિ ગન્ધતન્માત્રાદીનિ ચ । ઇન્દ્રિયાણિ
બુદ્ધીન્દ્રિયકર્મેન્દ્રિયાન્તઃકરણભેદેન ત્રિવિધાનિ ।
ઉભયમેતદ્ગ્રાહ્યગ્રહણરૂપાત્મા સ્વરૂપાભિન્નઃ પરિણામો યસ્ય
તત્તથાવિધમિત્યનેનાસ્ય કાર્યમુક્તમ્ । ભોગઃ કથિતલક્ષણઃ । અપવર્ગો
વિવેકખ્યાતિપૂર્વિકા સંસારનિવૃત્તિઃ । તૌ ભોગાપવર્ગવર્થઃ પ્રયોજનં
યસ્ય તત્તથાવિધં દૃશ્યમિત્યર્થઃ ॥ ૧૮॥

તસ્ય દૃશ્યસ્ય નાનાવસ્થારૂપપરિણામાત્મકસ્ય હેયત્વેન જ્ઞાતવ્યત્વાત્
તદવસ્થાઃ કથયિતુમાહ —

વિશેષાવિશેષલિઙ્ગમાત્રાલિઙ્ગાનિ ગુણપર્વાણિ ॥ સાધન ૧૯॥

વૃત્તિઃ — ગુણાનાં પર્વાણ્યવસ્થાવિશેષાશ્ચત્વારો જ્ઞાતવ્યા
ઇત્યુપદિષ્ટં ભવતિ । તત્ર વિશેષા મહાભૂતેન્દ્રિયાણિ ।
અવિશેષાસ્તન્માત્રાન્તઃકરણાનિ । લિઙ્ગમાત્રં બુદ્ધિઃ ।
અલિઙ્ગમવ્યક્તમિત્યુક્તમ્ । સર્વત્ર ત્રિગુણરૂપસ્યાવ્યક્તસ્યાન્વયિત્વેન

પ્રત્યભિજ્ઞાનાદવશ્યં જ્ઞાતવ્યત્વેન યોગકાલે ચત્વારિ પર્વાણિ નિર્દિષ્ટાનિ ॥ ૧૯॥

એવં હેયત્વેન દૃશ્યસ્ય પ્રથમં જ્ઞાતવ્યત્વાત્ તદવસ્થાસહિતં વ્યાખ્યાયોપાદેયં દ્રષ્ટારં વ્યાખ્યાતુમાહ —

દ્રષ્ટા દૃશિમાત્રઃ શુદ્ધોઽપિ પ્રત્યયાનુપશ્યઃ ॥ સાધન ૨૦॥

વૃત્તિઃ — દ્રષ્ટા પુરુષો દૃશિમાત્રશ્ચેતનામાત્રમ્ । માત્રગ્રહણં ધર્મધર્મિનિરાસાર્થમ્ । કેચિદ્ધિ ચેતનામાત્મનો ધર્મમિચ્છન્તિ । સ શુદ્ધોઽપિ પરિણામિત્વાદ્યભાવેન સ્વપ્રતિષ્ઠોઽપિ પ્રત્યયાનુપશ્યઃ । પ્રત્યયા વિષયોપરક્તાનિ વિજ્ઞાનાનિ તાનિ અનુ અવ્યવધાનેન પ્રતિસંક્રમાદ્યભાવેન પશ્યતિ । એતદુક્તં ભવતિ — જાતવિષયોપરાગાયામેવ બુદ્ધૌ સન્નિધિમાત્રેણૈવ પુરુષસ્ય દ્રષ્ટુત્વમિતિ ॥ ૨૦॥

સ એવ ભોક્તેત્યાહ —

તદર્થ એવ દૃશ્યસ્યાત્મા ॥ સાધન ૨૧॥ [ તદર્થઃ એવ ]

વૃત્તિઃ — દૃશ્યસ્ય પ્રાગુક્તલક્ષણસ્ય ય આત્મા યત્ સ્વરૂપં તદર્થ એવ । તસ્ય પુરુષાર્થભોક્તૃત્વસમ્પાદનં નામ સ્વાર્થપરિહારેણ પ્રોયોજનમ્ । ન હિ પ્રધાનં પ્રવર્તમાનમાત્મનઃ કિઞ્ચિત્ પ્રયોજનમપેક્ષ્ય પ્રવર્તતે કિન્તુ પુરુષસ્ય ભોક્તૃત્વં સમ્પાદયિતુમિતિ ॥ ૨૧॥

યદ્યેવં પુરુષ્સ્ય ભોગસમ્પાદનમેવ પ્રોયોજનં તદા સ્મ્પાદિતે તસ્મિંસ્તન્નિષ્પ્રયોજનં વિરતવ્યાપારં સ્યાત્ । તસ્મિંશ્ચ પરિણામશૂન્યે શુદ્ધત્વાત્ સર્વે દ્રષ્ટારો બન્ધરહિતાઃ સ્યુઃ । તતશ્ચ સંસારોચ્છેદ ઇત્યાશઙ્ક્યાહ —

કૃતાર્થં પ્રતિ નષ્ટમપ્યનષ્ટં તદન્યસાધારણત્વાત્ ॥ સાધન ૨૨॥

વૃત્તિઃ — યદ્યપિ વિવેકખ્યાતિપર્યન્તાદ્ભોગસમ્પાદનાત્ કમપિ કૃતાર્થં પુરુષં પ્રતિ તન્નષ્ટં વિરતવ્યાપારં તથાપિ સર્વપુરુષસાધારણત્વાદન્યાન્ પ્રત્યનષ્ટવ્યાપારમવતિષ્ઠતે । અતઃ પ્રધાનસ્ય સકલભોક્તૃસાધારણત્વાન્ન કદાચિદપિ વિનાશઃ । એકસ્ય મુક્તૌ વા ન સર્વમુક્તિપ્રસઙ્ગ ઇત્યુક્તં ભવતિ ॥ ૨૨॥

દૃશ્યદ્રષ્ટારૌ વ્યાખ્યાય સંયોગં વ્યાખ્યાતુમાહ —

સ્વસ્વામિશક્ત્યોઃ સ્વરૂપોપલબ્ધિહેતુઃ સંયોગઃ ॥ સાધન ૨૩ ॥

વૃત્તિઃ — કાર્યદ્વારેણાસ્ય લક્ષણં કરોતિ । સ્વશક્તિર્દૃશ્યસ્ય સ્વભાવઃ । સ્વામિશક્તિર્દ્રષ્ટુઃ સ્વરૂપમ્ । તયોર્દ્વયોરપિ સંવેદ્યસંવેદકત્વેન વ્યવસ્થિતયોર્યા સ્વરૂપોપલબ્ધિસ્તસ્યાઃ કારણં યઃ સ સંયોગઃ । સ ચ સહજો ભોગ્યભોક્તૃભાવસ્વરૂપાનન્યઃ [ પા૦ સ ચ સહજભોગ્યભોક્તૃભાવસ્વરૂપાન્નાન્યઃ] । ન હિ તયોર્નિત્યયોર્વ્યાપકયોઃ સ્વરૂપાદતિરિક્તઃ કશ્ચિત્ સંયોગઃ । યદેવ ભોગ્યસ્ય ભોગ્યત્વં ભોક્તુશ્ચ ભોક્તૃત્વમનાદિસિદ્ધં સ એવ સંયોગઃ ॥ ૨૩ ॥

તસ્યાપિ કારણમાહ —

તસ્ય હેતુરવિદ્યા ॥ સાધન ૨૪ ॥

વૃત્તિઃ — યા પૂર્વં વિપર્યાસાત્મિકા મોહરૂપાऽવિદ્યા વ્યાખ્યાતા (૨।૪-૫) સા તસ્યાવિવેકખ્યાતિરૂપસ્ય સંયોગસ્ય કારણમ્ ॥ ૨૪ ॥

હેયં હાનિક્રિયાકર્મોચ્યતે । કિં પુનસ્તદ્ધાનમિત્યાહ —

તદભાવે સંયોગાભાવો હાનં તદ્દૃશેઃ કૈવલ્યમ્ ॥ સાધન ૨૫ ॥

વૃત્તિઃ — તસ્યા અવિદ્યાયાઃ સ્વરૂપવિરુદ્ધેન સમ્યગ્જ્ઞાનેનોન્મૂલિતાયા યોऽયમભાવસ્તસ્મિન્ સતિ તત્કાર્યસ્ય સંયોગસ્યાપ્યભાવસ્તદ્ધાનમિત્યુચ્યતે । અયમર્થઃ — નૈતસ્યાऽમૂર્તવસ્તુનો વિભાગો યુજ્યતે [પા૦ નૈતસ્ય મૂર્તદ્રવ્યવત્ પરિત્યાગો યુજ્યતે] કિન્તુ જાતાયાં વિવેકખ્યાતવવિવેકનિમિત્તઃ સંયોગઃ સ્વયમેવ નિવર્તત ઇતિ તસ્ય હાનમ્ । યદેવ ચ સંયોગસ્ય હાનં તદેવ નિત્યં કેવલસ્યાપિ પુરુષસ્ય કૈવલ્યં વ્યપદિશ્યતે ॥ ૨૫ ॥

તદેવં દૃશ્યસંયોગસ્ય સ્વરૂપં કારણં કાર્યં ચાભિહિતમ્ । અથ હાનોપાયકથનદ્વારેણ ઉપાદેયકારણમાહ —

વિવેકખ્યાતિરવિપ્લવા હાનોપાયઃ ॥ સાધન ૨૬ ॥

વૃત્તિઃ — અન્યે ગુણા અન્યઃ પુરુષ ઇત્યેવંવિધસ્ય વિવેકસ્ય યા ખ્યાતિઃ પ્રખ્યા સાऽસ્ય હાનસ્ય દૃશ્યદુઃખપરિત્યાગસ્યોપાયઃ કારણમ્ । કીદૃશી । અવિપ્લવા ન વિદ્યતે વિપ્લવો

વિચ્છેદોઽન્તરાઽન્તરાઽભ્યુત્થાનરૂપો યસ્યાઃ સા અવિપ્લવા ।
ઇદમત્ર તાત્પર્યમ્ — પ્રતિપક્ષભાવનાબલાદવિદ્યાપ્રલયે
વિનિવૃત્તકર્તૃત્વભોક્તૃત્વાભિમાનાયા રજસ્તમોમલાનભિભૂતાયા
બુદ્ધેરન્તર્મુખા યા ચિચ્છાયાસંક્રાન્તિઃ સા વિવેકખ્યાતિરુચ્યતે ।
તસ્યાં ચ સન્તતત્વેન પ્રવૃત્તાયાં સત્યાં
દૃશ્યસ્યાધિકારનિવૃત્તેર્ભવત્યેવ કૈવલ્યમ્ ॥ ૨૬॥

ઉત્પન્નવિવેકખ્યાતેઃ પુરુષસ્ય યાદૃશી પ્રજ્ઞા ભવતિ તાં કથયન્
વિવેકખ્યાતેરેવ સ્વરૂપમાહ —

તસ્ય સપ્તધા પ્રાન્તભૂમૌ પ્રજ્ઞા ॥ સાધન ૨૭॥

[તસ્ય સપ્તધા પ્રાન્તભૂમિઃ પ્રજ્ઞા ઇતિ વા બહુસમ્મતઃ સૂત્રપાઠઃ । ]

વૃત્તિઃ — તસ્યોત્પન્નવિવેકજ્ઞાનસ્ય જ્ઞાતવ્યવિવેકરૂપા પ્રજ્ઞા
પ્રાન્તભૂમૌ સકલસાલમ્બનસમાધિપર્યન્તે સપ્તપ્રકારા ભવન્તીત્યર્થઃ
।
તત્ર કાર્યવિમુક્તિરૂપા ચતુષ્પ્રકારા — ૧। જ્ઞાતં મયા
જ્ઞેયમ્ । જ્ઞાતવ્યં ન કિઞ્ચિદસ્તિ । ૨। ક્ષીણા મે ક્લેશાઃ । ન
કિઞ્ચિત્ ક્ષેતવ્યમસ્તિ । ૩। અધિગતં મયા જ્ઞાનમ્ । ૪। પ્રાપ્તા મયા
વિવેકખ્યાતિરિતિ । પ્રત્યયાન્તરપરિહારેણ તસ્યામવસ્થાયામીદૃશ્યેવ
પ્રજ્ઞા જાયતે । ઈદૃશી પ્રજ્ઞા કાર્યવિષયં નિર્મલં જ્ઞાનં
કાર્યવિમુક્તિરિત્યુચ્યતે ।
ચિત્તવિમુક્તિસ્ત્રિધા — ૫। ચરિતાર્થા મે બુદ્ધિઃ । ગુણા
હૃતાધિકારા ગિરિશિખરનિપતિતા ઇવ ગ્રાવાણો ન પુનઃ
સ્થિતિં યાસ્યન્તિ । ૬। સ્વકારણે પ્રવિલયાભિમુખાનાં ગુણાનાં
મોહાભિધાનમૂલકારણાભાવાન્નિષ્પ્રયોજનત્વાચ્ચામીષાં કુતઃ
પ્રરોહો ભવેત્ । ૭। સ્વસ્થીભૂતશ્ચ [પા૦ સાત્મીભૂતશ્ચ]
મે સમાધિસ્તસ્મિન્ સતિ સ્વરુપપ્રતિષ્ઠોઽહમિતિ । ઈદૃશી ત્રિપ્રકારા
ચિત્તવિમુક્તિઃ । તદેવમીદૃશ્યાં સપ્તવિધભૂમિપ્રજ્ઞાયામુપજાતાયાં
પુરુષઃ કેવલ ઇત્યુચ્યતે ॥ ૨૭॥

વિવેકખ્યાતિઃ સંયોગાભાવહેતુરિત્યુક્તમ્ । તસ્યાસ્તુ ઉત્પત્તૌ કિં
નિમિત્તમિત્યાહ —

યોગાઙ્ગાનુષ્ઠાનાદશુદ્ધિક્ષયે જ્ઞાનદીપ્તિરાવિવેકખ્યાતેઃ ॥ સાધન

૨૮॥

વૃત્તિઃ — યોગાઙ્ગાનિ વક્ષ્યમાણાનિ ।
તેષામનુષ્ઠાનાજ્ જ્ઞાનપૂર્વકાભ્યાસાદાવિવેકખ્યાતેરશુદ્ધિક્ષયે
ચિત્તસત્ત્વસ્ય પ્રકાશાવરણરૂપક્લેશાત્મકાશુદ્ધિક્ષયે યા
જ્ઞાનદીપ્તિસ્તારતમ્યેન સાત્ત્વિકઃ પરિણામો વિવેકખ્યાતિપર્યન્તસ્તસ્યાઃ
ખ્યાતેર્હેતુરિત્યર્થઃ ॥ ૨૮॥

યોગાઙ્ગાનામનુષ્ઠાનાદશુદ્ધિક્ષય ઇત્યુક્તમ્ । કાનિ પુનસ્તાનિ
યોગાઙ્ગાનીતિ તેષામુદ્દેશમાહ —

યમનિયમાસનપ્રાણાયામપ્રત્યાહારધારણાધ્યાનસમાધયોઽષ્ટાવઙ્ગાનિ ॥ સાધન ૨૯॥

વૃત્તિઃ — ઇહ કાનિચિત્ સમાધેઃ સાક્ષાદુપકારકાણિ યથા ધારણાદીનિ
કાનિચિત્ પ્રતિપક્ષભૂતહિંસાદિવિતર્કોન્મૂલનદ્વારેણ સમાધિમુપકુર્વન્તિ
યથા યમાદયઃ । તત્રાસનાદીનામુત્તરોતરમુપકારકત્વમ્ । તદ્યથા —
સત્યાસનજયે પ્રાણાયામસ્થૈર્યમ્ । એવમુત્તરત્રાપિ યોજ્યમ્ ॥ ૨૯॥

ક્રમેણૈષાં સ્વરૂપમાહ —

અહિંસાસત્યાસ્તેયબ્રહ્મચર્યાપરિગ્રહા યમાઃ ॥ સાધન ૩૦॥

વૃત્તિઃ — તત્ર પ્રાણવિયોગપ્રયોજનવ્યાપારો હિંસા । સા ચ
સર્વાનર્થહેતુઃ । તદભાવોઽહિંસા । હિંસાયાઃ સર્વપ્રકારેણૈવ
પરિહાર્યત્વાત્ પ્રથમં તદભાવરૂપાયા અહિંસાયા નિર્દેશઃ । સત્યં
વાઙ્મનસોર્યથાર્થત્વમ્ । સ્તેયં પરસ્વાપહરણં તદભાવોઽસ્તેયમ્ ।
બ્રહ્મચર્યમુપસ્થસંયમઃ । અપરિગ્રહો ભોગસાધનાનામનઙ્ગીકારઃ ।
ત એતેઽહિંસાદયઃ પઞ્ચ યમશબ્દવાચ્યા યોગાઙ્ગત્વેન નિર્દિષ્ટાઃ ॥ ૩૦॥

એષાં વિશેષમાહ —

જાતિદેશકાલસમયાનવચ્છિન્નાઃ સાર્વભૌમા મહાવ્રતમ્ ॥ સાધન ૩૧॥

વૃત્તિઃ — જાતિર્બ્રાહ્મણત્વાદિઃ । દેશસ્તીર્થાદિઃ ।
કાલશ્ચતુર્દશ્યાદિઃ । સમયો બ્રાહ્મણપ્રયોજનાદિઃ ।
એતૈશ્ચતુર્ભિરનવચ્છિન્નાઃ પૂર્વોક્તા અહિંસાદયો યમાઃ સર્વાસુ
ક્ષિપ્તાદિષુ ચિત્તભૂમિષુ ભવા મહાવ્રતમિત્યુચ્યતે । તદ્યથા —
બ્રાહ્મણં ન હનિષ્યામિ તીર્થે ન કંચન હનિષ્યામિ ચતુર્દશ્યાં ન
હનિષ્યામિ દેવબ્રાહ્મણપ્રયોજનવ્યતિરેકેણ કમપિ ન હનિષ્યામીતિ । એવં

ચતુર્વિધાવચ્છેદવ્યતિરેકેણ કિંચિત્ કદાચિત્ કસ્મિંશ્ચિદર્થે ન
હનિષ્યામીત્યનવચ્છિન્નાઃ । એવં સત્યાદિષુ યથાયોગં યોજ્યમ્ ।
ઇત્થમનિયતીકૃતાઃ સામાન્યેનૈવ પ્રવૃત્તા મહાવ્રતમિત્યુચ્યતે ન પુનઃ
પરકીયપરિચ્છિન્નાવધારણમ્ [પા૦ ન પુનઃ પરિચ્છિન્નાવધારણમ્ ॥ ૩૧॥

નિયમાનાહ —

શૌચસન્તોષતપઃસ્વાધ્યાયેશ્વરપ્રણિધાનાનિ નિયમાઃ ॥ સાધન ૩૨॥

વૃત્તિઃ — શૌચં દ્વિવિધમ્ — બાહ્યમાભ્યન્તરં
ચ । બાહ્યં મૃજ્જલાદિભિઃ કાયાદિપ્રક્ષાલનમ્ । આભ્યન્તરં
મૈત્ર્યાદિભિશ્ચિત્તમલાનાં પ્રક્ષાલનમ્ । સન્તોષસ્તુષ્ટિઃ ।
શેષાઃ પ્રાગેવ (૨।૧) કૃતવ્યાખ્યાનાઃ । એતે શૌચાદયો
નિયમશબ્દવાચ્યાઃ ॥ ૩૨॥

કથમેષાં યોગાઙ્ગત્વમિત્યાહ —

વિતર્કબાધને પ્રતિપક્ષભાવનમ્ ॥ સાધન ૩૩॥

વૃત્તિઃ — વિતર્ક્યન્તે ઇતિ વિતર્કા યોગપરિપન્થિનો હિંસાદયઃ ।
તેષાં પ્રતિપક્ષભાવને સતિ યદા બાધા ભવતિ તદા યોગઃ સુકરો
ભવતીતિ ભવત્યેવ યમનિયમયોર્યોગાઙ્ગત્વમ્ ॥ ૩૩॥

ઇદાનીં વિતર્કાણાં સ્વરૂપં ભેદપ્રકારં ફલં ચ ક્રમેણાહ —

વિતર્કા હિંસાદયઃ કૃતકારિતાનુમોદિતા લોભક્રોધમોહપૂર્વકા
મૃદુમધ્યાધિમાત્રા દુઃખાજ્ઞાનાનન્તફલા ઇતિ પ્રતિપક્ષભાવનમ્ ॥ સાધન ૩૪॥

વૃત્તિઃ — એતે પૂર્વોક્તા હિંસાદયઃ પ્રથમં ત્રિધા ભિદ્યન્તે
કૃતકારિતાનુમોદનભેદેન । તત્ર સ્વયં નિષ્પાદિતાઃ કૃતાઃ । કુરુ
કુર્વિતિ પ્રયોજકવ્યાપારેણ સમુત્પાદિતાઃ કારિતાઃ । અન્યેન ક્રિયમાણાઃ
સાધ્વિત્યઙ્ગીકૃતા અનુમોદિતાઃ । એતચ્ચ ત્રૈવિધ્યં પરસ્પરં
વ્યામોહનિરાકરણાવધારણાયોચ્યતે । અન્યથા મન્દમતિરેવં મન્યેત ન
મયા સ્વયં હિંસા કૃતેતિ નાસ્તિ મે દોષઃ । એતેષાં કારણપ્રતિપાદનાય
લોભક્રોધમોહપૂર્વકા ઇતિ ।
યદ્યપિ લોભઃ પ્રથમં નિર્દિષ્ટસ્તથાઽપિ સર્વક્લેશાનાં
મોહસ્યાઽનાત્મન્યાત્માભિમાનલક્ષણસ્ય નિદાનત્વાત્ તસ્મિન્ સતિ
સ્વપરવિભાગપૂર્વકત્વેન લોભક્રોધાદીનામુદ્ભવાન્મૂલત્વમવસેયમ્ ।

મોહપૂર્વિકા સર્વા દોષજાતિરિત્યર્થઃ । લોભસ્તૃષ્ણા । ક્રોધઃ
કૃત્યાકૃત્યવિવેકોન્મૂલકઃ પ્રજ્વલનાત્મકશ્ચિત્તધર્મઃ ।
પ્રત્યેકં કૃતાદિભેદેન ત્રિપ્રકારા અપિ હિંસાદયો મોહાદિકારણત્વેન
ત્રિધા ભિદ્યન્તે । એષામેવ પુનરવસ્થાભેદેન ત્રૈવિધ્યમાહ —
મૃદુમધ્યાધિમાત્રાઃ । મૃદવો મન્દાઃ ન તીવ્રા નાપિ મધ્યાઃ । મધ્યા
નાપિ મન્દા નાપિ તીવ્રાઃ । અધિમાત્રાસ્તીવ્રાઃ । પાશ્ચાત્ત્યા નવભેદાઃ ।
ઇત્થં ત્રૈવિધ્યે સતિ સપ્તવિંશતિર્ભવતિ । મૃદ્વાદીનામપિ પ્રત્યેકં
મૃદુમધ્યાધિમાત્રભેદાત્ ત્રૈવિધ્યં સમ્ભવતિ । તદ્યથાયોગં યોજ્યમ્ ।
તદ્યથા — મૃદુમૃદુર્મૃદુમધ્યો મૃદુતીવ્ર ઇતિ ।
એષાં ફલમાહ — દુઃખાજ્ઞાનાનન્તફલા દુઃખં
પ્રતિકૂલતયાऽવભાસમાનો રાજસશ્ચિત્તધર્મઃ । અજ્ઞાનં મિથ્યાજ્ઞાનં
સંશયવિપર્યયરૂપમ્ । તે દુઃખાજ્ઞાનેऽનન્તમપરિચ્છિન્નં ફલં
યેષાં તે તથોક્તાઃ । ઇત્થં તેષાં સ્વરૂપકારણાદિભેદેન જ્ઞાતાનાં
પ્રતિપક્ષભાવનયા યોગિના પરિહારઃ કર્તવ્ય ઇત્યુપદિષ્ટં ભવતિ ॥ ૩૪॥

એષામભ્યાસવશાત્ પ્રકર્ષમાગચ્છતામનુનિષ્પાદિન્યઃ સિદ્ધયો યથા
ભવન્તિ તથા ક્રમેણ પ્રતિપાદયિતુમાહ —

અહિંસાપ્રતિષ્ઠાયાં તત્સન્નિધૌ વૈરત્યાગઃ ॥ સાધન ૩૫॥

વૃત્તિઃ — તસ્યાऽહિંસાં ભાવયતઃ સન્નિધૌ
સહજવિરોધિનામપ્યહિનકુલાદીનાં વૈરત્યાગો નિર્મત્સરતયાऽવસ્થાનં
ભવતિ । હિંસ્રસ્વભાવા અપિ હિંસાં ત્યજન્તીત્યર્થઃ [પા૦ હિંસ્રા
અપિ હિંસ્રત્વં પરિત્યજન્તીત્યર્થઃ] ॥ ૩૫॥

સત્યાભ્યાસવતઃ કિં ભવતીત્યાહ —

સત્યપ્રતિષ્ઠાયાં ક્રિયાફલાશ્રયત્વમ્ ॥ સાધન ૩૬॥

વૃત્તિઃ — ક્રિયમાણા હિ ક્રિયા યાગાદિકાઃ ફલં સ્વર્ગાદિકં
પ્રયચ્છન્તિ । તસ્ય તુ સત્યાભ્યાસવતો યોગિનસ્તથા સત્યં પ્રકૃષ્યતે
યથા ક્રિયાયામકૃતાયામપિ યોગી ફલમાપ્નોતિ । તદ્વચનાદ્યસ્ય કસ્યચિત્
ક્રિયામકુર્વતોऽપિ ક્રિયાફલં ભવતીત્યર્થઃ ॥ ૩૬॥

અસ્તેયાભ્યાસવતઃ ફલમાહ —

અસ્તેયપ્રતિષ્ઠાયાં સર્વરત્નોપસ્થાનમ્ ॥ સાધન ૩૭॥

વૃત્તિઃ — અસ્તેયં યદાऽભ્યસતિ તદાસ્ય
તત્પ્રકર્ષાન્નિરભિલાષસ્યાપિ સર્વતો દિવ્યાનિ રત્નાન્યુપતિષ્ઠન્તે ॥ ૩૭॥

બ્રહ્મચર્યાભ્યાસસ્ય ફલમાહ —

બ્રહ્મચર્યપ્રતિષ્ઠાયાં વીર્યલાભઃ ॥ સાધન ૩૮॥

વૃત્તિઃ — યઃ કિલ બ્રહ્મચર્યમભ્યસ્યતિ તસ્ય
તત્પ્રકર્ષાન્નિરતિશયં વીર્યં સામર્થ્યમાવિર્ભવતિ । વીર્યનિરોધે
હિ બ્રહ્મચર્યસ્ય પ્રકર્ષાચ્છરીરેન્દ્રિયમનઃસુ વીર્યં
પ્રકર્ષમાગચ્છતિ ॥ ૩૮॥

અપરિગ્રહસ્ય ફલમાહ —

અપરિગ્રહસ્થૈર્યે જન્મકથન્તાસમ્બોધઃ ॥ સાધન ૩૯॥

વૃત્તિઃ — કથમિત્યસ્ય ભાવઃ કથન્તા । જન્મનઃ કથન્તા
જન્મકથન્તા । તસ્યાઃ સમ્બોધઃ સમ્યગ્જ્ઞાનં જન્માન્તરે કોऽહમાસં
કીદૃશઃ કિંકાર્યકારીતિ જિજ્ઞાસાયાં સર્વમેવ સમ્યગ્જાનાતીત્યર્થઃ ।
ન કેવલં ભોગસાધનપરિગ્રહ એવ પરિગ્રહો યાવદાત્મનઃ
શરીરપરિગ્રહોऽપિ પરિગ્રહો ભોગસાધનત્વાચ્છરીરસ્ય । તસ્મિન્ સતિ
રાગાનુબન્ધાદ્બહિર્મુખાયામેવ પ્રવૃત્તૌ ન તાત્ત્વિકજ્ઞાનપ્રાદુર્ભાવઃ
।
યદા પુનઃ શરીરાદિપરિગ્રહનૈરપેક્ષ્યેણ માધ્યસ્થ્યમવલમ્બતે
તદા મધ્યસ્થસ્ય રાગાદિત્યાગાત્ સમ્યગ્જ્ઞાનહેતુર્ભવત્યેવ
પૂર્વાપરજન્મસમ્બોધઃ ॥ ૩૯॥

ઉક્તા યમાનાં સિદ્ધયઃ । અથ નિયમાનામાહ —

શૌચાત્સ્વાઙ્ગજુગુપ્સા પરૈરસંસર્ગઃ ॥ સાધન ૪૦॥

વૃત્તિઃ — યઃ શૌચં ભાવયતિ તસ્ય સ્વાઙ્ગેષ્વપિ
કારણસ્વરૂપપર્યાલોચનદ્વારેણ જુગુપ્સા ઘૃણા સમુપજાયતે —
અશુચિરયં કાયો નાત્રાગ્રહઃ કાર્ય ઇતિ । અમુનૈવ હેતુના પરૈરન્યૈશ્ચ
કાયવદ્ભિરસંસર્ગઃ સમ્પર્કાભાવઃ સંસર્ગપરિવર્જનમિત્યર્થઃ ।
યઃ કિલ સ્વમેવ કાયં જુગુપ્સતે તત્તદવદ્યદર્શનાત્ સ કથં
પરકીયૈસ્તથાભૂતૈશ્ચ કાયૈઃ સંસર્ગમનુભવતિ ॥ ૪૦॥

શૌચસ્યૈવ ફલાન્તરમાહ —

સત્ત્વશુદ્ધિસૌમનસ્યૈકાગ્રતેન્દ્રિયજયાત્મદર્શનયોગ્યત્વાનિ ચ ॥ સાધન ૪૧॥

વૃત્તિઃ — ભવન્તીતિ વાક્યશેષઃ । સત્ત્વં પ્રકાશસુખાદ્યાત્મકં તસ્ય શુદ્ધી રજસ્તમોભ્યામનભિભવઃ । સૌમનસ્યં ખેદાનનુભવેન માનસી પ્રીતિઃ । એકાગ્રતા નિયતવિષયે ચેતસઃ સ્થૈર્યમ્ । ઇન્દ્રિયજયો વિષયપરાઙ્મુખાણામિન્દ્રિયાણામાત્મન્યવસ્થાનમ્ । આત્મદર્શને વિવેકખ્યાતિરૂપે ચિત્તસ્ય યોગ્યત્વં સમર્થત્વમ્ । શૌચાભ્યાસવત એવ એતે સત્ત્વશુદ્ધ્યાદયઃ ક્રમેણ પ્રાદુર્ભવન્તિ । તથાહિ — સત્ત્વશુદ્ધેઃ સૌમનસ્યમ્ । સૌમનસ્યાદેકાગ્રતા । એકાગ્રતાયા ઇન્દ્રિયજયઃ । તસ્માદાત્મદર્શનયોગ્યતેતિ ॥ ૪૧॥

સન્તોષાભ્યાસસ્ય ફલમાહ —

સન્તોષાદનુત્તમઃ સુખલાભઃ ॥ સાધન ૪૨॥

વૃત્તિઃ — સન્તોષપ્રકર્ષેણ યોગિનસ્તથાવિધમાન્તરં સુખમાવિર્ભવતિ યસ્ય બાહ્યં વિષયસુખં શતાંશેનાપિ ન સમમ્ ॥ ૪૨॥

તપસઃ ફલમાહ —

કાયેન્દ્રિયસિદ્ધિરશુદ્ધિક્ષયાત્તપસઃ ॥ સાધન ૪૩॥

વૃત્તિઃ —તપઃ સમભ્યસ્યમાનં ચેતસઃ ક્લેશાદિલક્ષણાશુદ્ધિક્ષયદ્વારેણ કાયેન્દ્રિયાણાં સિદ્ધિપ્રકર્ષમાદધાતિ । અયમર્થઃ — ચાન્દ્રાયણાદિના ચિત્તક્લેશક્ષયસ્તત્ક્ષયાદિન્દ્રિયાદીનાં સૂક્ષ્મવ્યવહિતવિપ્રકૃષ્ટદર્શનાદિસામર્થ્યમાવિર્ભવતિ કાયસ્ય યથેચ્છમ્ અણુત્વમહત્ત્વાદીનિ ॥ ૪૩॥

સ્વાધ્યાયસ્ય ફલમાહ —

સ્વાધ્યાયાદિષ્ટદેવતાસમ્પ્રયોગઃ ॥ સાધન ૪૪॥

વૃત્તિઃ — અભિપ્રેતમન્ત્રજપાદિલક્ષણે સ્વાધ્યાયે પ્રકૃષ્યમાણે યોગિન ઇષ્ટયાઽભિપ્રેતયા દેવતયા સમ્પ્રયોગો ભવતિ । સા દેવતા પ્રત્યક્ષા ભતીત્યર્થઃ ॥ ૪૪॥

ઈશ્વરપ્રણિધાનસ્ય ફલમાહ —

સમાધિસિદ્ધિરીશ્વરપ્રણિધાનાત્ ॥ સાધન ૪૫॥

વૃત્તિઃ — ઈશ્વરે યત્ પ્રણિધાનં ભક્તિવિશેષસ્તસ્માત્
સમાધેરુક્તલક્ષણસ્યાવિર્ભાવો ભવતિ યસ્માત્ સ ભગવાનીશ્વરઃ
પ્રસન્નઃ સન્નન્તરાયરૂપાન્ ક્લેશાન્ પરિહૃત્ય સમાધિં સમ્બોધયતિ ॥ ૪૫॥

યમનિયમાનુક્ત્વા આસનમાહ —

સ્થિરસુખમાસનમ્ ॥ સાધન ૪૬॥

વૃત્તિઃ — આસ્યતેઽનેનેત્યાસનં પદ્માસનદણ્ડાસનસ્વસ્તિકાસનાદિ ।
તદ્યદા સ્થિરં નિષ્કમ્પં સુખમનુદ્વેજનીયં ચ ભવતિ તદા
યોગાઙ્ગતાં ભજતે ॥ ૪૬॥

તસ્યૈવ સ્થિરસુખપ્રાપ્ત્યર્થમુપાયમાહ —

પ્રયત્નશૈથિલ્યાનન્ત્યસમાપત્તિભ્યામ્ ॥ સાધન ૪૭॥

વૃત્તિઃ — તદાસનં પ્રયત્નશૈથિલ્યેનાઽઽનન્ત્યસમાપત્ત્યા ચ
સ્થિરં સુખં ભવતીતિ સમ્બન્ધઃ । યદા યદાઽઽસનં બધ્નામીતિ
ઇચ્છાં કરોતિ પ્રયત્નશૈથિલ્યેઽપ્યક્લેશેનૈવ તદા તદાઽઽસનં
સમ્પદ્યતે । યદા ચાકાશાદિગત આનન્ત્યે ચેતસઃ સમાપત્તિઃ
ક્રિયતેઽવધાનેન [પા૦ અવ્યવધાનેન] તાદાત્મ્યમાપદ્યતે તદા
દેહાહંકારાભાવાન્નાસનં દુઃખજનકં ભવતિ । અસ્મિંશ્ચાસનજયે સતિ
સમાધ્યન્તરાયભૂતા ન પ્રભવન્ત્યઙ્ગમેજયત્વાદયઃ ॥ ૪૭॥

તસ્યૈવાનુનિષ્પાદિ ફલમાહ —

તતો દ્વન્દ્વાનભિઘાતઃ ॥ સાધન ૪૮॥

વૃત્તિઃ — તસ્મિન્નાસનજયે સતિ દ્વન્દ્વૈઃ
શીતોષ્ણક્ષુત્તૃષ્ણાદિભિર્યોગી નાભિહન્યત ઇત્યર્થઃ ॥ ૪૮॥

આસનજયાદનન્તરં પ્રાણાયામમાહ —

તસ્મિન્સતિ શ્વાસપ્રશ્વાસયોર્ગતિવિચ્છેદઃ પ્રાણાયામઃ ॥ સાધન ૪૯॥

વૃત્તિઃ — આસનસ્થૈર્યે સતિ તન્નિમિત્તકપ્રાણાયામલક્ષણો
યોગાઙ્ગવિશેષોઽનુષ્ઠેયો ભવતિ । કીદૃશઃ ।
સ્વાસપ્રશ્વાસયોર્ગતિવિચ્છેદલક્ષણઃ । શ્વાસપ્રશ્વાસૌ નિરુક્તૌ
(૧।૩૧) તયોસ્ત્રિધા રેચનસ્તમ્ભનપૂરણદ્વારેણ બાહ્યાભ્યન્તરેષુ

સ્થાનેષુ ગતેઃ પ્રવાહસ્ય વિચ્છેદો ધારણં પ્રાણાયામ ઉચ્યતે ॥ ૪૯॥

તસ્યૈવ સુખાવગમાય વિભજ્ય સ્વરૂપં કથયતિ —

સ તુ બાહ્યાભ્યન્તરસ્તમ્ભવૃત્તિર્દેશકાલસઙ્ખ્યાભિઃ પરિદૃષ્ટો
દીર્ઘસૂક્ષ્મઃ ॥ સાધન ૫૦॥

વૃત્તિઃ — બાહ્યવૃત્તિઃ શ્વાસો રેચકઃ । અન્તર્વૃત્તિઃ પ્રશ્વાસઃ
પૂરકઃ । આન્તરસ્તમ્ભવૃત્તિઃ કુમ્ભકઃ । તસ્મિન્ જલમિવ કુમ્ભે
નિશ્ચલતયા પ્રાણા અવસ્થાપ્યન્ત ઇતિ કુમ્ભકઃ । ત્રિવિધોઽયં પ્રાણાયામઃ
દેશેન કાલેન સંખ્યયા ચોપલક્ષિતો દીર્ઘસૂક્ષ્મસંજ્ઞો ભવતિ ।
દેશોપલક્ષિતો યથા નાસાદ્વાદશાન્તાદિ નાસામારભ્ય
દ્વાદશાઙ્ગુલિપર્યન્તમિત્યર્થઃ । કાલોપલક્ષિતો યથા
ષટ્ત્રિંશન્માત્રાદિપ્રમાણઃ । સંખ્યયોપલક્ષિતો યથા ઇયતો વારાન્ કૃત
એતાવદ્ભિઃ શ્વાસપ્રશ્વાસૈઃ પ્રથમ ઉદ્ઘાતો ભવતીતિ । એતજ્જ્ઞાનાય
સંખ્યાગ્રહણમુપાત્તમ્ । ઉદ્ઘાતો નામ નાભિમૂલાત્ પ્રેરિતસ્ય વાયોઃ
શિરસ્યભિહનનમ્ ॥ ૫૦॥

ત્રીન્ પ્રાણાયામાનભિધાય ચતુર્થમભિધાતુમાહ —

બાહ્યાભ્યન્તરવિષયાક્ષેપી ચતુર્થઃ ॥ સાધન ૫૧॥

વૃત્તિઃ — પ્રાણસ્ય બાહ્યો વિષયો નાસાદ્વાદશાન્તાદિઃ ।
આભ્યન્તરો વિષયો હૃદયનાભિચક્રાદિઃ । તૌ દ્વૌ
વિષયાવાક્ષિપ્ય પર્યાલોચ્ય યઃ સ્તમ્ભરૂપી ગતિવિચ્છેદઃ
સ ચતુર્થઃ પ્રાણાયામઃ । તૃતીયસ્માત્ કુમ્ભકાખ્યાદયમસ્ય
વિશેષઃ — સ બાહ્યાભ્યન્તરવિષયાવપર્યાલોચ્યૈવ સહસા
તપ્તોપલનિપતિતજલન્યાયેન યુગપત્ સ્તમ્ભવૃત્ત્યા નિષ્પાદ્યતે [પા૦
નિષ્પદ્યતે] । અસ્ય તુ વિષયદ્વયાક્ષેપકો નિરોધઃ । અયમપિ
પૂર્વવદ્દેશકાલસંખ્યાભિરુપલક્ષિતો દ્રષ્ટવ્યઃ ॥ ૫૧॥

ચતુર્વિધસ્યાસ્ય ફલમાહ —

તતઃ ક્ષીયતે પ્રકાશાવરણમ્ ॥ સાધન ૫૨॥

વૃત્તિઃ — તતસ્તસ્માત્ પ્રાણાયામાત્ પ્રકાશસ્ય ચિત્તસત્ત્વગતસ્ય
યદાવરણં ક્લેશરૂપં તત્ ક્ષીયતે વિનશ્યતીત્યર્થઃ ॥ ૫૨॥

ફલાન્તરમાહ —

ધારણાસુ ચ યોગ્યતા મનસઃ ॥ સાધન ૫૩ ॥

વૃત્તિઃ — ધારણા વક્ષ્યમાણલક્ષણાસ્તાસુ પ્રાણાયામૈઃ ક્ષીણદોષં મનો યત્ર યત્ર ધાર્યતે તત્ર તત્ર સ્થિરીભવતિ ન વિક્ષેપં ભજતે ॥ ૫૩ ॥

પ્રત્યાહારસ્ય લક્ષણમાહ —

સ્વવિષયાસમ્પ્રયોગે ચિત્તસ્વરૂપાનુકાર ઇવેન્દ્રિયાણાં પ્રત્યાહારઃ ॥ સાધન ૫૪ ॥

વૃત્તિઃ — ઇન્દ્રિયાણિ વિષયેભ્યઃ પ્રતીપમાહ્રિયન્તેઽસ્મિન્નિતિ પ્રત્યાહારઃ । સ ચ કથં નિષ્પદ્યત ઇત્યાહ — ચક્ષુરાદીનામિન્દ્રિયાણાં સ્વવિષયો રૂપાદિસ્તેન સમ્પ્રયોગસ્તદાભિમુખ્યેન વર્તનમ્ તદભાવસ્તદાભિમુખ્યં પરિત્યજ્ય સ્વરૂપમાત્રેઽવસ્થાનમ્ । તસ્મિન્ સતિ ચિત્તમાત્રાનુકારિણીન્દ્રિયાણિ ભવન્તિ યતશ્ચિત્તમનુવર્તમાનાનિ મધુકરરાજમિવ મક્ષિકાઃ સર્વાણીન્દ્રિયાણિ પ્રતીયન્તે । અતશ્ચિત્તનિરોધે તાનિ પ્રત્યાહૃતાનિ ભવન્તિ । તેષાં તત્સ્વરૂપાનુકારઃ પ્રત્યાહાર ઉક્તઃ ॥ ૫૪ ॥

પ્રત્યાહારફલમાહ —

તતઃ પરમા વશ્યતેન્દ્રિયાણામ્ ॥ સાધન ૫૫ ॥

વૃત્તિઃ — અભ્યસ્યમાને હિ પ્રત્યાહારે તથા વશ્યાન્યાયત્તાનીન્દ્રિયાણિ સમ્પદ્યન્તે યથા બાહ્યવિષયાભિમુખતાં નીયમાનાન્યપિ ન યાન્તીત્યર્થઃ ॥ ૫૫ ॥

તદેવં પ્રથમપાદોક્તલક્ષણસ્ય યોગસ્યાઙ્ગભૂતક્લેશતનૂકરણફલં ક્રિયાયોગમભિધાય ક્લેશાનામુદ્દેશં સ્વરૂપં કારણં ક્ષેત્રં ફલં ચોક્ત્વા કર્મણામપિ ભેદં કારણં સ્વરૂપં ફલં ચાભિધાય વિપાકસ્ય કારણમ્ સ્વરૂપં ચાભિહિતમ્ । તતસ્ત્યાજ્યત્વાત્ ક્લેશાદિનાં જ્ઞાનવ્યતિરેકેણ ત્યાગસ્યાઽશક્યત્વાજ્જ્ઞાનસ્ય ચ શાસ્ત્રાયત્તત્વાત્ શાસ્ત્રસ્ય હેયહાનકારણોપાદેયોપાદાનકારણબોધકત્વેન ચતુર્વ્યૂહત્વાત્ હેયસ્ય હાનવ્યતિરેકેણ સ્વરૂપાનિષ્પત્તેર્હાનસહિતં ચતુર્વ્યૂહં સ્વસ્વકારણસહિતમભિધાય ઉપાદેયકારણભૂતાયા વિવેકખ્યાતેઃ કારણભૂતાનામન્તરઙ્ગબહિરઙ્ગભાવેન સ્થિતાનાં યમાદીનાં સ્વરૂપં ફલસહિતં વ્યાકૃત્ય આસનાદીનાં ધારણાપર્યન્તાનાં

પરસ્પરમુપકાર્યોપકારકભાવેનાવસ્થિતાનામુદ્દેશમભિધાય પ્રત્યેકં
લક્ષણકરણપૂવકં ફલમભિહિતમ્ ।
તદયં યોગો યમનિયમાદિભિઃ પ્રાપ્તબીજભાવ આસનપ્રાણાયામૈરઙ્કુરિતઃ
પ્રત્યાહારેણ પુષ્પિતો ધ્યાનધારણાસમાધિભિઃ ફલિષ્યતીતિ વ્યાખ્યાતઃ
સાધનપાદઃ ।
ઇતિ ધારેશ્વરભોજવિરચિતાયાં રાજમાર્તણ્ડાભિધાયાં પાતઞ્જલવૃત્તૌ
સાધનપાદઃ ॥ ૨॥

ઇતિ સાધનપાદઃ ॥ ૨॥

અથ વિભૂતિપાદઃ ॥ ૩॥

યત્પાદપદ્મસ્મરણાદણિમાદિવિભૂતયઃ ।
ભવન્તિ ભવિનામસ્તુ ભૂતનાથઃ સ ભૂતયે ॥

તદેવં પૂર્વોદ્દિષ્ટં ધારણાદ્યઙ્ગત્રયં નિર્ણેતું
સંયમસંજ્ઞાભિધાનપૂર્વકં બાહ્યાભ્યન્તરાદિસિદ્ધિપ્રતિપાદનાય
લક્ષયિતુમુપક્રમતે । તત્ર ધારણાયાઃ સ્વરૂપમાહ —

દેશબન્ધશ્ચિત્તસ્ય ધારણા ॥ વિભૂતિ ૧॥

વૃત્તિઃ — દેશે નાભિચક્રનાસાગ્રાદૌ ચિત્તસ્ય બન્ધો
વિષયાન્તરપરિહારેણ યત્ સ્થિરીકરણં સા ચિત્તસ્ય ધારણોચ્યતે ।
અયમર્થઃ — મૈત્ર્યાદિચિત્તપરિકર્મવાસિતાન્તઃકરણેન
યમનિયમવતા જિતાસનેન પરિહૃતપ્રાણવિક્ષેપેણ
પ્રત્યાહૃતેન્દ્રિયગ્રામેણ નિર્બાધે પ્રદેશ ઋજુકાયેન જિતદ્વન્દ્વેન
યોગિના નાસાગ્રાદૌ સમ્પ્રજ્ઞાતસ્ય સમાધેરભ્યાસાય ચિત્તસ્ય
સ્થિરીકરણં કર્તવ્યમિતિ ॥ ૧॥

ધારણામભિધાય ધ્યાનમભિધાતુમાહ —

તત્ર પ્રત્યયૈકતાનતા ધ્યાનમ્ ॥ વિભૂતિ ૨॥

વૃત્તિઃ — તત્ર તસ્મિન્ પ્રદેશે યત્ર ચિત્તં ધૃતં તત્ર
પ્રત્યયસ્ય જ્ઞાનસ્ય યા એકતાનતા વિસદૃશપરિણામપરિહારદ્વારેણ
યદેવ ધારણાયામવલમ્બનીકૃતં તદવલમ્બનતયૈવ નિરન્તરમુત્પત્તિઃ
સા ધ્યાનમુચ્યતે ॥ ૨॥

ચરમયોગાઙ્ગં સમાધિમાહ —

તદેવાર્થમાત્રનિર્ભાસં સ્વરૂપશૂન્યમિવ સમાધિઃ ॥ વિભૂતિ ૩ ॥

વૃત્તિઃ — તદેવોક્તલક્ષણં ધ્યાનં
યત્રાર્થમાત્રનિર્ભાસમર્થાકારસમાવેશાદુદ્ભૂતાર્થરૂપં
ન્યગ્ભૂતજ્ઞાનસ્વરૂપત્વેન સ્વરૂપશૂન્યતામિવાઽઽપદ્યતે સ
સમાધિરિત્યુચ્યતે । સમ્યગાધીયત એકાગ્રીક્રિયતે વિક્ષેપાન્ પરિહૃત્ય
મનો યત્ર સ સમાધિઃ ॥ ૩ ॥

ઉક્તલક્ષણસ્ય યોગાઙ્ગત્રયસ્ય વ્યવહારાય સ્વશાસ્ત્રે તાન્ત્રિકીં સંજ્ઞાં
કર્તુમાહ —

ત્રયમેકત્ર સંયમઃ ॥ વિભૂતિ ૪ ॥

વૃત્તિઃ — એકસ્મિન્ વિષયે ધારણાધ્યાનસમાધિત્રયં પ્રવર્તમાનં
સંયમસંજ્ઞયા શાસ્ત્રે વ્યવહ્રિયતે ॥ ૪ ॥

તસ્ય ફલમાહ —

તજ્જયાત્પ્રજ્ઞાલોકઃ ॥ વિભૂતિ ૫ ॥

વૃત્તિઃ — તસ્ય સંયમસ્ય જયાદભ્યાસેન સાત્મ્યોત્પાદનાત્
પ્રજ્ઞાયા વિવેકખ્યાતેરાલોકઃ પ્રસવો ભવતિ । પ્રજ્ઞા જ્ઞેયં
સમ્યગવભાસયતીત્યર્થઃ ॥ ૫ ॥

તસ્યોપયોગમાહ —

તસ્ય ભૂમિષુ વિનિયોગઃ ॥ વિભૂતિ ૬ ॥

વૃત્તિઃ — તસ્ય સંયમસ્ય ભૂમિષુ સ્થૂલસૂક્ષ્માવલમ્બનભેદેન
સ્થિતાસુ ચિત્તવૃત્તિષુ વિનિયોગઃ કર્તવ્યઃ । અધરામધરાં
ચિત્તભૂમિં જિતાં જિતાં જ્ઞાત્વોત્તરસ્યાં ભૂમૌ સંયમઃ કાર્યઃ ।
સ હ્યનાત્મીઈકૃતાધરભૂમિરુત્તરસ્યાં ભૂમૌ સંયમં કુર્વાણઃ
ફલભાગ્ભવતિ ॥ ૬ ॥

સાધનપાદે યોગાઙ્ગાન્યષ્ટાવુદ્દિશ્ય પઞ્ચાનાં લક્ષણં વિધાય ત્રયાણાં
કથં ન કૃતમિત્યાશઙ્ક્યાહ —

ત્રયમન્તરઙ્ગં પૂર્વેભ્યઃ ॥ વિભૂતિ ૭ ॥

વૃત્તિઃ — પૂર્વેભ્યો યમાદિભ્યો યોગાઙ્ગેભ્યઃ પારમ્પર્યેણ

સમાધેરુપકારકેભ્યો ધારણાદિયોગાઙ્ગત્રયં સમ્પ્રજ્ઞાતસ્ય
સમાધેરન્તરઙ્ગં સમાધિસ્વરૂપનિષ્પાદનાત્ ॥ ૭॥

તસ્યાપિ સમાધ્યન્તરાપેક્ષયા બહિરઙ્ગત્વમાહ —

તદપિ બહિરઙ્ગં નિર્બીજસ્ય ॥ વિભૂતિ ૮॥

વૃત્તિઃ — નિર્બીજસ્ય નિરાલમ્બનસ્ય શૂન્યભાવનાઽપરપર્યાયસ્ય
સમાધેરેતદપિ યોગાઙ્ગત્રયં બહિરઙ્ગં પારમ્પર્યેણોપકારકત્વાત્ ॥ ૮॥

ઇદાનીં યોગસિદ્ધીર્વ્યાખ્યાતુકામઃ સંયમસ્ય વિષયવિશુદ્ધિં કર્તું
ક્રમેણ પરિણામત્રયમાહ —

વ્યુત્થાનનિરોધસંસ્કારયોરભિભવપ્રાદુર્ભાવૌ નિરોધક્ષણચિત્તાન્વયો
નિરોધપરિણામઃ ॥ વિભૂતિ ૯॥

વૃત્તિઃ — વ્યુત્થાનં ક્ષિપ્તમૂઢવિક્ષિપ્તાખ્યં
ભૂમિત્રયમ્ । નિરોધઃ પ્રકૃષ્ટસત્ત્વસ્યાઙ્ગિતયા ચેતસઃ
પરિણામઃ । તાભ્યાં વ્યુત્થાનનિરોધાભ્યાં યૌ જનિતૌ સંસ્કારૌ
તયોર્યથાક્રમમ્ અભિભવપ્રાદુર્ભાવૌ યદા ભવતઃ । અભિભવો
ન્યગ્ભૂતતયા કાર્યકરણાસામર્થ્યેનાવસ્થાનમ્ । પ્રાદુર્ભાવો
વર્તમાનેઽધ્વન્યભિવ્યક્તરૂપતયાઽઽવિર્ભાબઃ । તદા નિરોધક્ષણે
ચિત્તસ્યોભયક્ષણવૃત્તિત્વાદન્વયો યઃ સ નિરોધપરિણામ ઉચ્યતે ।
અયમર્થઃ — યદા વ્યુત્થાનસસ્કારરૂપો ધર્મસ્તિરોભૂતો
ભવતિ નિરોધસંસ્કારરૂપશ્ચાવિર્ભવતિ ધર્મિરૂપતયા ચ
ચિત્તમુભયાન્વયિત્વેઽપિ નિરોધાત્મનાઽવસ્થિતં પ્રતીયતે તદા સ
નિરોધપરિણામશબ્દેન વ્યવહ્રિયતે । ચલત્વાદ્ગુણવૃત્તસ્ય યદ્યપિ
ચેતસો નિશ્ચલત્વં નાસ્તિ તથાપ્યેવમ્ભૂતઃ પરિણામઃ સ્થૈર્યમુચ્યતે ॥ ૯॥

તસ્યૈવ ફલમાહ —

તસ્ય પ્રશાન્તવાહિતા સંસ્કારાત્ ॥ વિભૂતિ ૧૦॥

વૃત્તિઃ — તસ્ય ચેતસો નિરુક્તાન્નિરોધસંસ્કારાત્ પ્રશાન્તવાહિતા
ભવતિ । પરિહૃતવિક્ષેપતયા સદૃશપ્રવાહપરિણામિ ચિત્તં
ભવતીત્યર્થઃ ॥ ૧૦॥

નિરોધપરિણામમભિધાય સમાધિપરિણામમાહ —

સર્વાર્થતૈકાગ્રતયોઃ ક્ષયોદયૌ ચિત્તસ્ય સમાધિપરિણામઃ ॥ વિભૂતિ ૧૧ ॥

વૃત્તિઃ — સર્વાર્થતા ચલત્વાન્નાનાવિધાર્થગ્રહણં ચિત્તસ્ય વિક્ષેપો ધર્મઃ । એકસ્મિન્નેવાલમ્બને સદૃશપરિણામિતૈકાગ્રતા । સાઽપિ ચિત્તસ્ય ધર્મઃ । તયોર્યથાક્રમં ક્ષયોદયૌ સર્વાર્થતાલક્ષણસ્ય ધર્મસ્ય ક્ષયોઽત્યન્તાભિભવ એકાગ્રતાલક્ષણસ્ય ધર્મસ્ય પ્રાદુર્ભાવોઽભિવ્યક્તિશ્ચિત્તસ્યોદ્રિક્તસત્ત્વસ્યાન્વયિતયાઽવસ્થાનં સમાધિપરિણામ ઇત્યુચ્યતે ।
પૂર્વસ્માત્ પરિણામાદસ્યાયં વિશેષઃ — તત્ર સંસ્કારલક્ષણયોઃ ધર્મયોરભિભવપ્રાદુર્ભાવૌ પૂર્વસ્ય વ્યુત્થાનસંસ્કારરૂપસ્ય ન્યગ્ભાવ ઉત્તરસ્ય નિરોધસંસ્કારરૂપસ્યોદ્ભવોઽનભિભૂતત્વેનાવસ્થાનમ્ । ઇહ તુ ક્ષયોદયાવિતિ સર્વાત્મતારૂપસ્ય વિક્ષેપસ્યાત્યન્તતિરસ્કારાદનુત્પત્તિરતીતેઽધ્વનિ પ્રવેશઃ ક્ષય એકાગ્રતાલક્ષણસ્ય ધર્મસ્યોદ્ભવો વર્તમાનેઽધ્વનિ પ્રકટત્વમ્ ॥ ૧૧ ॥

તૃતીયમેકાગ્રતાપરિણામમાહ —

શાન્તોદિતૌ તુલ્યપ્રત્યયૌ ચિત્તસ્યૈકાગ્રતાપરિણામઃ ॥ વિભૂતિ ૧૨ ॥

વૃત્તિઃ — સમાહિતસ્યૈવ ચિત્તસ્યૈકપ્રત્યયો વૃત્તિવિશેષઃ શાન્તોઽતીતમધ્વાનં પ્રવિષ્ટઃ । અપરસ્તૂદિતો વર્તમાનેઽધ્વનિ સ્ફુરિતઃ । દ્વાવપિ સમાહિતચિત્તત્વેન તુલ્યાવેકરૂપાલમ્બનત્વેન સદૃશૌ પ્રત્યયૌ । ઉભયત્રાપિ સમાહિતસ્યૈવ ચિત્તસ્યાન્વયિત્વેનાવસ્થાનમ્ । સ એકાગ્રતાપરિણામ ઇત્યુચ્યતે ॥ ૧૨ ॥

ચિત્તપરિણામોક્તં રૂપમન્યત્રાપ્યતિદિશન્નાહ —

એતેન ભૂતેન્દ્રિયેષુ ધર્મલક્ષણાવસ્થાપરિણામા વ્યાખ્યાતાઃ ॥ વિભૂતિ ૧૩ ॥

વૃત્તિઃ — એતેન ત્રિવિધેનોક્તેન ચિત્તપરિણામેન ભૂતેષુ સ્થૂલસૂક્ષ્મેષ્વિન્દ્રિયેષુ બુદ્ધિકર્માન્તઃકરણભેદેનાવસ્થિતેષુ ધર્મલક્ષણાવસ્થાભેદેન ત્રિવિધઃ પરિણામો વ્યાખ્યાતોઽવગન્તવ્યઃ । અવસ્થિતસ્ય ધર્મિણઃ પૂર્વધર્મનિવૃત્તૌ ધર્માન્તરાપત્તિર્ધર્મપરિણામઃ । યથા — મૃલ્લક્ષણસ્ય ધર્મિણઃ પિણ્ડરૂપધર્મપરિત્યાગેન ઘટરૂપધર્માન્તરસ્વીકારો

ધર્મપરિણામ ઇત્યુચ્યતે । લક્ષણપરિણામો યથા —
તસ્યૈવ ઘટસ્યાનાગતાધ્વપરિત્યાગેન વર્તમાનાધ્વસ્વીકારઃ ।
તત્પરિત્યાગેનાતીતાધ્વપરિગ્રહઃ । અવસ્થાપરિણામો યથા — તસ્યૈવ
ઘટસ્ય પ્રથમદ્વિતીયયોઃ સદૃશયોઃ કાલલક્ષણયોરન્વયિત્વેન ।
યતશ્ચ ગુણવૃત્તિર્નાઽપરિણમ્યમાના ક્ષણમપ્યસ્તિ ॥ ૧૩ ॥

નનુ કોઽયં ધર્મીત્યાશઙ્ક્ય ધર્મિણો લક્ષણમાહ —

શાન્તોદિતાવ્યપદેશ્યધર્માનુપાતી ધર્મી ॥ વિભૂતિ ૧૪ ॥

વૃત્તિઃ — શાન્તા યે કૃતસ્વસ્વવ્યાપારા અતીતેઽધ્વનિ અનુપ્રવિષ્ટાઃ ।
ઉદિતા ય અનાગતમધ્વાનં પરિત્યજ્ય વર્તમાનેઽધ્વનિ સ્વવ્યાપારં
કુર્વન્તિ । અવ્યપદેશ્યા યે શક્તિરૂપેણ સ્થિતા વ્યપદેષ્ટું
ન શક્યન્તે । તેષાં યથાસ્વં સર્વાત્મકત્વમિત્યેવમાદયો
નિયતકાર્યકારણરૂપયોગ્યતયાવચ્છિન્ના શક્તિરેવેહ
ધર્મશબ્દેનાભિધીયતે ।
તં ત્રિવિધમપિ ધર્મં યોઽનુપતત્યનુવર્તતેઽન્વયિત્વેન સ્વીકરોતિ
સ શાન્તોદિતાવ્યપદેશ્યધર્માનુપાતી ધર્મીત્યુચ્યતે । યથા —
સુવર્ણં રુચકરૂપધર્મપરિત્યાગેન સ્વસ્તિકરૂપધર્માન્તરપરિગ્રહે
સુવર્ણરૂપતયાઽનુવર્તમાનં તેષુ ધર્મેષુ કથંચિદ્ભિન્નેષુ
ધર્મિરૂપતયા સામાન્યાત્મના ધર્મરૂપતયા વિશેષાત્મના
સ્થિતમન્વયિત્વેનાવભાસતે ॥ ૧૪ ॥

એકસ્ય ધર્મિણઃ કથમનેકે પરિણામા ઇત્યાશઙ્કામપનેતુમાહ —

ક્રમાન્યત્વં પરિણામાન્યત્વે હેતુઃ ॥ વિભૂતિ ૧૫ ॥

વૃત્તિઃ — ધર્માણામુક્તલક્ષણાનાં યઃ ક્રમસ્તસ્ય યત્
પ્રતિક્ષણમન્યત્વં પરિદૃશ્યમાનં પરિણામસ્યોક્તલક્ષણસ્યાન્યત્વે
નાનાવિધત્વે હેતુર્લિઙ્ગં જ્ઞાપકં ભવતિ । અયમર્થઃ — યોઽયં
નિયતઃ ક્રમો મૃચ્ચૂર્ણાન્મૃત્પિણ્ડસ્તતઃ કપાલાનિ તેભ્યશ્ચ ઘટ
ઇત્યેવં ક્રમરૂપઃ પરિદૃશ્યમાનઃ પરિણામસ્યાઽન્યત્વમાવેદયતિ ।
તસ્મિન્નેવ ધર્મિણિ યો લક્ષણપરિણામસ્યાઽવસ્થાપરિણામસ્ય ચ
ક્રમઃ સોઽપ્યનેનૈવ ન્યાયેન પરિણામાન્યત્વે ગમકોઽવગન્તવ્યઃ ।
સર્વ એવ ભાવા નિયતેનૈવ ક્રમેણ પ્રતિક્ષણં પરિણમ્યમાનાઃ
પરિદૃશ્યન્તે । અતઃ સિદ્ધં ક્રમાન્યત્વાત્ પરિણામાન્યત્વમ્ । સર્વેષાં

ચિત્તાદીનાં પરિણમમાનાનાં કેચિદ્ધર્માઃ પ્રત્યક્ષેણૈવોપલભ્યન્તે ।
યથા સુખાદયઃ સંસ્થાનાદયશ્ચ । કેચિદેકાન્તેનાનુમાનગમ્યાઃ । યથા
ધર્મસંસ્કારશક્તિપ્રભૃતયઃ । ધર્મિણશ્ચ ભિન્નાભિન્નરૂપતયા
સર્વત્રાનુગમઃ ॥ ૧૫॥

ઇદાનીમુક્તસ્ય સંયમસ્ય વિષયપ્રદર્શનદ્વારેણ સિદ્ધીઃ
પ્રતિપાદયિતુમાહ —

પરિણામત્રયસંયમાદતીતાનાગતજ્ઞાનમ્ ॥ વિભૂતિ ૧૬॥

વૃત્તિઃ — ધર્મલક્ષણાવસ્થાભેદેન યત્ પરિણામત્રયમુક્તં તત્ર
સંયમાત્ તસ્મિન્ વિષયે પૂર્વોક્તસંયમસ્ય કરણાદતીતાનાગતજ્ઞાનં
યોગિનઃ સમાધેર્ભવતિ ।
ઇદમત્ર તાત્પર્યમ્ — અસ્મિન્ ધર્મિણ્યયં ધર્મ ઇદં
લક્ષણમિયમવસ્થા ચાઽનાગતાદધ્વનઃ સમેત્ય વર્તમાનેઽધ્વનિ
સ્વવ્યાપારં વિધાયાતીતમધ્વાનં પ્રવિશતીત્યેવં પરિહૃતવિક્ષેપતયા
યદા સંયમં કરોતિ તદા યત્કિંચિદનુત્પન્નમતિક્રાન્તં વા તત્
સર્વં યોગી જાનાતિ । યતશ્ચિત્તસ્ય શુદ્ધસત્ત્વપ્રકાશરૂપત્વાત્
સર્વાર્થગ્રહણસામર્થ્યમવિદ્યાદિભિર્વિક્ષેપૈરપક્રિયતે । યદા તુ
તૈસ્તૈરુપાયૈર્વિક્ષેપાઃ પરિહ્રિયન્તે તદા નિવૃત્તમલસ્યેવાદર્શસ્ય
સર્વાર્થગ્રહણસામર્થ્યમેકાગ્રતાબલાદાવિર્ભવતિ ॥ ૧૬॥

સિદ્ધ્યન્તરમાહ —

શબ્દાર્થપ્રત્યયાનામિતરેતરાધ્યાસાત્સઙ્કરસ્તત્પ્રવિભાગસંયમાત્સર્વભૂતરુતજ્ઞાનમ્ ॥ વિભૂતિ ૧૭॥

વૃત્તિઃ — શબ્દઃ શ્રોત્રેન્દ્રિયગ્રાહ્યો નિયતક્રમવર્ણાત્મા
નિયતૈકાર્થપ્રતિપત્ત્યવચ્છિન્નઃ । યદિ વા ક્રમરહિતસ્ફોટાત્મા
શાસ્ત્રસંસ્કૃતબુદ્ધિગ્રાહ્યઃ [પા૦ ધ્વનિસંસ્કૃતબુદ્ધિગ્રાહ્યઃ] ।
ઉભયથાઽપિ પદરૂપો વાક્યરૂપશ્ચ તયોરેકાર્થપ્રતિપત્તૌ સામર્થ્યાત્ ।
અર્થો જાતિગુણક્રિયાદિઃ । પ્રત્યયો જ્ઞાનં વિષયાકારા બુદ્ધિવૃત્તિઃ ।
એષાં શબ્દાર્થજ્ઞાનાનાં વ્યવહારે ઇતરેતરાધ્યાસાદ્ભિન્નાનામપિ
બુદ્ધ્યેકરૂપતાસમ્પાદનાત્ સંકીર્ણત્વમ્ । તથાહિ — ગામાનયેત્યુક્તે
કશ્ચિદ્ગોલક્ષણમર્થં ગોત્વજાત્યવચ્છિન્નં સાસ્નાદિમત્ પિણ્ડરૂપં
શબ્દં ચ તદ્વાચકં જ્ઞાનં ચ તદ્ગ્રાહકમભેદેનૈવાધ્યવસ્યતિ
ન ત્વસ્ય ગોશબ્દો વાચકોઽયં ગોશબ્દસ્ય વાચ્યસ્તયોરિદં ગ્રાહકં

જ્ઞાનમિતિ ભેદેન વ્યવહરતિ । તથાહિ — કોઽયમર્થઃ કોઽયં શબ્દઃ કિમિદં જ્ઞાનમિતિ પૃષ્ટઃ સર્વત્રૈકરૂપમેવોત્તરં દદાતિ ગૌરિતિ । સ યદ્યેકરૂપતાં ન પ્રતિપદ્યતે કથમેકરૂપમુત્તરં પ્રયચ્છતિ ।
એવં તસ્મિન્નવસ્થિતે યોઽયં [પા૦ એકસ્મિન્ વિષયે યોઽયમ્ । એતસ્મિન્ સ્થિતે યોઽયમ્ વા] પ્રવિભાગ ઇદં શબ્દસ્ય તત્ત્વં યદ્વાચકત્વં નામ ઇદમર્થસ્ય યદ્વાચ્યત્વમિદં જ્ઞાનસ્ય યત્ પ્રકાશકત્વમિતિ પ્રવિભાગં વિધાય તસ્મિન્ પ્રવિભાગે યઃ સંયમં કરોતિ તસ્ય સર્વેષાં ભૂતાનાં મૃગપક્ષિસરીસૃપાદીનાં યદ્રુતં યઃ શબ્દસ્તત્ર જ્ઞાનમુત્પદ્યતે । અનેનૈવાભિપ્રાયેણ તેન પ્રાણિનાયં શબ્દઃ સમુચ્ચારિત ઇતિ સર્વં જાનાતિ ॥ ૧૭ ॥

સિદ્ધ્યન્તરમાહ —

સંસ્કારસાક્ષાત્કરણાત્પૂર્વજાતિજ્ઞાનમ્ ॥ વિભૂતિ ૧૮ ॥

વૃત્તિઃ — દ્વિવિધાશ્ચિત્તસ્ય વાસનારૂપાઃ સંસ્કારાઃ । કેચિત્ સ્મૃતિમાત્રોત્પાદનફલાઃ કેચિજ્જાત્યાયુર્ભોગલક્ષણા વિપાકહેતવો યથા ધર્માધર્માખ્યાઃ । તેષુ સંસ્કારેષુ યદા સંયમં કરોતિ એવં મયા સોઽર્થોઽનુભૂત એવં મયા સા ક્રિયા નિષ્પાદિતેતિ પૂર્વવૃત્તમનુસન્દધાનો ભાવયન્નેવ પ્રબોધકમન્તરેણોદ્બુદ્ધસંસ્કારઃ સર્વમતીતં સ્મરતિ । ક્રમેણ સાક્ષાત્કૃતેષૂદ્બુદ્ધેષુ સંસ્કારેષુ પૂર્વજન્માન્તરાનુભૂતાનપિ જાત્યાદીન્ પ્રત્યક્ષેણ પશ્યતિ ॥ ૧૮ ॥

સિદ્ધ્યન્તરમાહ —

પ્રત્યયસ્ય પરચિત્તજ્ઞાનમ્ ॥ વિભૂતિ ૧૯ ॥

વૃત્તિઃ — પ્રત્યયસ્ય પરચિત્તસ્ય કેનચિન્મુખરાગાદિના લિઙ્ગેન ગૃહીતસ્ય યદા સંયમં કરોતિ તદા પરકીયચિત્તસ્ય જ્ઞાનમુત્પદ્યતે સરાગમસ્ય ચિત્તં વીતરાગં વેતિ । પરચિત્તગતાન્ સર્વાનપિ ધર્માન્ જાનાતીત્યર્થઃ ॥ ૧૯ ॥

અસ્યૈવ પરચિત્તજ્ઞાનસ્ય વિશેષજ્ઞાનમાહ —

ન ચ તત્સાલમ્બનં તસ્યાવિષયીભૂતત્વાત્ ॥ વિભૂતિ ૨૦ ॥

વૃત્તિઃ — તસ્ય પરસ્ય યચ્ચિત્તં તત્ સાલમ્બનં
સ્વકીયેનાઽઽલમ્બનેન સહિતં ન શક્યતે જ્ઞાતુમાલમ્બનસ્ય
કેનચિલ્લિઙ્ગેનાવિષયીકૃતત્વાત્ ‌। લિઙ્ગાદ્ધિ ચિત્તમાત્રં પરસ્યાવગતં
ન તુ નીલવિષયમસ્ય ચિત્તં પીતવિષયમિતિ વા ।
યચ્ચ ન ગૃહીતં તત્ર સંયમસ્ય કર્તુમશક્યત્વાન્ન ભવતિ
પરચિત્તસ્ય યો વિષયસ્તત્ર જ્ઞાનમ્ ‌। તસ્માત્ પરકીયચિત્તં
નાઽઽલમ્બનસહિતં ગૃહ્યતે તસ્યાઽઽલમ્બનસ્યાઽગૃહીતત્વાત્ ।
ચિત્તધર્માઃ પુનર્ગૃહ્યન્ત એવ । યદા તુ કિમનેનાઽઽલમ્બિતમિતિ
પ્રણિધાનં કરોતિ તદા તત્સંયમાત્તદ્વિષયમપિ જ્ઞાનમુત્પદ્યત એવ ॥ ૨૦॥

સિદ્ધ્યન્તરમાહ —

કાયરૂપસંયમાત્તદ્ગ્રાહ્યશક્તિસ્તમ્ભે
ચક્ષુષ્પ્રકાશાસંયોગેઽન્તર્ધાનમ્ ॥ વિભૂતિ ૨૧॥

વૃત્તિઃ — કાયઃ શરીરં તસ્ય રૂપં ચક્ષુર્ગ્રાહ્યો
ગુણસ્તસ્મિન્નસ્ત્યસ્મિન્ કાયે રૂપમિતિ સંયમાત્તસ્ય રૂપસ્ય
ચક્ષુર્ગ્રાહ્યત્વરૂપા યા શક્તિસ્તસ્યાઃ સ્તમ્ભે ભાવનાવશાત્ પ્રતિબન્ધે
ચક્ષુષ્પ્રકાશાસંયોગે ચક્ષુષઃ પ્રકાશઃ સત્ત્વધર્મસ્તસ્યાઽસંયોગે
તદ્ગ્રહણવ્યાપારાભાવે યોગિનોઽન્તર્ધાનં ભવતિ । ન કેનચિદસૌ
દૃશ્યત ઇત્યર્થઃ । એતેનૈવ રૂપાન્તર્ધાનોપાયપ્રદર્શનેન શબ્દાદીનાં
શ્રોત્રાદિગ્રાહ્યાણામન્તર્ધાનમુક્તં વેદિતવ્યમ્ ॥ ૨૧॥

સિદ્ધ્યન્તરમાહ —

સોપક્રમં નિરુપક્રમં ચ કર્મ તત્સંયમાદપરાન્તજ્ઞાનમરિષ્ટેભ્યો
વા ॥ વિભૂતિ ૨૨॥

વૃત્તિઃ — આયુર્વિપાકં યત્ પૂર્વકૃતં કર્મ તદ્વિપ્રકારં
સોપક્રમં નિરુપક્રમં ચ । તત્ર સોપક્રમં યત્ ફલજનનાય
સહોપક્રમેણ કાર્યકરણાભિમુખ્યેન વર્તતે યથોષ્ણપ્રદેશે
પ્રસારિતાર્દ્રવાસઃ શીઘ્રમેવ શુષ્યતિ । ઉક્તવિપરીતં નિરુપક્રમં
યથા તદેવાર્દ્રવાસઃ સંવર્તિતમનુષ્ણપ્રદેશે ચિરેણ શુષ્યતિ ।
તસ્મિન્ દ્વિવિધે કર્મણિ યઃ સંયમં કરોતિ —
કિં મમ કર્મ શીઘ્રવિપાકં ચિરવિપાકં વા —
એવં ધ્યાનદાર્ઢ્યાદપરાન્તજ્ઞાનમસ્યોત્પદ્યતે । અપરાન્તઃ

શરીરવિયોગસ્તસ્મિઞ્જ્ઞાનમમુષ્મિન્ કાલેઽમુષ્મિન્ દેશે મમ
શરીરવિયોગો ભવિષ્યતીતિ નિઃસંશયં જાનાતિ ।
અરિષ્ટેભ્યો વા । અરિષ્ટાનિ ત્રિવિધાનિ । આધ્યાત્મિકાધિભૌતિકાધિદૈવિકાનિ ।
તત્રાધ્યાત્મિકાનિ — પિહિતકરણઃ કોષ્ઠ્યસ્ય
વાયોર્ઘોષં ન શ઼ૃણોતીત્યેવમાદીનિ । આધિભૌતિકાનિ —
અકસ્માદ્વિકૃતપુરુષદર્શનાદીનિ । આધિદૈવિકાનિ — અકાણ્ડ
એવ દ્રષ્ટુમશક્યાનિ સ્વર્ગાદિપદાર્થદર્શનાદીનિ । તેભ્યઃ
શરીરવિયોગકાલં જાનાતિ ।
યદ્યપ્યયોગિનામપ્યરિષ્ટેભ્યઃ પ્રાયેણ તજ્જ્ઞાનમુત્પદ્યતે તથાપિ
તેષાં સામાન્યાકારેણ તત્ સંશયરૂપં યોગિનાં પુનર્નિયતદેશકાલતયા
પ્રત્યક્ષવદવ્યભિચારિ ॥ ૨૨॥

પરિકર્મનિષ્પાદિતાઃ સિદ્ધીઃ પ્રતિપાદયિતુમાહ —

મૈત્ર્યાદિષુ બલાનિ ॥ વિભૂતિ ૨૩॥

વૃત્તિઃ — મૈત્રીકરુણામુદિતોપેક્ષાસુ યો
વિહિતસંયમસ્તદ્બલાનિ તાસાં મૈત્ર્યાદીનાં સમ્બન્ધીનિ પ્રાદુર્ભવન્તિ ।
મૈત્રીકરુણામુદિતોપેક્ષાસ્તથાઽસ્ય પ્રકર્ષં ગચ્છન્તિ યથા સર્વસ્ય
મિત્રત્વાદિકમયૂઽ પ્રતિપદ્યતે ॥ ૨૩॥

સિદ્ધ્યન્તરમાહ —

બલેષુ હસ્તિબલાદીનિ ॥ વિભૂતિ ૨૪॥

વૃત્તિઃ — હસ્ત્યાદિસમ્બન્ધિષુ બલેષુ કૃતસંયમસ્ય
તદ્બલાનિ હસ્ત્યાદિબલાન્યાવિર્ભવન્તિ । તદયમર્થઃ —
યસ્મિન્ હસ્તિબલે વાયુવેગે સિંહવીર્યે વા તન્મયીભાવેનાઽયં
સંયમં કરોતિ તત્તત્સામર્થ્યયુક્તં સત્ત્વમસ્ય [ પા૦
તત્તત્સામર્થ્યયુક્તત્વાત્સર્વમસ્ય ] પ્રાદુર્ભવતીત્યર્થઃ ॥ ૨૪॥

સિદ્ધ્યન્તરમાહ —

પ્રવૃત્ત્યાલોકન્યાસાત્સૂક્ષ્મવ્યવહિતવિપ્રકૃષ્ટજ્ઞાનમ્ ॥ વિભૂતિ ૨૫॥

વૃત્તિઃ — પ્રવૃત્તિર્વિષયવતી જ્યોતિષ્મતી ચ પ્રાગુક્તા
(૧।૩૫-૩૬)। તસ્યા ય આલોકઃ સાત્ત્વિકપ્રકાશસ્તસ્ય
નિખિલેષુ વિષયેષુ ન્યાસાત્ તદ્વાસિતાનાં વિષયાણાં ભાવનાતઃ

સન્તઃકરણેષુ ઇન્દ્રિયેષુ ચ પ્રકૃષ્ટશક્તિમાપન્નેષુ સુસૂક્ષ્મસ્ય પરમાણ્વાદેર્વ્યવહિતસ્ય ભૂમ્યન્તર્ગતસ્ય નિધાનાદેર્વિપ્રકૃષ્ટસ્ય મેર્વપરપાર્શ્વવર્તિનો રસાયનાદેર્જ્ઞાનમુત્પદ્યતે ॥ ૨૫॥

એતત્સમાનવૃત્તાન્તસિદ્ધ્યન્તરમાહ —

ભુવનજ્ઞાનં સૂર્યે સંયમાત્ ॥ વિભૂતિ ૨૬॥

વૃત્તિઃ — સૂર્યે પ્રકાશમયે યઃ સંયમઃ કરોતિ તસ્ય સપ્તસુ ભૂર્ભુવઃસ્વઃપ્રભૃતિષુ લોકેષુ યાનિ ભુવનાનિ તત્તત્સન્નિવેશભાઞ્જિ પુરાણિ [ પા૦ સ્થાનાનિ ] તેષુ યથાવદસ્ય જ્ઞાનમુત્પદ્યતે । પૂર્વસ્મિન્ સૂત્રે સાત્ત્વિકપ્રકાશ આલમ્બનતયોક્તઃ । ઇહ તુ ભૌતિક ઇતિ વિશેષઃ ॥ ૨૬॥

ભૌતિકપ્રકાશાન્તરાલમ્બનદ્વારેણ સિદ્ધ્યન્તરમાહ —

ચન્દ્રે તારાવ્યૂહજ્ઞાનમ્ ॥ વિભૂતિ ૨૭॥

વૃત્તિઃ — તારાણાં જ્યોતિષાં યો વ્યૂહો વિશિષ્ટઃ સન્નિવેશસ્તસ્ય ચન્દ્રે કૃતસંયમસ્ય જ્ઞાનમુત્પદ્યતે । સૂર્યપ્રકાશેન હતતેજસ્કત્વાત્તારાણાં સૂર્યસંયમાત્તજ્જ્ઞાનં ન શક્યં ભવિતુમર્હતીતિ પૃથગુપાયોઽભિહિતઃ ॥ ૨૭॥

સિદ્ધ્યન્તરમાહ —

ધ્રુવે તદ્ગતિજ્ઞાનમ્ ॥ વિભૂતિ ૨૮॥

વૃત્તિઃ — ધ્રુવે નિશ્ચલે જ્યોતિષાં પ્રધાને કૃતસંયમસ્ય તાસાં તારાણાં યા ગતિઃ પ્રત્યેકં નિયતકાલા નિયતદેશા ચ તસ્યા જ્ઞાનમુત્પદ્યતે — ઇયં તારાઽયં ગ્રહ ઇયતા કાલેનાઽમું રાશિમિદં નક્ષત્રં યાસ્યતીતિ સર્વં જાનાતિ । ઇદં કાલજ્ઞાનસ્ય ફલમિત્યુક્તં ભવતિ ॥ ૨૮॥

બાહ્યાઃ સિદ્ધીઃ પ્રતિપાદ્યાઽન્તરાઃ સિદ્ધીઃ પ્રતિપાદયિતુમુપક્રમતે —

નાભિચક્રે કાયવ્યૂહજ્ઞાનમ્ ॥ વિભૂતિ ૨૯॥

વૃત્તિઃ — શરીરમધ્યવર્તિ નાભિસંજ્ઞકં યત્ ષોડશારં ચક્રં તસ્મિન્ કૃતસંયમસ્ય યોગિનઃ કાયગતો યોઽસૌ વ્યૂહો વિશિષ્ટરસમલધાતુનાડ્યાદીનામવસ્થાનં તત્ર જ્ઞાનમુત્પદ્યતે ।

ઇદમુક્તં ભવતિ — નાભિચક્રં શરીરમધ્યવર્તિ સર્વતઃ
પ્રસૃતાનાં નાડ્યાદીનાં મૂલભૂતમ્ । અતસ્તત્ર કૃતાવધાનસ્ય
સમગ્રસન્નિવેશો યથાવદાભાતિ ॥ ૨૯॥

સિદ્ધ્યન્તરમાહ —

કણ્ઠકૂપે ક્ષુત્પિપાસાનિવૃત્તિઃ ॥ વિભૂતિ ૩૦॥

વૃત્તિઃ — કણ્ઠે ગલે કૂપઃ કણ્ઠકૂપઃ । જિહ્વામૂલે
જિહ્વાતન્તોરધસ્તાત્ કૂપ ઇવ કૂપો ગર્તાકારપ્રદેશઃ પ્રાણાદેર્યત્સમ્પર્કાત્
ક્ષુત્પિપાસાદયઃ પ્રાદુર્ભવન્તિ તસ્મિન્ કૃતસંયમસ્ય યોગિનઃ
ક્ષુત્પિપાસાદયો નિવર્તન્તે । ઘણ્ટિકાધસ્તાત્ સ્રોતસા ધાર્યમાણે તસ્મિન્
ભાવિતે ભવત્યેવંવિધા સિદ્ધિઃ ॥ ૩૦॥

સિદ્ધ્યન્તરમાહ —

કૂર્મનાડ્યાં સ્થૈર્યમ્ ॥ વિભૂતિ ૩૧॥

વૃત્તિઃ — કણ્ઠકૂપસ્યાધસ્તાદ્યા કૂર્માખ્યા નાડી તસ્યાં
કૃતસંયમસ્ય ચેતસઃ સ્થૈર્યમુત્પદ્યતે । તત્સ્થાનમનુપ્રવિષ્ટસ્ય
ચઞ્ચલતા ન ભવતીત્યર્થઃ । યદિ વા કાયસ્ય સ્થૈર્યમુત્પદ્યતે ન
કેનચિત્ સ્પન્દયિતું શક્યત ઇત્યર્થઃ ॥ ૩૧॥

સિદ્ધ્યન્તરમાહ —

મૂર્ધજ્યોતિષિ સિદ્ધદર્શનમ્ ॥ વિભૂતિ ૩૨॥

વૃત્તિઃ — શિરઃકપાલે બ્રહ્મરન્ધ્રાખ્યે છિદ્રે
પ્રકાશાધારત્વાજ્જ્યોતિષિ । યથા ગૃહાભ્યન્તરસ્થસ્ય મણેઃ પ્રસરન્તી
પ્રભા કુઞ્ચિતાકારેવ સર્વપ્રદેશે સંઘટતે તથા હૃદયસ્થઃ
સાત્ત્વિકઃ પ્રકાશઃ પ્રસૃતસ્તત્ર સમ્પિણ્ડિતત્વં ભજતે । તત્ર
કૃતસંયમસ્ય યે દ્યાવાપૃથિવ્યોરન્તરાલવર્તિનઃ સિદ્ધા દિવ્યાઃ
પુરુષાસ્તેષામિતરપ્રાણિભિરદૃશ્યાનામ્ તસ્ય દર્શનં ભવતિ । તાન્
પશ્યતિ તૈશ્ચ સ સમ્ભાષત ઇત્યર્થઃ ॥ ૩૨॥

સર્વજ્ઞત્વ ઉપાયમાહ —

પ્રાતિભાદ્વા સર્વમ્ ॥ વિભૂતિ ૩૩॥

વૃત્તિઃ — નિમિત્તાનપેક્ષં મનોમાત્રજન્યમવિસંવાદકં

દ્રાગુત્પદ્યમાનં [ પા૦ પ્રાગુત્પદ્યમાનં ] જ્ઞાનં પ્રતિભા ।
તસ્યાં સંયમે ક્રિયમાણે પ્રાતિભં વિવેકખ્યાતેઃ પૂર્વભાવિ તારકં
જ્ઞાનમુદેતિ । યથોદેષ્યતઃ સવિતુઃ પૂર્વં પ્રભા પ્રાદુર્ભવતિ
તદ્વદ્વિવેકખ્યાતેઃ પૂર્વં તારકં સર્વવિષયં જ્ઞાનમુત્પદ્યતે । તસ્મિન્
સતિ સંયમાન્તરાનપેક્ષઃ સર્વં જાનાતીત્યર્થઃ ॥ ૩૩ ॥

સિદ્ધ્યન્તરમાહ —

હૃદયે ચિત્તસંવિત્ ॥ વિભૂતિ ૩૪ ॥

વૃત્તિઃ — હૃદયં શરીરસ્ય પ્રદેશવિશેષઃ ।
તસ્મિન્નધોમુખસ્વલ્પપુણ્ડરીકાભ્યન્તરેઽન્તઃકરણસત્ત્વસ્ય સ્થાનમ્ ।
તત્ર કૃતસંયમસ્ય સ્વપરચિત્તજ્ઞાનમુત્પદ્યતે । સ્વચિત્તગતાઃ
સર્વા વાસનાઃ પરચિત્તગતાંશ્ચ રાગાદીઞ્જાનાતીત્યર્થઃ ॥ ૩૪ ॥

સિદ્ધ્યન્તરમાહ —

સત્ત્વપુરુષયોરત્યન્તાસઙ્કીર્ણયોઃ પ્રત્યયાવિશેષો ભોગઃ
પરાર્થાન્યસ્વાર્થસંયમાત્પુરુષજ્ઞાનમ્ ॥ વિભૂતિ ૩૫ ॥

[ પરાર્થત્વાત્ સ્વાર્થસંયમાત્ ઇત્યેવ બહુસમ્મતઃ સૂત્રપાઠઃ । ]

વૃત્તિઃ — સત્ત્વં પ્રકાશસુખાત્મકઃ પ્રાધાનિકઃ
પરિણામવિશેષઃ । પુરુષો ભોક્તાઽધિષ્ઠાતૃરૂપઃ ।
તયોરત્યન્તાસંકીર્ણયોર્ભોગ્યભોક્તૃરૂપત્વાદચેતનચેતનત્વાચ્ચ
ભિન્નયોર્યઃ પ્રત્યયસ્યાવિશેષો ભેદેનાપ્રતિભાસનં તસ્માત્ સત્ત્વસ્યૈવ
કર્તૃતાપ્રત્યયેન યા સુખદુઃખસંવિત્ સ ભોગઃ ।
સત્ત્વસ્ય સ્વાર્થનૈરપેક્ષ્યેણ પરાર્થઃ પુરુષાર્થનિમિત્તઃ । તસ્માદન્યો
યઃ સ્વાર્થઃ પુરુષસ્વરૂપમાત્રાલમ્બનઃ પરિત્યક્તાહંકારસત્ત્વે
યા ચિચ્છાયાસંક્રાન્તિસ્તત્ર કૃતસંયમસ્ય પુરુષવિષયં
જ્ઞાનમુત્પદ્યતે । તત્ર તદેવં રૂપં સ્વાલમ્બનં જ્ઞાનં
સત્ત્વનિષ્ઠં પુરૂષો [પા૦ સત્ત્વનિષ્ઠઃ પુરુષઃ]
જાનાતીત્યર્થઃ । ન પુનઃ પુરુષો જ્ઞાતા જ્ઞાનસ્ય વિષયભાવમાપદ્યતે
જ્ઞેયત્વાપત્તેર્જ્ઞાતૃજ્ઞેયત્વયોરત્યન્તવિરોધાત્ ॥ ૩૫ ॥

અસ્યૈવ સંયમસ્ય ફલમાહ —

તતઃ પ્રાતિભશ્રાવણવેદનાદર્શાસ્વાદવાર્તા જાયન્તે ॥ વિભૂતિ ૩૬ ॥

વૃત્તિઃ — તતઃ પુરુષસંયમાદભ્યસ્યમાનાદ્વ્યુત્થિતસ્યાપિ જ્ઞાનાનિ જાયન્તે । તત્ર પ્રાતિભં પૂર્વોક્તં જ્ઞાનં તસ્યાવિર્ભવનાત્ સૂક્ષ્માદિકમર્થં પશ્યતિ । શ્રાવણં શ્રોત્રેન્દ્રિયજં જ્ઞાનં તસ્માચ્ચ પ્રકૃષ્ટં દિવ્યં શબ્દં જાનાતિ । વેદના સ્પર્શેન્દ્રિયજં જ્ઞાનં વેદ્યતેઽનયેતિ કૃત્વા તાન્ત્રિક્યા સંજ્ઞયા વ્યવહ્રિયતે । તસ્માદ્દિવ્યસ્પર્શવિષયં જ્ઞાનં સમુપજાયતે । આદર્શશ્ચક્ષુરિન્દ્રિયજં જ્ઞાનમ્ । આ સમન્તાદ્દૃશ્યતેઽનુભૂયતે રૂપમનેનેતિ કૃત્વા તસ્ય પ્રકર્ષાદ્દિવ્યં રૂપજ્ઞાનમુત્પદ્યતે । આસ્વાદો રસનેન્દ્રિયજં જ્ઞાનમ્ । આસ્વાદ્યતેઽનેનેતિ કૃત્વા તસ્મિન્ પ્રકૃષ્ટે દિવ્યે રસે સંવિદુપજાયતે । વાર્તા ગન્ધસંવિત્ । વૃત્તિશબ્દેન તાન્ત્રિક્યા પરિભાષયા ઘ્રાણેન્દ્રિયમુચ્યતે । વર્તતે ગન્ધવિષયે ઇતિ વૃત્તેર્ઘ્રાણેન્દ્રિયાજ્જાતા વાર્તા ગન્ધસંવિત્ । તસ્યાં પ્રકૃષ્યમાનાયાં દિવ્યગન્ધોઽનુભૂયતે ॥ ૩૬॥

એતેષાં ફલવિશેષાણાં વિષયવિભાગમાહ —

તે સમાધાવુપસર્ગા વ્યુત્થાને સિદ્ધયઃ ॥ વિભૂતિ ૩૭॥

વૃત્તિઃ — તે પ્રાક્પ્રતિપાદિતાઃ ફલવિશેષાઃ સમાધેઃ પ્રકર્ષે ગચ્છત ઉપસર્ગા ઉપદ્રવા વિઘ્નાઃ । તત્ર હર્ષસ્મયાદિકરણેન [ પા૦ હર્ષવિસ્મયાદિકરણેન ] સમાધિઃ શિથિલીભવતિ । વ્યુત્થાને તુ પુનર્વ્યવહારદશાયાં વિશિષ્ટફલદાયકત્વાત્ સિદ્ધયો ભવન્તિ ॥ ૩૭॥

સિદ્ધ્યન્તરમાહ —

બન્ધકારણશૈથિલ્યાત્પ્રચારસંવેદનાચ્ચ ચિત્તસ્ય પરશરીરાવેશઃ ॥ વિભૂતિ ૩૮॥

વૃત્તિઃ — વ્યાપકત્વાદાત્મચિત્તયોર્નિયતકર્મવશાદેવ શરીરાન્તર્ગતયોરેવ ભોક્તૃભોગ્યભાવેન યત્ સંવેદનમુપજાયતે સ એવ શરીરબન્ધ ઇત્યુચ્યતે । તદ્યદા સમાધિવશાદ્બન્ધકારણં ધર્માધર્માખ્યં શિથિલં ભવતિ તાનવમાપદ્યતે । ચિત્તસ્ય ચ યોઽસૌ પ્રચારો હૃદયપ્રવેશાદિન્દ્રિયદ્વારેણ વિષયાભિમુખ્યેન પ્રસરસ્તસ્ય સંવેદનં જ્ઞાનમ્ — ઇયં ચિત્તવહા નાડી । અનયા ચિત્તં વહતિ । ઇયં ચ પ્રાણાદિવહાભ્યો [ પા૦ રસપ્રાણાદિવહાભ્યો ] નાડીભ્યો વિલક્ષણેતિ — સ્વપરશરીરયોર્યદા સંચારં જાનાતિ તદા પરકીયં મૃતં જીવચ્છરીરં વા ચિત્તસઞ્ચારદ્વારેણ

પ્રવિશતિ । ચિત્તં ચ પરશરીરે પ્રવિશદિન્દ્રિયાણ્યપ્યનુવર્તન્તે
મધુકરરાજમિવ મક્ષિકાઃ ।
અથ પરશરીરપ્રવિષ્ટો યોગી સ્વશારીરવત્ તેન સર્વં વ્યવહરતિ ।
યતો વ્યાપકયોશ્ચિત્તપુરુષયોર્ભોગસઙ્કોચે કારણં કર્મ તચ્ચેત્
સમાધિના ક્ષિપ્તં તદા સ્વાતન્ત્ર્યાત્ સર્વત્રૈવ ભોગનિષ્પત્તિઃ ॥ ૩૮॥

સિદ્ધ્યન્તરમાહ —

ઉદાનજયાજ્જલપઙ્કકણ્ટકાદિષ્વસઙ્ગ ઉત્ક્રાન્તિશ્ચ ॥ વિભૂતિ ૩૯॥

વૃત્તિઃ — સમસ્તાનામિન્દ્રિયાણાં તુષજ્વાલાવદ્યા
યુગપદુત્થિતા વૃત્તિઃ સા જીવનશબ્દવાચ્યા । તસ્યાઃ
ક્રિયાભેદાત્ પ્રાણાપાનાદિસંજ્ઞાભિર્વ્યપદેશઃ । તત્ર
હૃદયાન્મુખનાસિકાદ્વારેણ વાયોઃ પ્રાયણાત્ પ્રાણ ઇત્યુચ્યતે । નાભિદેશાત્
પાદાઙ્ગુષ્ઠપર્યન્તમપનયનાદપાનઃ । નાભિદેશં પરિવેષ્ટ્ય
સમન્તાન્નયનાત્ સમાનઃ । કૃકાટિકાદેશાદાશિરોવૃત્તેરુન્નયનાદુદાનઃ ।
વ્યાપ્ય નયનાત્ સર્વશરીરવ્યાપી વ્યાનઃ ।
તત્રોદાનસ્ય સંયમદ્વારેણ જયાદિતરેષાં વાયૂનાં રોધાદૂર્ધ્વગતિત્વેન
જલે મહાનદ્યાદૌ મહતિ વા કર્દમે તીક્ષ્ણેષુ કણ્ટકેષુ વા
ન મજ્જત્યતિલઘુત્વાત્ [ પા૦ ન સજ્જતે। તિલઘુત્વાત્ ] ।
તૂલપિણ્ડવજ્જલાદૌ મજ્જિતોઽપ્યુદ્ગચ્છતીત્યર્થઃ ॥ ૩૯॥

સિદ્ધ્યન્તરમાહ —

સમાનજયાત્પ્રજ્વલનમ્ ॥ વિભૂતિ ૪૦॥

[ જ્વલનમ્ ઇત્યેવ્ બહુસમ્મતઃ સૂત્રપાઠઃ । ]

વૃત્તિઃ — અગ્નિમાવેષ્ટ્ય વ્યવસ્થિતસ્ય સમાનાખ્યસ્ય વાયોર્જયાત્
સંયમેન વશીકારાન્નિરાવરણસ્યાગ્નેરુદ્ભૂતત્ત્વાત્તેજસા [ પા૦
અગ્નેરૂર્ધ્વત્વાત્ ] પ્રજ્વલન્નિવ યોગી પ્રતિભાતિ ॥ ૪૦॥

સિદ્ધ્યન્તરમાહ —

શ્રોત્રાકાશયોઃ સમ્બન્ધસંયમાદ્દિવ્યં શ્રોત્રમ્ ॥ વિભૂતિ ૪૧॥

વૃત્તિઃ — શ્રોત્રં શબ્દગ્રાહકમાહંકારિકમિન્દ્રિયમ્ । આકાશં વ્યોમ
શબ્દતન્માત્રકાર્યમ્ । તયોઃ સમ્બન્ધો દેશદેશિભાવલક્ષણસ્તસ્મિન્
કૃતસંયમસ્ય યોગિનો દિવ્યં શ્રોત્રં પ્રવર્તતે । યુગપત્

સૂક્ષ્મવ્યવહિતવિપ્રકૃષ્ટશબ્દગ્રહણસમર્થં ભવતીત્યર્થઃ ॥ ૪૧॥

સિદ્ધ્યન્તરમાહ —

કાયાકાશયોઃ સમ્બન્ધસંયમાલ્લઘુતૂલસમાપત્તેશ્ચાકાશગમનમ્ ॥ વિભૂતિ ૪૨॥

વૃત્તિઃ — કાયઃ પાઞ્ચભૌતિકં શરીરમ્ ।
તસ્યાકાશેનાવકાશદાયકેન યઃ સમ્બન્ધસ્તત્ર સંયમં વિધાય લઘુનિ
તૂલાદૌ સમાપત્તિં તન્મયીભાવલક્ષણાં વિધાય પ્રાપ્તાતિલઘુભાવો
યોગી પ્રથમં યથારુચિ જલે સંચરણક્રમેણોર્ણનાભતન્તુજાલેન
સંચરમાણ આદિત્યરશ્મિભિશ્ચ વિહરન્ યથેષ્ટમાકાશેન ગચ્છતિ ॥ ૪૨॥

સિદ્ધ્યન્તરમાહ —

બહિરકલ્પિતા વૃત્તિર્મહાવિદેહા તતઃ પ્રકાશાવરણક્ષયઃ ॥ વિભૂતિ
૪૩॥

વૃત્તિઃ — શરીરાદ્બહિર્યા મનસઃ શરીરનૈરપેક્ષ્યેણ
વૃત્તિઃ સા મહાવિદેહા નામ વિગતાહંકારકાર્યવેગા [ પા૦
વિગતશરીરાહંકારદાર્ઢ્યદ્વારેણ ] ઉચ્યતે । તતસ્તસ્યાં કૃતાત્
સંયમાત્ પ્રકાશાવરણક્ષયઃ સાત્ત્વિકસ્ય ચિત્તસ્ય યઃ પ્રકાશઃ તસ્ય
યદાવરણં ક્લેશકર્માદિ તસ્ય ક્ષયઃ પ્રવિલયો ભવતિ । અયમર્થઃ
— શરીરાહંકારે સતિ યા મનસો બહિર્વૃત્તિઃ સા કલ્પિતેત્યુચ્યતે ।
યદા પુનઃ શરીરાદહંકારભાવં પરિત્યજ્ય સ્વાતન્ત્ર્યેણ મનસો
વૃત્તિઃ સાઽકલ્પિતા । તસ્યાં સંયમાદ્યોગિનઃ સર્વે ચિત્તમલાઃ ક્ષીયન્તે ॥ ૪૩॥

તદેવં પૂર્વાન્તવિષયાઃ પરાન્તવિષયા મધ્યભાવાશ્ચ સિદ્ધીઃ
પ્રતિપાદ્યાઽનન્તરં ભુવનજ્ઞાનાદિરૂપા બાહ્યાઃ કાયવ્યૂહાદિરૂપા
આભ્યન્તરાઃ પરિકર્મનિષ્પન્નભૂતાશ્ચ મૈત્ર્યાદિષુ બલાનીત્યેવમાદ્યાઃ
સમાધ્યુપયોગિનીશ્ચાન્તઃકરણબહિઃકરણલક્ષણેન્દ્રિયભવાઃ
પ્રાણાદિવાયુભવાશ્ચ સિદ્ધીશ્ચિત્તદાર્ઢ્યાય સમાધેશ્ચાશ્વાસોત્પત્તયે
પ્રતિપાદ્યેદાનીં સ્વદર્શનોપયોગિસબીજનિર્બીજસમાધિસિદ્ધયે
વિવિધોપાયપ્રદર્શનાયાહ —

સ્થૂલસ્વરૂપસૂક્ષ્માન્વયાર્થવત્ત્વસંયમાદ્ભૂતજયઃ ॥ વિભૂતિ ૪૪॥

વૃત્તિઃ — પઞ્ચાનાં પૃથિવ્યાદીનાં ભૂતાનાં યે
પઞ્ચાઽવસ્થાવિશેષરૂપા ધર્માઃ સ્થૂલત્વાદયસ્તત્ર

કૃતસંયમસ્ય ભૂતજયો ભવતિ । ભૂતાન્યસ્ય વશ્યાનિ ભવન્તીત્યર્થઃ । તથા હિ — ભૂતાનાં પરિદૃશ્યમાનં વિશિષ્ટાકારવત્ સ્થૂલરૂપમ્ । સ્વરૂપપઞ્ચૈષાં યથાક્રમં કાર્યં ગન્ધસ્નેહોષ્ણતાપ્રેરણાવકાશદાનલક્ષણમ્ । સૂક્ષ્મં ચ યથાક્રમં ભૂતાનાં કારણત્વેન વ્યવસ્થિતાનિ ગન્ધાદિતન્માત્રાણિ । અન્વયિનો ગુણાઃ પ્રકાશપ્રવૃત્તિસ્થિતિરૂપતયા સર્વત્રૈવાઽન્વયિત્વેન સમુપલભ્યન્તે । અર્થવત્ત્વં તેષુ એવ ગુણેષુ ભોગાપવર્ગસમ્પાદનાખ્યા શક્તિઃ । તદેવં ભૂતેષુ પઞ્ચસુ ઉક્તધર્મલક્ષણાવસ્થાભિન્નેષુ પ્રત્યવસ્થં સંયમં કુર્વન્ યોગી ભૂતજયી ભવતિ । તદ્યથા — પ્રથમં સ્થૂલરૂપે સંયમં વિધાય તદનુ સ્વરૂપે ઇત્યેવં ક્રમેણ તસ્ય કૃતસંયમસ્ય સંકલ્પાનુવિધાયિન્યો વત્સાનુસારિણ્ય ઇવ ગાવો ભૂતપ્રકૃતયો ભવન્તીત્યર્થઃ ॥ ૪૪॥

તસ્યૈવ ભૂતજયસ્ય ફલમાહ —

તતોઽણિમાદિપ્રાદુર્ભાવઃ કાયસમ્પત્તદ્ધર્માઽનભિઘાતશ્ચ ॥ વિભૂતિ ૪૫॥

વૃત્તિઃ — ૧। અણિમા પરમાણુરૂપતાપત્તિઃ । ૨। મહિમા મહત્ત્વપ્રાપ્તિઃ । ૩। લઘિમા તૂલપિણ્ડવલ્લઘુત્વપ્રાપ્તિઃ । ૪। ગરિમા ગુરુત્વપ્રાપ્તિઃ । ૫। પ્રાપ્તિરઙ્ગુલ્યગ્રેણ ચન્દ્રાદિસ્પર્શનશક્તિઃ । ૬। પ્રાકામ્યમિચ્છાનભિઘાતઃ । ૭। શરીરાન્તઃકરણેશ્વરત્વમીશિત્વમ્ । ૮। સર્વત્ર પ્રભવિષ્ણુતા વશિત્વમ્ । સર્વાણ્યેવ ભૂતાન્યનુગામિત્વાત્તદુક્તં નાતિક્રામન્તિ । ૯। યત્રકામાવસાયો યસ્મિન્ વિષયેઽસ્ય કામઃ સ્વેચ્છા ભવતિ તસ્મિન્ વિષયે યોગિનોઽધ્યવસાયો ભવતિ । તં વિષયં સ્વીકારદ્વારેણાભિલાષસમાપ્તિપર્યન્તં નયતીત્યર્થઃ । ત એતેઽણિમાદ્યાઃ સમાધ્યુપયોગિનો ભૂતજયાદ્યોગિનઃ પ્રાદુર્ભવન્તિ । યથા પરમાણુત્વં પ્રાપ્તો વજ્રાદીનામપ્યન્તઃ પ્રવિશતિ । એવં સર્વત્ર યોજ્યમ્ । એતેઽણિમાદયોઽષ્ટૌ ગુણા મહાસિદ્ધય ઉચ્યન્તે ।
કાયસમ્પદ્વક્ષ્યમાણા (૩।૪૬) તાં પ્રાપ્નોતિ ।
તદ્ધર્માઽનભિઘાતશ્ચ તસ્ય કાયસ્ય યે ધર્મા રૂપાદયસ્તેષામનભિઘાતો નાશો ન કુતશ્ચિદ્ભવતિ નાસ્ય રૂપમગ્નિર્દહતિ ન વાયુઃ શોષયતીત્યાદિ યોજ્યમ્ ॥ ૪૫॥

કાયસમ્પદમાહ —

રૂપલાવણ્યબલવજ્રસંહનનત્વાનિ કાયસમ્પત્ ॥ વિભૂતિ ૪૬॥

વૃત્તિઃ — રૂપલાવણ્યબલાનિ પ્રસિદ્ધાનિ । વજ્રસંહનનત્વં
વજ્રવત્ કઠિના સંહતિરસ્ય શરીરે ભવતીત્યર્થઃ । ઇતિ કાયસ્ય
આવિર્ભૂતગુણસમ્પત્ ॥ ૪૬॥

એવં ભૂતજયમભિધાય પ્રાપ્તભૂમિકાવિશેષસ્યેન્દ્રિયજયમાહ —

ગ્રહણસ્વરૂપાસ્મિતાન્વયાર્થવત્ત્વસંયમાદિન્દ્રિયજયઃ ॥ વિભૂતિ ૪૭॥

વૃત્તિઃ — ગ્રહણમિન્દ્રિયાણાં વિષયાભિમુખી વૃત્તિઃ । સ્વરૂપં
સામાન્યેન પ્રકાશકત્વમ્ । અસ્મિતા અહંકારાનુગમઃ । અન્વયાર્થવત્ત્વે
પૂર્વવત્ (૩।૪૪)। એતેષાં ઇન્દ્રિયાણામવસ્થાપઞ્ચકે પૂર્વવત્
સંયમં કૃત્વેન્દ્રિયજયી ભવતિ ॥ ૪૭॥

તસ્ય ફલમાહ —

તતો મનોજવિત્વં વિકરણભાવઃ પ્રધાનજયશ્ચ ॥ વિભૂતિ ૪૮॥

વૃત્તિઃ — શરીરસ્ય મનોવદનુત્તમગતિલાભો મનોજવિત્વમ્ ।
કાયનિરપેક્ષાણામિન્દ્રિયાણાં વૃત્તિલાભો વિકરણભાવઃ । સર્વવશિત્વં
પ્રધાનજયઃ । એતાઃ સિદ્ધ્યયો જિતેન્દ્રિયસ્ય પ્રાદુર્ભવન્તિ । તાશ્ચાસ્મિન્
શાસ્ત્રે મધુપ્રતીકા ઇત્યુચ્યન્તે । યથા મધુન એકદેશોઽપિ સ્વદત
એવં પ્રત્યેકમેતાઃ સિદ્ધયઃ સ્વદન્ત ઇતિ મધુપ્રતીકાઃ ॥ ૪૮॥

ઇન્દ્રિયજયમભિધાયાઽન્તઃકરણજયમાહ —

સત્ત્વપુરુષાન્યતાખ્યાતિમાત્રસ્ય સર્વભાવાધિષ્ઠાતૃત્વં
સર્વજ્ઞાતૃત્વં ચ ॥ વિભૂતિ ૪૯॥

વૃત્તિઃ — તસ્મિન્ બુદ્ધેઃ સાત્ત્વિકે પરિણામે
કૃતસંયમસ્ય યા સત્ત્વપુરુષયોરુત્પદ્યતે વિવેકખ્યાતિર્ગુણાનાં
કર્તૃત્વાભિમાનશિથિલીભાવરૂપા તન્માહાત્મ્યાત્ તત્રૈવ સ્થિતસ્ય યોગિનઃ
સર્વાધિષ્ઠાતૃત્વં સર્વજ્ઞાતૃત્વં ચ સમાધેર્ભવતિ । સર્વેષાં
ગુણપરિણામાનાં ભાવાનાં સ્વામિવદાક્રમણં સર્વભાવાધિષ્ઠાતૃત્વમ્ ।
તેષામેવ ચ શાન્તોદિતાવ્યપદેશ્યધર્મિત્વેનાવસ્થિતાનાં

યથાવદ્વિવેકજ્ઞાનં સર્વજ્ઞાતૃત્વમ્ । એષાં ચાસ્મિઞ્છાસ્ત્રે પરસ્યાં વશીકારસંજ્ઞાયાં પ્રાપ્તાયાં વિશોકા નામ સિદ્ધિરિત્યુચ્યતે ॥ ૪૯॥

ક્રમેણ ભૂમિકાન્તરમાહ —

તદ્વૈરાગ્યાદપિ દોષબીજક્ષયે કૈવલ્યમ્ ॥ વિભૂતિ ૫૦॥

વૃત્તિઃ — તસ્યામપિ વિશોકાયાં સિદ્ધૌ યદા વૈરાગ્યમુત્પદ્યતે યોગિનસ્તદા તસ્માદ્દોષાણાં રાગાદીનાં યદ્બીજમવિદ્યાદયસ્તસ્ય ક્ષયે નિર્મૂલને કૈવલ્યમાત્યન્તિકી દુઃખનિવૃત્તિઃ પુરુષસ્ય ગુણાનામધિકારપરિસમાપ્તૌ સ્વરૂપપ્રતિષ્ઠત્વમ્ [ પા૦ સ્વરૂપનિષ્ઠત્વમ્ ] ॥ ૫૦॥

તસ્મિન્નેવ સમાધૌ સ્થિત્યુપાયમાહ —

સ્વામ્યુપનિમન્ત્રણે સઙ્ગસ્મયાઽકરણં પુનરનિષ્ટપ્રસઙ્ગાત્ ॥ વિભૂતિ ૫૧॥

વૃત્તિઃ — ચત્વારો યોગિનો ભવન્તિ । તત્રાભ્યાસવાન્ પ્રવૃત્તમાત્રજ્યોતિઃ પ્રથમઃ । ઋતમ્ભરપ્રજ્ઞો દ્વિતીયઃ । ભૂતેન્દ્રિયજયી તૃતીયઃ । અતિક્રાન્તભાવનીયશ્ચતુર્થઃ । તત્ર ચતુર્થસ્ય સમાધેઃ પ્રાપ્તસપ્તવિધભૂમિપ્રાન્તપ્રજ્ઞો ભવતિ । ઋતમ્ભરપ્રજ્ઞસ્ય દ્વિતીયાં મધુમતીસંજ્ઞાં ભૂમિકાં સાક્ષાત્કુર્વતઃ સ્વામિનો દેવા ઉપનિમન્ત્રયિતારો ભવન્તિ । દિવ્યસ્ત્રીરસાયનાદિકમ્ [દિવ્યસ્ત્રીવસનાદિકમ્ ] ઉપઢૌકયન્તીતિ તસ્મિન્નુપનિમન્ત્રણે નાઽનેન સઙ્ગઃ કર્તવ્યો નાપિ સ્મયઃ । સઙ્ગતિકરણે પુનર્વિષયભોગે પતતિ સ્મયકરણે કૃતકૃત્યમાત્માનં મન્યમાનો ન સમાધાવુત્સહતે । અતઃ સઙ્ગસ્મયયોસ્તેન વર્જનં કર્તવ્યમ્ ॥ ૫૧॥

અસ્યામેવ ફલભૂતાયાં વિવેકખ્યાતૌ પૂર્વોક્તસંયમવ્યતિરિક્તમુપાયાન્તરમાહ —

ક્ષણતત્ક્રમયોઃ સંયમાદ્વિવેકજં જ્ઞાનમ્ ॥ વિભૂતિ ૫૨॥

વૃત્તિઃ — ક્ષણઃ સર્વાન્ત્યઃ કાલાવયવો યસ્ય કલાઃ પ્રભવિતું ન શક્યન્તે । તથાવિધાનાં કાલક્ષણાનાં યઃ ક્રમઃ પૌર્વાપર્યેણ પરિણામસ્તત્ર સંયમાત્ પ્રાગુક્તં વિવેકજં જ્ઞાનમુત્પદ્યતે । અયમર્થઃ

— અયં કાલક્ષણોઽમુષ્માત્ કાલક્ષણાદુત્તરોઽયમસ્માત્ પૂર્વ ઇત્યેવંવિધે ક્રમે કૃતસંયમસ્યાત્યન્તસૂક્ષ્મેઽપિ ક્ષણક્રમે યદા ભવતિ સાક્ષાત્કારસ્તદાઽન્યદપિ સૂક્ષ્મં મહદાદિ સાક્ષાત્કરોતીતિ વિવેકજ્ઞાનોત્પત્તિઃ ॥ ૫૨॥

અસ્યૈવ સંયમસ્ય વિષયવિવેકોપક્ષેપણાયાહ —

જાતિલક્ષણદેશૈરન્યતાનવચ્છેદાત્તુલ્યયોસ્તતઃ પ્રતિપત્તિઃ ॥ વિભૂતિ ૫૩॥

વૃત્તિઃ — પદાર્થાનાં ભેદહેતવો જાતિલક્ષણદેશા ભવન્તિ । ક્વચિદ્ભેદહેતુર્જાતિઃ । યથા ગૌરિયં મહિષીયમિતિ । જાત્યા તુલ્યયોર્લક્ષણં ભેદહેતુઃ । ઇયં કર્બુરેયમરુણેતિ । જાત્યા લક્ષણેનાભિન્નયોર્ભેદહેતુર્દેશો દૃષ્ટઃ । યથા તુલ્યપ્રમાણયોરામલકયોર્ભિન્નદેશસ્થિતયોઃ । યત્ર પુનર્ભેદોઽવધારયિતું ન શક્યતે યથા એકદેશસ્થિતયોઃ શુક્લયોઃ પાર્થિવયોઃ પરમાણ્વોસ્તથાવિધે વિષયે ભેદાય કૃતસંયમસ્ય ભેદેન જ્ઞાનમુત્પદ્યતે તદા તદભ્યાસાત્ સૂક્ષ્માણ્યપિ તત્ત્વાનિ ભેદેન પ્રતિપદ્યતે । એતદુક્તં ભવતિ — યત્ર કેનચિદુપાયેન ભેદો નાવધારયિતું શક્યસ્તત્ર સંયમાદ્ભવત્યેવ ભેદપ્રતિપત્તિઃ ॥ ૫૩॥

સૂક્ષ્માણાં તત્ત્વાનામુક્તસ્ય વિવેકજન્યજ્ઞાનસ્ય સંજ્ઞાવિષયસ્વાભાવ્યં વ્યાખ્યાતુમાહ —

તારકં સર્વવિષયં સર્વથાવિષયમક્રમં ચેતિ વિવેકજં જ્ઞાનમ્ ॥ વિભૂતિ ૫૪॥

વૃત્તિઃ — ઉક્તસંયમબલાદેવાઽન્ત્યાયાં ભૂમિકાયામુત્પન્નં જ્ઞાનં તારકમિતિ તારયત્યગાધાત્ સંસારસાગરાદ્યોગિનમિત્યાન્વર્થિક્યા સંજ્ઞયા તારકમિત્યુચ્યતે । અસ્ય વિષયમાહ — સર્વવિષયમિતિ । સર્વાણિ તત્ત્વાનિ મહદાદીનિ વિષયોઽસ્યેતિ સર્વવિષયમ્ । સ્વભાવશ્ચાસ્ય સર્વથાવિષયત્વમ્ । સર્વાભિરવસ્થાભિઃ સ્થૂલસૂક્ષ્માદિભેદેન તૈસ્તૈઃ પરિણામૈઃ સર્વેણ પ્રકારેણાઽવસ્થિતાનિ તત્ત્વાનિ વિષયોઽસ્યેતિ સર્વથાવિષયમ્ ।
સ્વભાવાન્તરમાહ — અક્રમં ચેતિ ।
નિઃશેષનાનાવસ્થાપરિણતસ્યાત્મકભાવગ્રહણેનાસ્ય [પા૦ નિઃશેષનાનાઽવસ્થાપરિણતદ્વિત્ર્યાત્મકભાવગ્રહણે નાઽસ્ય] ક્રમો

વિધત ઇત્યક્રમમ્ । સર્વં કરતલામલકવદ્યુગપત્ પશ્યતીત્યર્થઃ ॥ ૫૪॥

અસ્માચ્ચ વિવેકજાત્ તારકાખ્યાજ્જ્ઞાનાત્ કિં ભવતીત્યાહ —

સત્ત્વપુરુષયોઃ શુદ્ધિસામ્યે કૈવલ્યમ્ ॥ વિભૂતિ ૫૫॥

વૃત્તિઃ — સત્ત્વપુરુષાવુક્તલક્ષણૌ (૨।૬,
૨।૧૮, ૨।૨૦)। તયોઃ શુદ્ધિસામ્યે કૈવલ્યમ્ । સત્ત્વસ્ય
સર્વકર્તૃત્વાભિમાનનિવૃત્યા સ્વકારણાનુપ્રવેશઃ શુદ્ધિઃ । પુરુષસ્ય
શુદ્ધિરુપચરિતભોગાભાવ ઇતિ દ્વયોઃ સમાનાયાં શુદ્ધૌ પુરુષસ્ય
કૈવલ્યમુત્પદ્યતે । મોક્ષો ભવતીત્યર્થઃ ॥ ૫૫॥

તદેવમન્તરઙ્ગં યોગાઙ્ગત્રયમભિધાય તસ્ય ચ સંયમસંજ્ઞાં
કૃત્વા સંયમસ્ય વિષયપ્રદર્શનાર્થં પરિણામત્રયમુપપાદ્ય
સંયમબલોત્પદ્યમાનાઃ પૂર્વાન્તપરાન્તમધ્યભવાઃ સિદ્ધીરુપદર્શ્ય
સમાધ્યભ્યાસોપપત્તયે [ પા૦ સમાધ્યાશ્વાસોત્પત્તયે ] બાહ્યા
ભુવનજ્ઞાનાદિરૂપા આભ્યન્તરાશ્ચ કાયવ્યૂહજ્ઞાનાદિરૂપાઃ પ્રદર્શ્ય
સમાધ્યુપયોગાયેન્દ્રિયપ્રાણજયાદિપૂર્વિકાઃ પરમપુરુષાર્થસિદ્ધયે
યથાક્રમમવસ્થાસહિતભૂતજયેન્દ્રિયસત્ત્વજયોદ્ભવાશ્ચ
વ્યાખ્યાય વિવેકજ્ઞાનોપપત્તયે તાંસ્તાનુપાયાનુપન્યસ્ય તારકસ્ય
સર્વસમાધ્યવસ્થાપર્યન્તભવસ્ય સ્વરૂપમભિધાય તત્સમાપત્તેઃ
કૃતાધિકારસ્ય ચિત્તસત્ત્વસ્ય સ્વકારણાનુપ્રવેશાત્ કૈવલ્યમુત્પદ્યત
ઇત્યભિહિતમિતિ નિર્ણીતો વિભૂતિપાદસ્તૃતીયઃ ।
ઇતિ ધારેશ્વરભોજદેવવિરચિતાયાં રાજમાર્તણ્ડાભિધાયાં
પાતઞ્જલવૃત્તૌ વિભૂતિપાદસ્તૃતીયઃ ।

ઇતિ વિભૂતિપાદઃ ।

અથ કૈવલ્યપાદઃ

યદાજ્ઞયૈવ કૈવલ્યં વિનોપાયૈઃ પ્રજાયતે ।
તમેકમજમીશાનં ચિદાનન્દમયં સ્તુમઃ ॥

ઇદાનીં વિપ્રતિપત્તિસમુત્થભ્રાન્તિનિરાકરણેન યુક્ત્યા
કૈવલ્યસ્વરૂપજ્ઞાપનાય [ પા૦ જ્ઞાનાય ]
કૈવલ્યપાદોઽયમારભ્યતે ।
તત્ર યાઃ પૂર્વમુક્તાઃ સિદ્ધયસ્તાસાં

નાનાવિધજન્માદિકારણપ્રતિપાદનદ્વારેણૈવં બોધયતિ — મદીયા યા એતાઃ સિદ્ધયસ્તાઃ સર્વાઃ પૂર્વજન્માભ્યસ્તસમાધિબલાજ્જન્માદિનિમિત્તમાત્રત્વેનાઽઽશ્રિત્ય પ્રવર્તન્તે । તતશ્ચાનેકભવસાધ્યસ્ય સમાધેર્ન ક્ષતિરસ્તીત્યાશ્વાસોત્પાદનાય સમાધિસિદ્ધેશ્ચ પ્રાધાન્યખ્યાપનાર્થં કૈવલ્યોપયોગાર્થં ચાહ —

જન્મૌષધિમન્ત્રતપઃસમાધિજાઃ સિદ્ધયઃ ॥ કૈવલ્ય ૧॥

વૃત્તિઃ — કાશ્ચન જન્મનિમિત્તા એવ સિદ્ધયો યથા પક્ષ્યાદીનામાકાશગમનાદયઃ । યથા વા કપિલમહર્ષિપ્રભૃતીનાં જન્મસમનન્તરમેવોપજાયમાના જ્ઞાનાદયઃ સાંસિદ્ધિકા ગુણાઃ । ઓષધિસિદ્ધયો યથા પારદાદિરસાયનાદ્યુપયોગાત્ । મન્ત્રસિદ્ધિર્યથા મન્ત્રજપાત્ કેષાંચિદાકાશગમનાદિઃ । તપઃસિદ્ધિર્યથા વિશ્વામિત્રાદીનામ્ । સમાધિસિદ્ધિઃ પ્રાક્પ્રતિપાદિતા । એતાઃ સિદ્ધયઃ પૂર્વજન્મક્ષયિતક્લેશાનામેવોપજાયન્તે । તસ્માત્ સમાધિસિદ્ધાવિવાઽન્યાસાં સિદ્ધીનાં સમાધિરેવ જન્માન્તરાભ્યસ્તઃ કારણમ્ । મન્ત્રાદીનિ નિમિત્તમાત્રાણિ ॥ ૧॥

નનુ નન્દીશ્વરાદિકાનાં જાત્યાદિપરિણામોઽસ્મિન્નેવ જન્મનિ દૃશ્યતે । તત્ કથં જન્માન્તરાભ્યસ્તસ્ય સમાધેઃ કારણત્વમુચ્યત ઇત્યાશઙ્ક્યાહ —

જાત્યન્તરપરિણામઃ પ્રકૃત્યાપૂરાત્ ॥ કૈવલ્ય ૨॥

વૃત્તિઃ — યોઽયમિહૈવ જન્મનિ નન્દીશ્વરાદીનાં જાત્યાદિપરિણામઃ સ પ્રકૃત્યાપૂરાત્ । પાશ્ચાત્ત્યા એવ હિ પ્રકૃતયોઽમુષ્મિઞ્જન્મનિ વિકારાનાપૂરયન્તિ જાત્યન્તરાકારેણ પરિણમન્તિ ॥ ૨॥

નનુ ધર્માધર્માદયસ્તત્ર ક્રિયમાના ઉપલભ્યન્તે । તત્ કથં પ્રકૃતીનામાપૂરકત્વમ્ ઇત્યાહ —

નિમિત્તમપ્રયોજકં પ્રકૃતીનાં વરણભેદસ્તુ તતઃ ક્ષેત્રિકવત્ ॥ કૈવલ્ય ૩॥

વૃત્તિઃ — નિમિત્તં ધર્માદિ । તત્ પ્રકૃતીનામર્થાન્તરપરિણામે ન પ્રયોજકમ્ । ન હિ કાર્યેણ કારણં પ્રવર્તતે । કુત્ર તર્હિ તસ્ય ધર્માદેર્વ્યાપાર ઇત્યાહ — વરણભેદસ્તુ તતઃ ક્ષેત્રિકવત્ ।

તતસ્તસ્માદનુષ્ઠીયમાનાદ્ધર્માદ્વરણમાવરણકમધર્માદિ તસ્યૈવ વિરોધિત્વાદ્ભેદઃ ક્ષયઃ ક્રિયતે । તસ્મિન્ પ્રતિબન્ધકે ક્ષીણે પ્રકૃતયઃ સ્વયમભિમતકાર્યાય પ્રભવન્તિ । દૃષ્ટાન્તમાહ — ક્ષેત્રિકવત્ । યથા ક્ષેત્રિકઃ કૃષીબલઃ કેદારાત્ કેદારાન્તરં જલં નિનીષુર્જલપ્રતિબન્ધકાવરણભેદમાત્રં કરોતિ । તસ્મિન્ ભિન્ને જલં સ્વયમેવ પ્રસરદ્રૂપં પરિણામં ગૃહ્ણાતિ ન તુ જલપ્રસરણે તસ્ય કશ્ચિત્ પ્રયત્નઃ । એવં ધર્માદિર્બોદ્ધવ્યમ્ ॥ ૩॥

યદા સાક્ષાત્કૃતતત્ત્વસ્ય યોગિનો યુગપત્ કર્મફલભોગાયાઽઽત્મીયનિરતિશયવિભૂત્યનુભવાદ્ યુગપદનેકશરીરનિર્મિત્સા જાયતે તદા કુતસ્તાનિ ચિત્તાનિ પ્રભવન્તીત્યાહ —

નિર્માણચિત્તાન્યસ્મિતામાત્રાત્ ॥ કૈવલ્ય ૪॥

વૃત્તિઃ — યોગિનઃ સ્વયં નિર્મિતેષુ કાયેષુ યાનિ ચિત્તાનિ તાનિ મૂલકારણાદસ્મિતામાત્રાદેવ તદિચ્છયા પ્રસરન્તિ । અગ્નેર્વિસ્ફુલિઙ્ગા ઇવ યુગપત્ પરિણમન્તિ ॥ ૪॥

નનુ બહૂનાં ચિત્તાનાં ભિન્નાભિપ્રાયત્વાન્નૈકકાર્યકર્તૃત્વં સ્યાદિત્યાહ —

પ્રવૃત્તિભેદે પ્રયોજકં ચિત્તમેકમનેકેષામ્ ॥ કૈવલ્ય ૫॥

વૃત્તિઃ — તેષામનેકેષાં ચેતસાં પ્રવૃત્તિભેદે વ્યાપારનાનાત્વ એઅકં યોગિનશ્ચિત્તં પ્રયોજકં પ્રેરકમધિષ્ઠાતૃત્વેન । તેન ન ભિન્નમતત્વમ્ । અયમર્થઃ — યથાત્મીયશરીરે મનશ્ચક્ષુઃપાણ્યાદીનિ યથેચ્છં પ્રેરયત્યધિષ્ઠાતૃત્વેનૈએવં કાયાન્તરેષ્વપીતિ ॥ ૫॥

જન્માદિપ્રભવત્વાત્ સિદ્ધીનાં ચિત્તમપિ તત્પ્રભવં પઞ્ચવિધમેવ । અતો જન્માદિપ્રભવાચ્ચિત્તાત્ સમાધિપ્રભવસ્ય ચિત્તસ્ય વૈલક્ષણ્યમાહ —

તત્ર ધ્યાનજમનાશયમ્ ॥ કૈવલ્ય ૬॥

વૃત્તિઃ — ધ્યાનજં સમાધિજં યચ્ચિત્તં તત્ પઞ્ચસુ મધ્યેઽનાશયં કર્મવાસનારહિતમિત્યર્થઃ ॥ ૬॥

યથેતરચિત્તેભ્યો યોગિનશ્ચિત્તં વિલક્ષણં ક્લેશાદિરહિતં તથા કર્માપિ વિલક્ષણમિત્યાહ —

કર્માશુક્લાકૃષ્ણં યોગિનસ્ત્રિવિધમિતરેષામ્ ॥ કૈવલ્ય ૭॥

વૃત્તિઃ — શુભફલદં કર્મ યાગાદિ શુક્લમ્ । અશુભફલદં બ્રહ્મહત્યાદિ કૃષ્ણમ્ । ઉભયસંકીર્ણં શુક્લકૃષ્ણમ્ । તત્ર શુક્લં કર્મ વિચક્ષણાનાં દાનતપઃસ્વાધ્યાયાદિમતાં પુરુષાણામ્ । કૃષ્ણં કર્મ દાનવાનામ્ [ નારકાનામ્ ] । શુક્લકૃષ્ણં મનુષ્યાણામ્ । યોગિનાન્તુ સંન્યાસવતાં ત્રિવિધકર્મવિપરીતં યત્ ફલત્યાગાનુસન્ધાનેનૈવાનુષ્ઠાનાન્ન કિઞ્ચિત્ ફલમારભતે ॥ ૭॥

અસ્યૈવ કર્મણઃ ફલમાહ —

તતસ્તદ્વિપાકાનુગુણાનામેવાભિવ્યક્તિર્વાસનાનામ્ ॥ કૈવલ્ય ૮॥

વૃત્તિઃ — ઇહ હિ દ્વિવિધા કર્મવાસનાઃ સ્મૃતિમાત્રફલા જાત્યાયુર્ભોગફલાશ્ચ । તત્ર જાત્યાયુર્ભોગફલા એકાનેકજન્મભવા ઇત્યનેન પૂર્વમેવ (૨।૧૨-૧૩) કૃતનિર્ણયાઃ । યાસ્તુ સ્મૃતિમાત્રફલાસ્તાસ્તતઃ કર્મણો યેન કર્મણા યાદૃક્ શરીરમારબ્ધં દેવમનુષ્યતિર્યગાદિભેદેન તસ્ય વિપાકસ્યાઽનુગુણા અનુરૂપા યા વાસનાસ્તાસામેવ તસ્માદભિવ્યક્તિર્વાસનાનાં ભવતિ । અયમર્થઃ — યેન કર્મણા પૂર્વં દેવતાદિશરીરમારબ્ધં જાત્યન્તરશતવ્યવધાનેન પુનસ્તથાવિધસ્યૈવ શરીરસ્યારમ્ભે તદનુરૂપા એવ સ્મૃતિફલા વાસનાઃ પ્રકટીભવન્તિ । લોકાન્તરેષ્વેવાર્થેષુ તસ્ય સ્મૃત્યાદયો જાયન્તે । ઇતરાસ્તુ સત્યોઽપિ અવ્યક્તસંજ્ઞાસ્તિષ્ઠન્તિ ન તસ્યાં દશાયાં નારકાદિશરીરોદ્ભવા વાસના વ્યક્તિમાયાન્તિ ॥ ૮॥

આસામેવ વાસનાનાં કાર્યકારણાભાવાનુપપત્તિમાશઙ્ક્ય સમર્થયિતુમાહ —

જાતિદેશકાલવ્યવહિતાનામપ્યાનન્તર્યં સ્મૃતિસંસ્કારયોરેકરૂપત્વાત્ ॥ કૈવલ્ય ૯॥

વૃત્તિઃ — ઇહ નાનાયોનિષુ ભ્રમતાં સંસારિણાં કાંચિદ્યોનિમનુભૂય યદા યોન્યન્તરસહસ્રવ્યવધાનેન પુનસ્તામેવ યોનિં પ્રતિપદ્યતે તદા તસ્યાં પૂર્વાનુભૂતાયાં યોનૌ તથાવિધશરીરાદિવ્યઞ્જકાપેક્ષયા વાસના યાઃ પ્રકટીભૂતા આસંસ્તાસ્તથાવિધવ્યઞ્જકાભાવાત્તિરોહિતાઃ

પુનસ્તથાવિધવ્યઞ્જકશરીરાદિલાભે પ્રકટીભવન્તિ । જાતિદેશકાલવ્યવધાનેઽપિ તાસાં સ્વાનુરૂપસ્મૃત્યાદિફલસાધન આનન્તર્યં નૈરન્તર્યમ્ । કુતઃ । સ્મૃતિસંસ્કારયોરેકરૂપત્વાત્ । તથાહિ —

અનુષ્ઠીયમાનાત્ કર્મણશ્ચિત્તસત્ત્વે વાસનારૂપઃ સંસ્કારઃ સમુત્પદ્યતે । સ ચ સ્વર્ગનરકાદીનાં ફલાનાં ચાઙ્કુરીભાવઃ કર્મણાં વા યાગાદીનાં શક્તિરૂપતયાઽવસ્થાનમ્ । કર્તુર્વા તથાવિધભોગ્યભોક્તૃત્વરૂપં સામર્થ્યમ્ । સંસ્કારાત્ સ્મૃતિઃ સ્મૃતેશ્ચ સુખદુઃખોપભોગસ્તદનુભવાચ્ચ પુનરપિ સંસ્કારસ્મૃત્યાદયઃ । એવં ચ યસ્ય સ્મૃતિસંસ્કારાદયો ભિન્નાસ્તસ્યાઽઽનન્તર્યાભાવે દુર્લભઃ કાર્યકારણભાવઃ । અસ્માકં તુ યદાનુભવ એવ સંસ્કારીભવતિ સંસ્કારશ્ચ સ્મૃતિરૂપતયા પરિણમતે તદૈકસ્યૈવ ચિત્તસ્યાનુસન્ધાતૃત્વેન સ્થિતત્વાન્ન કાર્યકારણભાવો દુર્ઘટઃ ॥ ૯॥

ભવત્વાનન્તર્યં કાર્યકારણભાવશ્ચ વાસનાનામ્ યદા તુ પ્રથમમેવાનુભવઃ પ્રવર્તતે તદા કિં વાસનાનિમિત્ત ઉત નિર્નિમિત્ત ઇતિ શઙ્કાં વ્યપનેતુમાહ —

તાસામનાદિત્વં ચાઽઽશિષો નિત્યત્વાત્ ॥ કૈવલ્ય ૧૦॥

વૃત્તિઃ — તાસાં વાસનાનામનાદિત્વમ્ । ન વિદ્યત આદિર્યસ્ય તસ્ય ભાવસ્તત્ત્વં તાસામાદિર્નાસ્તીત્યર્થઃ । કુત ઇતિ । આશિષો નિત્યત્વાત્ । યેયમાશીર્મહામોહરૂપા સદૈવ સુખસાધનાનિ મે ભૂયાસુર્મા કદાચન તૈર્મે વિયોગો ભૂદિતિ યઃ સંકલ્પવિશેષો વાસનાનાં કારણં તસ્ય નિત્યત્વાદનાદિત્વમિત્યર્થઃ । એતદુક્તં ભવતિ — કારણસ્ય સન્નિહિતત્વાદનુભવસંસ્કારાદીનાં કાર્યાણાં પ્રવૃત્તિઃ કેન વાર્યતે । અનુભવસંસ્કારાનુબિદ્ધં સંકોચવિકાશધર્મિ ચિત્તં તત્તદભિવ્યઞ્જકવિપાકલાભાત્ તત્તત્ફલરૂપતયા પરિણમત ઇત્યર્થઃ ॥ ૧૦॥

તાસામાનન્ત્યાદ્ધાનં કથં ભવતીત્યાશઙ્ક્ય હાનોપાયમાહ —

હેતુફલાશ્રયાલમ્બનૈઃ સંગૃહીતત્વાદેષામભાવે તદભાવઃ ॥ કૈવલ્ય ૧૧॥

વૃત્તિઃ — વાસનાનામનન્તરાનુભવો હેતુસ્તસ્યાપ્યનુભવસ્ય

રાગાદયસ્તેષામવિદ્યેતિ સાક્ષાત્ પારમ્પર્યેણ હેતુઃ । ફલં શરીરાદિ સ્મૃત્યાદિ ચ । આશ્રયો બુદ્ધિસત્ત્વમ્ । આલમ્બનં યદેવાનુભવસ્ય તદેવ વાસનાનામ્ । અતસ્તૈર્હેતુફલાશ્રયાલમ્બનૈરનન્તાનામપિ વાસનાનાં સંગૃહીતત્વાત્ । એષાં હેત્વાદીનામભાવે જ્ઞાનયોગાભ્યાં દગ્ધબીજકલ્પત્વે વિહિતે નિર્મૂલત્વાન્ન વાસનાઃ પ્રરોહન્તિ ન કાર્યમારભન્ત ઇતિ તાસામભાવઃ ॥ ૧૧॥

નનુ પ્રતિક્ષણં ચિત્તસ્ય નશ્વરત્વોપલબ્ધેર્વાસનાનાં તત્ફલાનાં ચ કાર્યકારણભાવેન યુગપદભાવિત્વાદ્ભેદે કથમેકત્વમિત્યાશઙ્ક્યૈકત્વસમર્થનાયાહ —

અતીતાનાગતં સ્વરૂપતોઽસ્ત્યધ્વભેદાદ્ધર્માણામ્ ॥ કૈવલ્ય ૧૨॥

વૃત્તિઃ —ઇહાત્યન્તમસતાં ભાવાનામુત્પત્તિર્ન યુક્તિમતી તેષાં સત્ત્વસમ્બન્ધાયોગાત્ । ન હિ શશવિષાણાદીનાં ક્વચિદપિ સત્ત્વસમ્બન્ધો દૃષ્ટઃ । નિરુપાખ્યે ચ કાર્યે કિમુદ્દિશ્ય કારણાનિ પ્રવર્તેરન્ । ન હ્યસન્તં વિષયમાલોચ્ય કશ્ચિત્ પ્રવર્તતે । સતામપિ વિરોધાન્નાભાવસમ્બન્ધોઽસ્તિ । યત્ સ્વરૂપં લબ્ધસત્તાકં તત્ કથં નિરુપાખ્યતામભાવરૂપતાં વા ભજતે ન વિરુદ્ધં રૂપં સ્વીકરોતીત્યર્થઃ ।
તસ્માત્ સતામભાવાસમ્ભવાદસતાં ચોત્પત્ત્યસમ્ભવાત્ તૈસ્તૈર્ધર્મૈર્વિપરિણમમાનો ધર્મી સદૈકરૂપ એવાવતિષ્ઠતે । ધર્માસ્તુ ત્ર્યધ્વકત્વેન [ પા૦ અધિકત્વેન ] ત્રૈકાલિકત્વેન તત્ર વ્યવસ્થિતાઃ સ્વસ્મિન્ સ્વસ્મિન્નધ્વનિ વ્યવસ્થિતાઃ ન સ્વરૂપં ત્યજન્તિ । વર્તમાનેઽધ્વનિ વ્યવસ્થિતાઃ કેવલં ભોગ્યતાં ભજન્તે । તસ્માદ્ધર્માણામેવાતીતાનાગતાદ્યધ્વભેદાત્ તેનૈવ રૂપેણ કાર્યકારણભાવોઽસ્મિન્ દર્શને પ્રતિપદ્યતે । તસ્માદપવર્ગપર્યન્તમેકમેવ ચિત્તં ધર્મિતયાઽનુવર્તમાનં ન નિહ્નોતું પાર્યતે ॥ ૧૨॥

ત એતે ધર્મધર્મિણઃ કિંરૂપા ઇત્યાહ —

તે વ્યક્તસૂક્ષ્મા ગુણાત્માનઃ ॥ કૈવલ્ય ૧૩॥

વૃત્તિઃ — ય એતે ધર્મધર્મિણઃ
પ્રોક્તાસ્તે વ્યક્તસૂક્ષ્મભેદેન વ્યવસ્થિતાઃ ગુણાઃ

સત્ત્વરજસ્તમોરૂપાસ્તદાત્માનસ્તત્સ્વભાવાસ્તત્પરિણામરૂપા ઇત્યર્થઃ ।
યતઃ સત્ત્વરજસ્તમોભિઃ સુખદુઃખમોહરૂપૈઃ સર્વાસાં
બાહ્યાભ્યન્તરભેદભિન્નાનાં ભાવવ્યક્તીનામન્વયાનુગમો દૃશ્યતે ।
યદ્યદન્વયિ તત્તત્ પરિણામરૂપં દૃષ્ટમ્ । યથા ઘટાદયો
મૃદન્વિતા મૃત્પરિણામરૂપાઃ ॥ ૧૩॥

યદ્યેતે ત્રયો ગુણાઃ સર્વત્ર મૂલકારણં કથમેકો ધર્મીતિ વ્યપદેશ
ઇત્યાશઙ્ક્યાહ —

પરિણામૈકત્વાદ્વસ્તુતત્ત્વમ્ ॥ કૈવલ્ય ૧૪॥

વૃત્તિઃ — યદ્યપિ ત્રયો ગુણાસ્તથાપિ
તેષામઙ્ગાઙ્ગિભાવગમનલક્ષણો યઃ પરિણામઃ
ક્વચિત્ સત્ત્વમઙ્ગિ ક્વચિદ્રજઃ ક્વચિચ્ચ તમ
ઇત્યેવંરૂપસ્તસ્યૈકત્વાદ્વસ્તુનસ્તત્ત્વમેકમુચ્યતે । યથા — ઇયં
પૃથિવી । અયં વાયુરિત્યેવમાદિ ॥ ૧૪॥

નનુ જ્ઞાનવ્યતિરિક્તે સત્યર્થે વસ્ત્વેકમનેકં વા વક્તું યુજ્યતે । યદા
ચ વિજ્ઞાનમેવ વાસનાવશાત્ કાર્યકારણભાવેનાવસ્થિતં તથા તથા
પ્રતિભાતિ તદા કથમેતચ્છક્યતે વક્તુમિત્યાશઙ્ક્યાહ —

વસ્તુસામ્યે ચિત્તભેદાત્તયોર્વિવિક્તઃ પન્થાઃ ॥ કૈવલ્ય ૧૫॥

વૃત્તિઃ — તયોર્જ્ઞાનાર્થયોર્વિવિક્તઃ પન્થા વિવિક્તો માર્ગો
દેશ ઇતિ યાવત્ । કથમ્ । વસ્તુસામ્યે ચિત્તભેદાત્ । સમાને
વસ્તુનિ સ્ત્ર્યાદાવુપલભ્યમાને નાનાપ્રમાતૃઈણાં ચિત્તસ્ય ભેદઃ
સુખદુઃખમોહરૂપતયા સમુપલભ્યતે । તથાહિ એકસ્યાં રૂપલાવણ્યવત્યાં
યોષિતિ ઉપલભ્યમાનાયાં સરાગસ્ય સુખમુત્પદ્યતે સપત્ન્યાસ્તુ દ્વેષઃ
પરિવ્રાજકાદેર્ઘૃણેત્યેકસ્મિન્ વસ્તુનિ નાનાવિધચિત્તોદયાત્ કથં
ચિત્તકાર્યત્વં વસ્તુન એકચિત્તકાર્યત્વે વસ્ત્વેકરૂપતયૈવાઽવભાસેત
।
કિઞ્ચ ચિત્તકાર્યત્વે વસ્તુનો યદીયસ્ય ચિત્તસ્ય તદ્વસ્તુ કાર્યં
તસ્મિન્નર્થાન્તરવ્યાસક્તે તદ્વસ્તુ ન કિઞ્ચિત્ સ્યાત્ । ભવત્વિતિ
ચેન્ન । તદેવ કથમન્યૈર્બહુભિરુપલભ્યેત । ઉપલભ્યતે ચ
તસ્માન્ન ચિત્તકાર્યમ્ । અથ યુગપદ્બહુભિઃ સોઽર્થઃ ક્રિયતે તદા
બહુનિર્મિતસ્યાર્થસ્યૈકનિર્મિતાદ્વૈલક્ષણ્યં સ્યાત્ । યદા તુ વૈલક્ષણ્યં

નેષ્યતે તદા કારણભેદે સતિ કાર્યભેદસ્યાભાવે નિર્હેતુકમેકરૂપં
વા જગત્ સ્યાત્ । એતદુક્તં ભવતિ — સત્યપિ ભિન્ને કારણે યદિ
કાર્યસ્યાભેદસ્તદા સમગ્રં જગન્નાનાવિધકારણજન્યમેકરૂપં
સ્યાત્ । કારણભેદાનનુગમાત્ સ્વાતન્ત્ર્યેણ નિર્હેતુકં વા સ્યાત્ ।
યદ્યેવં કથં તેન ત્રિગુણાત્મના ચિત્તેનૈકસ્યૈવ પ્રમાતુઃ
સુખદુઃખમોહમયાનિ જ્ઞાનાનિ જન્યન્તે [પા૦ કથં તેન
ત્રિગુણાત્મનાઽર્થે નૈકસ્યૈવ પ્રમાતુઃ સુખદુઃખમોહભયાનિ જ્ઞાનાનિ
ન જન્યન્તે] । મૈવમ્ । યથાઽર્થસ્ત્રિગુણસ્તથા ચિત્તમપિ
ત્રિગુણમ્ । તસ્યાર્થપ્રતિભાસોત્પત્તૌ ધર્માદયઃ સહકારિકારણમ્ ।
તદુદ્ભવાભિભવવશાત્ કદાચિચ્ચિત્તસ્ય તેન તેન રૂપેણાભિવ્યક્તિઃ
।
તથા ચ — કામુકસ્ય સન્નિહિતાયાં યોષિતિ ધર્મસહકૃતં
ચિત્તં સત્ત્વસ્યાઙ્ગિતયા પરિણમમાનં સુખમયં ભવતિ ।
તદેવાઽધર્મસહકારિ રજસોઽઙ્ગિતયા દુઃખરૂપં સપત્નીમાત્રસ્ય
ભવતિ । તીવ્રાધર્મસહકારિતયા પરિણમમાનં તમસોઽઙ્ગિત્વેન
કોપનાયાઃ સપત્ન્યા મોહમયં ભવતિ । તસ્માદ્વિજ્ઞાનવ્યતિરેકેણાસ્તિ
ગ્રાહ્યાર્થઃ [પા૦ ગ્રાહ્યોઽર્થઃ] ।
તદેવં વિજ્ઞાનાર્થયોસ્તાદાત્મ્યવિરોધાન્ન કાર્યકારણભાવઃ । કારણાભેદે
સત્યપિ કાર્યભેદપ્રસઙ્ગાદિતિ જ્ઞાનાદ્વ્યતિરિક્તત્વમર્થસ્ય વ્યવસ્થિતમ્ ॥ ૧૫॥

યદ્યેવં જ્ઞાનં ચેત્ પ્રકાશકત્વાદ્ગ્રહણસ્વભાવમર્થશ્ચ
પ્રકાશ્યત્વાદ્ગ્રાહ્યસ્વભાવસ્તદા યુગપત્ સર્વાનર્થાન્ કથં ન ગૃહ્ણાતિ ।
ન સ્મરતિ ચેત્યાશઙ્કાં પરિહર્તુમાહ —

તદુપરાગાપેક્ષિત્વાચ્ચિત્તસ્ય વસ્તુ જ્ઞાતાજ્ઞાતમ્ ॥ કૈવલ્ય ૧૬॥

વૃત્તિઃ — તસ્યાર્થસ્યોપરાગાદાકારસમર્પણાચ્ચિત્તે બાહ્યં વસ્તુ
જ્ઞાતમજ્ઞાતં ચ ભવતિ । અયમર્થઃ — સર્વઃ પદાર્થ આત્મલાભે
ચિત્તં સામગ્રીમપેક્ષતે । નીલાદિજ્ઞાનં ચોપજાયમાનમિન્દ્રિયપ્રણાલિકયા
સમાગતમર્થોપરાગં સહકારિકારણત્વેનાપેક્ષતે । વ્યતિરિક્તસ્યાર્થસ્ય
સમ્બન્ધાભાવાદ્ગ્રહીતુમશક્યત્વાત્ ।
તતશ્ચ યેનૈવાર્થેનાસ્ય સ્વરૂપોપરાગઃ કૃતસ્તમેવાર્થં
તજ્જ્ઞાનં વ્યવહારયોગ્યતાં નયતિ । તતઃ સોઽર્થો જ્ઞાત ઉચ્યતે ।
યેન ચાઽઽકારો ન સમર્પિતઃ સ ન જ્ઞાતત્વેન વ્યવહ્રિયતે ।

યસ્મિંશ્ચાનુભૂતેઽર્થે સાદૃશ્યાદિરર્થઃ સંસ્કારમુદ્બોધયન્
સહકારિતાં પ્રતિપદ્યતે તસ્મિન્નેવાર્થે સ્મૃતિરુપજાયત ઇતિ ન સર્વત્ર
જ્ઞાનં નાપિ સ્મૃતિરિતિ ન કશ્ચિદ્વિરોધઃ ॥ ૧૬॥

યદ્યેવં પ્રમાતાપિ પુરુષો યસ્મિન્ કાલે નીલં વેદયતે ન તસ્મિન્ કાલે
પીતાદિમતશ્ચિત્તસત્ત્વસ્યાપિ કદાચિત્ ગ્રહીતૃરૂપત્વાદાકારગ્રહણે
પરિણામિત્વં પ્રાપ્તમિત્યાશઙ્કાં પરિહર્તુમાહ —

સદા જ્ઞાતાશ્ચિત્તવૃત્તયઃ તત્પ્રભોઃ પુરુષસ્યાપરિણામિત્વાત્ ॥ કૈવલ્ય ૧૭॥

વૃત્તિઃ — યા એતાશ્ચિત્તસ્ય પ્રમાણવિપર્યયાદિરૂપા વૃત્તયઃ,
તાસ્તત્પ્રભોશ્ચિત્તસ્ય ગ્રહીતુઃ પુરુષસ્ય સદા સર્વકાલમેવ
જ્ઞાતાઃ [પા૦ ગ઼્યેયાઃ] । તસ્ય ચિદ્રૂપતયાઽપરિણામિત્વાત્
પરિણામિત્વાભાવાદિત્યર્થઃ । યદ્યસૌ પરિણામી સ્યાત્ તદા પરિણામસ્ય
કાદાચિત્કત્વાત્ તાસાં ચિત્તવૃત્તીનાં સદા જ્ઞાતત્વં નોપપદ્યેત ।
અયમર્થઃ — પુરુષસ્ય ચિદ્રૂપસ્ય સદૈવાધિષ્ઠાતૃત્વેન
વ્યવસ્થિતસ્ય યદન્તરઙ્ગં નિર્મલં સત્ત્વમ્ તસ્યાપિ
સદૈવાવસ્થિતત્વાદ્યેનાર્થેનોપરક્તં ભવતિ તથાવિધસ્યાર્થસ્ય સદૈવ
ચિચ્છાયાસંક્રાન્તિસદ્ભાવસ્તસ્યાં સત્યાં સિદ્ધં જ્ઞાતૃત્વમિતિ ન
કદાચિત્ કાચિત્ પરિણામિત્વાશઙ્કા ॥ ૧૭॥

નનુ ચિત્તમેવ યદિ સત્ત્વોત્કર્ષાત્ પ્રકાશકમ્ તદા
સ્વપરપ્રકાશરૂપત્વાદાત્માનમર્થં ચ પ્રકાશયતીતિ તાવતૈવ
વ્યવહારસમાપ્તિઃ । કિં ગ્રહીત્રન્તરેણેત્યાશઙ્કામપનેતુમાહ —

ન તત્સ્વાભાસં દૃશ્યત્વાત્ ॥ કૈવલ્ય ૧૮॥

વૃત્તિઃ — તચ્ચિત્તં સ્વાભાસં સ્વપ્રકાશકં ન ભવતિ
પુરુષવેદ્યં ભવતીતિ યાવત્ । કુતઃ । દૃશ્યત્વાત્ । યત્ કિલ દૃશ્યં
તત્ દ્રષ્ટ્વેદ્યં દૃષ્ટં યથા ઘટાદિ । દૃશ્યં ચ ચિત્તં
તસ્માન્ન સ્વાભાસમ્ ॥ ૧૮॥

નનુ સાધ્યાવિશિષ્ટોઽયં હેતુઃ । દૃશ્યત્વમેવ ચિત્તસ્યાસિદ્ધમ્ ।
કિઞ્ચ સ્વબુદ્ધિસંવેદનદ્વારેણ હિતાહિતપ્રાપ્તિપરિહારરૂપા વૃત્તયો
દૃશ્યન્તે । તથાહિ — ક્રુદ્ધોઽહં ભીતોઽહમત્ર મે રાગ
ઇત્યેવમાદ્યા સંવિત્ બુદ્ધેરસંવેદને નોપપદ્યત ઇત્યાશઙ્કામપનેતુમાહ
—

એકસમયે ચોભયાનવધારણમ્ ॥ કૈવલ્ય ૧૯॥

વૃત્તિઃ — અર્થસ્ય સંવિત્તિરિદન્તયા વ્યવહારયોગ્યતાપાદનમ્ ।
અયમર્થઃ સુખહેતુર્દુઃખહેતુર્વેતિ । બુદ્ધેઃ સંવિદહમિત્યેવમાકારેણ
સુખદુઃખરૂપતયા વ્યવહારક્ષમતાપાદનમ્ । એવંવિધં ચ
વ્યાપારદ્વયમર્થપ્રત્યક્ષકાલે ન યુગપત્ કર્તું શક્યં વિરોધાત્ । ન
હિ વિરુદ્ધયોર્વ્યાપારયોર્યુગપત્ સમ્ભવોઽસ્તિ ।
અત એકસ્મિન્ કાલ ઉભયસ્ય સ્વરૂપસ્યાઽર્થસ્ય
ચાવધારયિતુમશક્યત્વાન્ન ચિત્તં સ્વપ્રકાશકં ભવતિ । કિન્તુ
એવંવિધવ્યાપારદ્વયનિષ્પાદ્યસ્ય ફલદ્વયસ્યાસંવેદનાદ્બહિર્મુખતયૈવ
સ્વનિષ્ઠત્વેન ચિત્તસ્ય સ્વયં વેદનાદર્થનિષ્ઠમેવ ફલં ન
સ્વનિષ્ઠમિત્યર્થઃ ॥ ૧૯॥

નનુ મા ભૂદ્બુદ્ધેઃ સ્વયં ગ્રહણં બુદ્ધ્યન્તરેણ
ભવિષ્યતીત્યાશઙ્ક્યાહ —

ચિત્તાન્તરદૃશ્યે બુદ્ધિબુદ્ધેરતિપ્રસઙ્ગઃ સ્મૃતિસઙ્કરશ્ચ ॥ કૈવલ્ય ૨૦॥

વૃત્તિઃ — યદિ હિ બુદ્ધિર્બુદ્ધ્યન્તરેણ વેદ્યતે સાઽપિ બુદ્ધિઃ
સ્વયમબુદ્ધા બુદ્ધ્યન્તરં પ્રકાશયિતુમસમર્થેતિ તસ્યા ગ્રાહકં [
પા૦ બોધકમ્ ] બુદ્ધ્યન્તરં કલ્પનીયં તસ્યાઽપ્યન્યદિત્યનવસ્થાનાત્
પુરુષાન્તરેણાર્થપ્રતીતિર્ન સ્યાત્ । ન હિ પ્રતીતવપ્રતીતાયામર્થઃ
પ્રતીતો ભવતિ ।
સ્મૃતિસંકરશ્ચ પ્રાપ્નોતિ — રૂપે રસે વા સમુત્પન્નાયાં
બુદ્ધૌ તદ્ગ્રાહિકાણામનન્તાનાં બુદ્ધીનાં સમુત્પત્તેર્બુદ્ધિજનિતૈઃ
સંસ્કારૈર્યદા યુગપદ્બહ્વયઃ સ્મૃતયઃ ક્રિયન્તે તદા
બુદ્ધેરપર્યવસાનાદ્બુદ્ધિસ્મૃતીનાં ચ બહ્વીનાં યુગપદુત્પત્તેઃ
કસ્મિન્નર્થે સ્મૃતિરિયમુત્પન્નેતિ જ્ઞાતુમશક્યત્વાત્ સ્મૃતીનાં સંકરઃ
સ્યાત્ । ઇયં રૂપે સ્મૃતિરિયં રસે સ્મૃતિરિતિ ન જ્ઞાયેત ॥ ૨૦॥

નનુ બુદ્ધેઃ સ્વપ્રકાશત્વાભાવે બુદ્ધ્યન્તરે ચાસંવેદને કથમયં
વિષયસંવેદનરૂપો વ્યવહાર ઇત્યાશઙ્ક્ય સ્વસિદ્ધાન્તમાહ —

ચિત્તેરપ્રતિસઙ્ક્રમાયાસ્તદાકારાપત્તૌ સ્વબુદ્ધિસંવેદનમ્ ॥ કૈવલ્ય
૨૧॥

વૃત્તિઃ — પુરુષશ્ચિદ્રૂપત્વાચ્ચિતિઃ સાऽપ્રતિસંક્રમા ।
ન વિદ્યતે પ્રતિસઙ્ક્રમોऽન્યત્ર ગમનં યસ્યાઃ સા તથોક્તા ।
અન્યેનાસઙ્કીર્ણેતિ યાવત્ । યથા ગુણા અઙ્ગાઙ્ગિભાવલક્ષણે પરિણામે
અઙ્ગિનં ગુણં સંક્રામન્તિ તદ્રૂપતામિવાऽऽપદ્યન્તે । યથા વા લોકે
પરમાણવઃ પ્રસરન્તો વિષયમારૂપયન્તિ [ પા૦ આરોપયન્તિ ]
નૈવં ચિતિશક્તિસ્તસ્યાઃ સર્વદૈકરૂપતયા સુપ્રતિષ્ઠિતત્વેન
વ્યવસ્થિતત્વાત્ ।
અતસ્તત્સન્નિધાને યદા બુદ્ધિસ્તદાકારતામાપદ્યતે ચેતનેવોપજાયતે
[ પા૦ ચેતનોપજાયતે ] બુદ્ધિવૃત્તિપ્રતિસઙ્ક્રાન્તા ચ
યદા ચિચ્છક્તિર્બુદ્ધિવૃત્તિવિશિષ્ટતયા સંવેદ્યતે [ પા૦
બુદ્ધિવૃત્ત્યાવેશાત્તથા સમ્પદ્યતે ] તદા બુદ્ધેઃ સ્વસ્યા આત્મનો
વેદનં સંવેદનં ભવતીત્યર્થઃ ॥ ૨૧॥

ઇત્થં સ્વસંવિદિતં ચિત્તં સર્વાનુગ્રહણસામર્થ્યેન
સકલવ્યવહારનિર્વાહક્ષમં ભવિષ્યતીત્યાહ —

દ્રષ્ટૃદૃશ્યોપરક્તં ચિત્તં સર્વાર્થમ્ ॥ કૈવલ્ય ૨૨॥

વૃત્તિઃ — દ્રષ્ટા પુરુષસ્તેનોપરક્તં તત્સન્નિધાનેન તદ્રૂપતામિવ
પ્રાપ્નોતિ દૃશ્યોપરક્તં વિષયોપરક્તં ગૃહીતવિષયાકારપરિણામં
યદા ભવતિ તદા તદેવ ચિત્તં સર્વાર્થગ્રહણસમર્થં ભવતિ ।
યથા નિર્મલં સ્ફટિકદર્પણાદ્યેવ પ્રતિબિમ્બગ્રહણસમર્થમ્ । એવં
રજસ્તમોભ્યામનભિભૂતં સત્ત્વં શુદ્ધત્વાચ્ચિચ્છાયાગ્રહણસમર્થં
ભવતિ । ન પુનરશુદ્ધત્વાદ્રજસ્તમસી ।
તન્ન્યગ્ભૂતરજસ્તમોરૂપમઙ્ગિતયા સત્ત્વં
નિશ્ચલપ્રદીપશિખાકારં સદૈકરૂપતયા પરિણમમાનં
ચિચ્છાયાગ્રહણસામર્થ્યાદામોક્ષપ્રાપ્તેરવતિષ્ઠતે ।
યથાऽયસ્કાન્તસન્નિધાને લોહસ્ય ચલનમાવિર્ભવત્યેવં
ચિદ્રૂપપુરુષસન્નિધાને સત્ત્વસ્યાભિવ્યઙ્ગ્યમભિવ્યજ્યતે ચૈતન્યમ્ ।
અત એવાસ્મિન્દર્શને દ્વે ચિચ્છક્તી —
નિત્યોદિતાऽભિવ્યઙ્ગ્યા ચ । નિત્યોદિતા ચિચ્છક્તિઃ
પુરુષસન્નિધાનાદભિવ્યક્તમભિવ્યઙ્ગ્યચૈતન્યં સત્ત્વમ્ । અભિવ્યઙ્ગ્યા
ચિચ્છક્તિસ્તદત્યન્તસન્નિહિતત્વાદન્તરઙ્ગં પુરુષસ્ય ભોગ્યતાં
પ્રતિપદ્યતે । તદેવ શાન્તબ્રહ્મવાદિભિઃ સાંખ્યૈઃ પુરુષસ્ય

પરમાત્મનોઽધિષ્ઠેયં કર્માનુરૂપં સુખદુઃખભોક્તૃતયા
વ્યપદિશ્યતે ।
યત્ત્વનુદ્રિક્તત્વાદેકસ્યાપિ ગુણસ્ય કદાચિત્ કસ્યચિદઙ્ગિત્વાત્ ત્રિગુણં
પ્રતિક્ષણં પરિણમમાનં સુખદુઃખમોહાત્મકમનિર્મલં તત્તસ્મિન્
કર્માનુરૂપે શુદ્ધે સત્ત્વે સ્વાકારસમર્પણદ્વારેણ સંવેદ્યતામાપાદયતિ
તચ્છુદ્ધમાદ્યં ચિત્તસત્ત્વમેવેતિ પ્રતિસઙ્ક્રાન્તચિચ્છાયમન્યતો
ગૃહીતવિષયાકારેણ ચિત્તેનોપઢૌકિતમાકારં ચિત્સઙ્ક્રાન્તિબલાત્
ચેતનાયમાનં વાસ્તવચૈતન્યાભાવેઽપિ સુખદુઃખસ્વરૂપં
ભોગમનુભવતિ । સ એવં ભોગોઽત્યન્તસન્નિધાનેન
વિવેકાગ્રહણાદભોક્તુરપિ પુરુષસ્ય ભોગ ઇતિ વ્યપદિષ્યતે ।
અનેનૈવાભિપ્રાયેણ વિન્ધ્યવાસિનોક્તમ્ — સત્ત્વતપ્યત્વમેવ
પુરુષતપ્યત્વમિતિ । અન્યત્રાપિ — પ્રતિબિમ્બે
પ્રતિબિમ્બમાનચ્છાયાસદૃશચ્છાયોદ્ભવઃ પ્રતિબિમ્બશબ્દેનોચ્યતે ।
એવં સત્ત્વેઽપિ પૌરુષેયચિચ્છાયાસદૃશચિદભિવ્યક્તિઃ
પ્રતિસઙ્ક્રાન્તિશબ્દાર્થ ઇતિ ।
નનુ પ્રતિબિમ્બં નામ નિર્મલસ્ય નિયતપરિણામસ્ય નિર્મલે દૃષ્ટમ્ ।
યથા મુખસ્ય દર્પણે । અત્યન્તનિર્મલસ્ય વ્યાપકસ્યાપરિણામિનઃ
પુરુષસ્ય તસ્માદત્યન્તનિર્મલાત્ પુરુષાદનિર્મલે સત્ત્વે કથં
પ્રતિબિમ્બનમુપપદ્યતે ।
ઉચ્યતે — પ્રતિબિમ્બનસ્ય સ્વરૂપમનવગચ્છતા ભવતેદમભ્યધાયિ ।
યૈવ સત્ત્વગતાયા અભિવ્યઙ્ગ્યાયાશ્ચિચ્છક્તેઃ પુરુષસ્ય
સાન્નિધ્યાદભિવ્યક્તિઃ સૈવ પ્રતિબિમ્બનમુચ્યતે । યાદૃશી પુરુષગતા
ચિચ્છક્તિસ્તચ્છાયાપ્યત્રાવિર્ભવતિ ।
યદપ્યુક્તમત્યન્તનિર્મલઃ પુરુષઃ કથમનિર્મલે સત્ત્વે
પ્રતિસંક્રામતીતિ તદપ્યનૈકાન્તિકમ્ । નૈર્મલ્યાદપકૃષ્ટેઽપિ
જલાદાવાદિત્યાદયઃ પ્રતિસંક્રાન્તાઃ સમુપલભ્યન્તે ।
યદપ્યુક્તમનવચ્છિન્નસ્ય નાસ્તિ પ્રતિસંક્રાન્તિરિતિ તદપ્યયુક્તં
વ્યાપકસ્યાપ્યાકાશસ્ય દર્પનાદૌ પ્રતિસંક્રાન્તિદર્શનાત્ । એવં સતિ ન
કાચિદનુપપત્તિઃ પ્રતિબિમ્બદર્શનસ્ય ।
નનુ સાત્ત્વિકપરિણામરૂપે બુદ્ધિસત્ત્વે
પુરુષસન્નિધાનાદભિવ્યઙ્ગ્યાયાશ્ચિચ્છક્તેર્બાહ્યાકારસંક્રાન્તૌ
પુરુષસ્ય સુખદુઃખરૂપો ભોગ ઇત્યુક્તમ્ તદનુપપન્નમ્ । તદેવ

ચિત્તસત્ત્વં પ્રકૃતાવપરિણતાયાં કથં સમ્ભવતિ કિમર્થશ્ચ તસ્યાઃ પરિણામઃ ।
અથોચ્યેત પુરુષસ્યાર્થોપભોગસમ્પાદનં તયા કર્તવ્યમ્ । અતઃ પુરુષાર્થકર્તવ્યતયાऽસ્યા યુક્ત એવ પરિણામઃ । તચ્ચાનુપપન્નમ્ । પુરુષાર્થકર્તવ્યતાયા એવાનુપપત્તેઃ । પુરુષાર્થો મયા કર્તવ્ય એવંવિધોऽધ્યવસાયઃ પુરુષાર્થકર્તવ્યતોચ્યતે । જડાયાશ્ચ પ્રકૃતેઃ કથં પ્રથમમેવંવિધોऽધ્યવસાયઃ । અસ્તિ ચેદધ્યવસાયઃ કથં જડત્વમ્ ।
અત્રોચ્યતે — અનુલોમપ્રતિલોમલક્ષણપરિણામદ્વયે સહજં શક્તિદ્વયમસ્તિ । તદેવ પુરુષાર્થકર્તવ્યતોચ્યતે । સા ચ શક્તિરચેતનાયા અપિ પ્રકૃતેઃ સહજૈવ । તત્ર મહદાદિમહાભૂતપર્યન્તોऽસ્યા બહિર્મુખતયાऽનુલોમઃ પરિણામઃ । પુનઃ સ્વકારણાનુપ્રવેશનદ્વારેણાસ્મિતાऽન્તઃ પરિણામઃ પ્રતિલોમઃ । ઇત્થં પુરુષસ્ય ભોગપરિસમાપ્તેઃ [પા૦ આ ભોગપરિસમપ્તેઃ] સહજશક્તિદ્વયક્ષયાત્ કૃતાર્થા પ્રકૃતિર્ન પુનઃ પરિણામમારભતે । એવંવિધાયાં ચ પુરુષાર્થકર્તવ્યતાયાં જડાયા અપિ પ્રકૃતેર્ન કાચિદનુપપત્તિઃ ।
નનુ યદીદૃશી શક્તિઃ સહજૈવ પ્રધાનસ્યાસ્તિ તત્ કિમર્થં મોક્ષાર્થિભિર્મોક્ષાય યત્નઃ ક્રિયતે । મોક્ષસ્ય ચાનર્થનીયત્વે તદુપદેશકશાસ્ત્રસ્યાનર્થક્યં સ્યાત્ । ઉચ્યતે — યોऽયં પ્રકૃતિપુરુષયોરનાદિર્ભોગ્યભોક્તૃત્વલક્ષણઃ [ પા૦ ભોક્તૃભાબલક્ષણઃ ] સમ્બન્ધસ્તસ્મિન્ સતિ વ્યક્તચેતનાયાઃ પ્રકૃતેઃ કર્તૃત્વાભિમાનાદ્દુઃખાનુભવે સતિ કથમિયં દુઃખનિવૃત્તિરાત્યન્તિકી મમ સ્યાદિતિ ભવત્યેવાધ્યવસાયઃ । અતો દુઃખનિવૃત્ત્યુપાયોપદેશકશાસ્ત્રોપદેશાપેક્ષાऽસ્ત્યેવ પ્રધાનસ્ય । તથાભૂતમેવ કર્માનુરૂપં બુદ્ધિસત્ત્વં શાસ્ત્રોપદેશસ્ય વિષયઃ । દર્શનાન્તરેષ્વપ્યેવંવિધ એવાવિદ્યાસ્વભાવઃ શાસ્ત્રેऽધિક્રિયતે [ અભિધીયતે ] ।
સ ચ મોક્ષાય પ્રયતમાન એવંવિધશાસ્ત્રોપદેશં સહકારિણમપેક્ષ્ય મોક્ષાખ્યં ફલમાસાદયતિ । સર્વાણ્યેવ કાર્યાણિ પ્રાપ્તાયાં સામગ્ર્યામાત્માનં લભન્તે । અસ્ય પ્રતિલોમપરિણામદ્વારેણૈવોત્પાદ્યસ્ય મોક્ષાખ્યસ્ય કાર્યસ્યેદૃશ્યેવ સામગ્રી પ્રમાણેન નિશ્ચિતા

પ્રકારાન્તરેણાનુપપત્તેઃ । અતસ્તાં વિના કથં ભવિતુમર્હતિ ।
અતઃ સ્થિતમેતત્ — સંક્રાન્તવિષયોપરાગમભિવ્યક્તચિચ્છાયં બુદ્ધિસત્ત્વં વિષયનિશ્ચયદ્વારેણ સમગ્રાં લોકયાત્રાં નિર્વાહયતીતિ ।
એવંવિધમેવ ચિત્તં પશ્યન્તો ભ્રાન્તાઃ સ્વસંવેદનં ચિત્તં ચિત્તમાત્રં ચ જગદિત્યેવં બ્રુવાણાઃ પ્રતિબોધિતા ભવન્તિ ॥ ૨૨॥

નનુ યદ્યેવંવિધાદેવ ચિત્તાત્ સકલવ્યવહારનિષ્પત્તિઃ કથં પ્રમાણશૂન્યો દ્રષ્ટાઽભ્યુપગમ્યત ઇત્યાશઙ્ક્ય દ્રષ્ટુઃ પ્રમાણમાહ —

તદસઙ્ખ્યેયવાસનાભિશ્ચિત્રમપિ પરાર્થં સંહત્યકારિત્વાત્ ॥ કૈવલ્ય ૨૩॥

વૃત્તિઃ — તદેવ ચિત્તં સંખ્યાતુમશક્યાભિર્વાસનાભિશ્ચિત્રમપિ નાનારૂપમપિ પરાર્થં પરસ્ય સ્વામિનો ભોક્તુર્ભોગાપવર્ગલક્ષણમર્થં સાધયતીતિ । કુતઃ । સંહત્યકારિત્વાત્ સંહત્ય સમ્ભૂય મિલિત્વાઽર્થક્રિયાકારિત્વાત્ । યચ્ચ સંહત્યાર્થક્રિયાકારિ તત્ પરાર્થં દૃષ્ટમ્ । યથા શયનાસનાદિ । સત્ત્વરજસ્તમાંસિ ચ ચિત્તલક્ષણપરિણામભાઞ્જિ સંહત્યકારીણિ ચાતઃ પરાર્થાનિ । યઃ પરઃ સ પુરુષઃ ।
નનુ યાદૃશેન શયનાસનાદીનાં પરેણ શરીરવતા પારાર્થ્યમુપલબ્ધં તદ્દૃષ્ટાન્તબલેન તાદૃશ એવ પરઃ સિધ્યતિ । યાદૃશશ્ચ ભવતાં પરોઽસંહતરૂપોઽભિપ્રેતસ્તદ્વિપરીતસ્ય સિદ્ધેરયમિષ્ટવિઘાતકૃદ્ધેતુઃ ।
ઉચ્યતે — યદ્યપિ સામાન્યેન પરાર્થમાત્રે વ્યાપ્તિર્ગૃહીતા તથાઽપિ સત્ત્વાદિવિલક્ષણધર્મિપર્યાલોચનયા તદ્વિલક્ષણ એવ ભોક્તા પરઃ સિધ્યતિ । યથા ચન્દનાવૃતે શિખરિણિ વિલક્ષણાદ્ધૂમાદ્વહ્નિરનુમીયમાન ઇતરવહ્નિવિલક્ષણશ્ચન્દનપ્રભવ એવ પ્રતીયતે । એવમિહાપિ વિલક્ષણસ્ય સત્ત્વાખ્યસ્ય ભોગ્યસ્ય પરાર્થત્વેઽનુમીયમાને તથાવિધ એવ ભોક્તાઽધિષ્ઠાતા પરશ્ચિન્માત્રરૂપોઽસંહતઃ સિધ્યતિ ।
યદિ ચ તસ્ય પરત્વં સર્વોત્કૃષ્ટત્વમેવં પ્રતીયતે તથાપિ તામસેભ્યો વિષયેભ્યઃ પ્રકૃષ્યતે શરીરં પ્રકાશરૂપેન્દ્રિયાશ્રયત્વાત્ । તસ્માદપિ પ્રકૃષ્યન્તે ઇન્દ્રિયાણિ ।

તતોઽપિ પ્રકૃષ્ટં સત્ત્વં પ્રકાશરૂપમ્ । તસ્યાપિ યઃ પ્રકાશકઃ પ્રકાશ્યવિલક્ષણઃ સ ચિદ્રૂપ એવ [ પા૦ ઇવ ] ભવતીતિ કુતસ્તસ્ય સંહતત્વમ્ ॥ ૨૩॥

ઇદાનીં શાસ્ત્રફલં કૈવલ્યં નિર્ણેતું દશભિઃ સૂત્રૈરુપક્રમતે —

વિશેષદર્શિન આત્મભાવભાવનાનિવૃત્તિઃ ॥ કૈવલ્ય ૨૪॥

વૃત્તિઃ — એવં સત્ત્વપુરુષયોરન્યત્વે સાધિતે યસ્તયોર્વિશેષં પશ્યતિ — અયમસ્માદન્ય ઇત્યેવંરૂપમ્ — તસ્ય વિજ્ઞાતચિત્તરૂપસત્ત્વસ્ય ચિત્તે યાઽઽત્મભાવભાવના સા નિવર્તતે । ચિત્તમેવ કર્તૃ જ્ઞાતૃ ભોક્ત્રિત્યભિમાનો નિવર્તતે ॥ ૨૪॥

તસ્મિન્ સતિ કિં ભવતીત્યાહ —

તદા વિવેકનિમ્નં કૈવલ્યપ્રાગ્ભારં ચિત્તમ્ ॥ કૈવલ્ય ૨૫॥

વૃત્તિઃ — યદસ્યાજ્ઞાનનિમ્નપથં બહિર્મુખં વિષયોપભોગફલં ચિત્તમાસીત્તદિદાનીં વિવેકનિમ્નં વિવેકમાર્ગમન્તર્મુખં કૈવલ્યપ્રાગ્ભારં કૈવલ્યપ્રારમ્ભં સમ્પદ્યત ઇતિ ॥ ૨૫॥

અસ્મિંશ્ચ વિવેકવાહિનિ ચિત્તે યેઽન્તરાયાઃ પ્રાદુર્ભવન્તિતેષાં હેતુપ્રતિપાદનદ્વારેણ ત્યાગોપાયમાહ —

તચ્છિદ્રેષુ પ્રત્યયાન્તરાણિ સંસ્કારેભ્યઃ ॥ કૈવલ્ય ૨૬॥

વૃત્તિઃ — તસ્મિન્ સમાધૌ સ્થિતસ્ય છિદ્રેષ્વન્તરાયેષુ યાનિ પ્રત્યયાન્તરાણિ વ્યુત્થાનરૂપાણિ જ્ઞાનાનિ પ્રાગ્ભૂતેભ્યઃ વ્યુત્થાનાનુભવજેભ્યઃ સંસ્કારેભ્યોઽહં મમેત્યેવંરૂપાણિ ક્ષીયમાણેભ્યોઽપિ પ્રાદુર્ભવન્તિ । અન્તઃકરણોચ્છિત્તિદ્વારેણ તેષાં હાનં કર્તવ્યમિત્યુક્તં ભવતિ ॥ ૨૬॥

હાનોપાયશ્ચ પૂર્વમેવોક્ત ઇત્યાહ —

હાનમેષાં ક્લેશવદુક્તમ્ ॥ કૈવલ્ય ૨૭॥

વૃત્તિઃ — યથા ક્લેશાનામવિદ્યાદીનાં હાનં પૂર્વમુક્તમ્ (૨।૧૦-૧૧) તથા સંસ્કારાણામપિ કર્તવ્યમ્ । યથા તે જ્ઞાનાગ્નિના પ્લુષ્ટા દગ્ધબીજકલ્પા ન પુનશ્ચિત્તભૂમૌ પ્રરોહં લભન્તે તથા સંસ્કારા અપિ ॥ ૨૭॥

એવં ચ પ્રત્યયાન્તરાન્તરાનુદયે સ્થિરીભૂતે સમાધૌ યાદૃશસ્ય યોગિનઃ સમાધેઃ પ્રકર્ષપ્રાપ્તિર્ભવતિ તથાવિધમુપાયમાહ —

પ્રસઙ્ખ્યાનેઽપ્યકુસીદસ્ય સર્વથા વિવેકખ્યાતેર્ધર્મમેઘઃ સમાધિઃ ॥ કૈવલ્ય ૨૮॥

વૃત્તિઃ — પ્રસંખ્યાનં યાવતાં તત્ત્વાનાં યથાક્રમં વ્યવસ્થિતાનાં પરસ્પરવિલક્ષણસ્વરૂપવિભાવનમ્ । તસ્મિન્ સત્યપ્યકુસીદસ્ય ફલમલિપ્સોઃ પ્રત્યયાન્તરાણામનુદયે સર્વપ્રકારવિવેકખ્યાતેઃ પરિશેષાદ્ધર્મમેઘઃ સમાધિર્ભવતિ । પ્રકૃષ્ટમશુક્લકૃષ્ણં ધર્મં પરમપુરુષાર્થસાધકં મેહતિ સિઞ્ચતીતિ ધર્મમેઘઃ । અનેન પ્રકૃષ્ટધર્મસ્યૈવ જ્ઞાનહેતુત્વમિત્યુપપાદિતં ભવતિ ॥ ૨૮॥

તસ્માદ્ધર્મમેઘાત્ કિં ભવતીત્યાહ —

તતઃ ક્લેશકર્મનિવૃત્તિઃ ॥ કૈવલ્ય ૨૯॥

વૃત્તિઃ — ક્લેશાનામવિદ્યાદીનામભિનિવેશાન્તાનાં કર્મણાં ચ શુક્લાદિભેદેન ત્રિવિધાનાં જ્ઞાનોદયાત્ પૂર્વપૂર્વકારણનિવૃત્યા નિવૃત્તિર્ભવતિ ॥ ૨૯॥

તેષુ નિવૃત્તેષુ કિં ભવતીત્યાહ —

તદા સર્વાવરણમલાપેતસ્ય જ્ઞાનસ્યાનન્ત્યાજ્જ્ઞેયમલ્પમ્ ॥ કૈવલ્ય ૩૦॥

વૃત્તિઃ — આવ્રિયતે ચિત્તમેભિરિત્યાવરણાનિ ક્લેશાસ્ત એવ મલાસ્તેભ્યોઽપેતસ્ય તદ્વિરહિતસ્ય જ્ઞાનસ્ય ગગનનિભસ્યાનન્ત્યાદનવચ્છેદાજ્જ્ઞેયમલ્પં ગણનાસ્પદં ભવતિ । અક્લેશેનૈવ સર્વં જ્ઞેયં જાનાતીત્યર્થઃ ॥ ૩૦॥

તતઃ કિમિત્યાહ —

તતઃ કૃતાર્થાનાં પરિણામક્રમસમાપ્તિર્ગુણાનામ્ ॥ કૈવલ્ય ૩૧॥

વૃત્તિઃ — કૃતો નિષ્પાદિતો ભોગાપવર્ગલક્ષણઃ પુરુષાર્થઃ પ્રયોજનં યૈસ્તે કૃતાર્થાઃ । ગુણાઃ સત્ત્વરજસ્તમાંસિ । તેષાં પરિણામ આપુરુષાર્થસમાપ્તેરાનુલોમ્યેન પ્રાતિલોમ્યેનાઙ્ગાઙ્ગિભાવઃ સ્થિતિલક્ષણઃ । તસ્ય યોઽસૌ ક્રમો વક્ષ્યમાણસ્તસ્ય પરિસમાપ્તિર્નિષ્ઠા । ન પુનરુદ્ભવ ઇત્યર્થઃ ॥ ૩૧॥

ક્રમસ્યોક્તસ્ય લક્ષણમાહ —

ક્ષણપ્રતિયોગી પરિણામાપરાન્તનિર્ગ્રાહ્યઃ ક્રમઃ ॥ કૈવલ્ય ૩૨॥

વૃત્તિઃ — ક્ષણોઽલ્પીયાન્ કાલસ્તસ્ય યોઽસૌ પ્રતિયોગી
ક્ષણવિલક્ષણઃ પરિણામાપરાન્તનિર્ગ્રાહ્યોઽનુભૂતેષુ ક્ષણેષુ
પશ્ચાત્ સંકલનબુદ્ધ્યૈવ યો ગૃહ્યતે સ ક્ષણાનાં ક્રમ ઉચ્યતે ।
ન હ્યનનુભૂતેષુ ક્રમઃ પરિજ્ઞાતું શક્યઃ ॥ ૩૨॥

ઇદાનીં ફલભૂતસ્ય કૈવલ્યસ્યાસાધારણસ્વરૂપમાહ —

પુરુષાર્થશૂન્યાનાં ગુણાનાં પ્રતિપ્રસવઃ કૈવલ્યં સ્વરૂપપ્રતિષ્ઠા
વા ચિતિશક્તેરિતિ ॥ કૈવલ્ય ૩૩॥

[ ચિતિશક્તિઃ ઇતિ બહુસમ્મતઃ સૂત્રપાઠઃ । ]

વૃત્તિઃ — સમાપ્તભોગાપવર્ગલક્ષણપુરુષાર્થાનાં ગુણાનાં યઃ
પ્રતિપ્રસવઃ પ્રતિલોમસ્ય પરિણામસ્ય સમાપ્તૌ વિકારાનુદ્ભવો યદિ
વ ચિતિશક્તેર્વૃત્તિસારૂપ્યનિવૃત્તૌ સ્વરૂપમાત્રેઽવસ્થાનં તત્
કૈવલ્યમુચ્યતે ॥ ૩૩॥

તદેવં સિદ્ધ્યન્તરેભ્યો વિલક્ષણાં સર્વસિદ્ધિમૂલભૂતાં
સમાધિસિદ્ધિમભિધાય જાત્યન્તરપરિણામલક્ષણસ્ય ચ
સિદ્ધિવિશેષસ્ય પ્રકૃત્યાપૂરણમેવ કારણમિત્યુપપાદ્ય
ધર્માદીનાં પ્રતિબન્ધકનિવૃત્તમાત્રે એવ સામર્થ્યમિતિ
પ્રદર્શ્ય નિર્માણચિત્તાનામસ્મિતામાત્રાદુદ્ભવ ઇત્યુક્ત્વા તેષાં
ચ યોગિચિત્તમેવાધિષ્ઠાપકમિતિ પ્રદર્શ્ય યોગિચિત્તસ્ય
ચિત્તાન્તરવૈલક્ષણ્યમભિધાય તત્કર્મણામલૌકિકત્વં
ચોપપાદ્ય વિપાકાનુગુણાનાં વાસનાનામભિવ્યક્તિસામર્થ્યં
કાર્યકારણયોશ્ચૈક્યપ્રતિપાદનેન વ્યવહિતાનામપિ
વાસનાનામાનન્તર્યમુપપાદ્ય તાસામાનન્ત્યેઽપિ હેતુફલાદિદ્વારેણ
હાનમુપદર્શ્ય અતીતાદિષ્વધ્વસુ ધર્માણાં સદ્ભાવમુપપાદ્ય
વિજ્ઞાનવાદં નિરાકૃત્ય સાકારવાદં ચ પ્રતિષ્ઠાપ્ય પુરુષસ્ય
જ્ઞાતૃત્વમુક્ત્વા ચિત્તદ્વારેણ સકલવ્યવહારનિષ્પત્તિમુપપાદ્ય
પુરુષસત્ત્વે પ્રમાણમુપદર્શ્ય કૈવલ્યનિર્ણયાય દશભિઃ
સૂત્રૈઃ ક્રમેણોપયોગિનોઽર્થાનભિધાય શાસ્ત્રાન્તરેઽપ્યેતદેવ
કૈવલ્યમિત્યુપપાદ્ય કૈવલ્યસ્વરૂપં નિર્ણીતમિતિ વ્યાકૃતઃ કૈવલ્યપાદઃ ।

[ ઇહ શ્રીભોજદેવસ્ય રાજમાર્તણ્ડવૃત્તિર્વસ્તુતઃ સમાપ્તા ।

તથાઽપિ કતિપયાનિ પૃષ્ઠાનિ પ્રલાપપૂર્ણાનિ સંયોજિતાન્યસ્મિન્ સ્થાને કેનચિત્ પાષણ્ડેનાઽયૌક્તિકાનિ તિરસ્કૃતાનિ ચ સર્વૈરપિ યોગિભિઃ । ન કેવલં સર્વાન્યપિ દર્શનાનિ ખણ્ડિતાનિ કિઞ્ચિદ્વેદવિરુદ્ધં મતમપિ તેન પ્રચારિતમ્ । જિજ્ઞાસોઃ પાઠકસ્ય કૌતૂહલનિવૃત્ત્યર્થમેતાનિ પૃષ્ઠાન્યત્ર સમાવિષ્ટાનિ । ]

[ ન કેવલમસ્મદ્દર્શને ક્ષેત્રજ્ઞઃ
કૈવલ્યાવસ્થાયામેવંવિધશ્ચિદ્રૂપઃ યાવદ્દર્શનાન્તરેષ્વપિ
વિમૃષ્યમાણ એવંરૂપોઽવતિષ્ઠતે । તથાહિ — સંસારદશાયામાત્મા
કર્તૃત્વભોક્તૃત્વાનુસન્ધાતૃત્વમયઃ પ્રતીયતેઽન્યથા
યદ્યયમેકઃ ક્ષેત્રજ્ઞસ્તથાવિધો ન સ્યાત્તદા જ્ઞાનક્ષણાનામેવ
પૂર્વાપરાનુસન્ધાતૃશૂન્યાનામાત્મભાવે નિયતઃ કર્મફલસમ્બન્ધો ન
સ્યાત્ કૃતહાનાકૃતાભ્યાગમપ્રસઙ્ગશ્ચ ।
યદિ યેનૈવ શાસ્ત્રોપદિષ્ટમનુષ્ઠિતં કર્મ તસ્યૈવ ભોક્તૃત્વં
ભવેત્તદા હિતાહિતપ્રાપ્તિપરિહારાય સર્વસ્ય પ્રવૃત્તિર્ઘટેત
સર્વસ્યૈવ વ્યવહારસ્ય હાનોપાદાનલક્ષણસ્યાનુસન્ધાનેનૈવ
પ્રાપ્તત્વાજ્જ્ઞાનક્ષણાનાં પરસ્પરભેદેનાનુસન્ધાનશૂન્યત્વાત્
તદનુસન્ધાનાભાવે કસ્યચિદપિ વ્યવહારાનુપપત્તેઃ કર્તા
ભોક્તાઽનુસન્ધાતા યઃ સ આત્મેતિ વ્યવસ્થાપ્યતે ।
મોક્ષદશાયાં તુ
સકલગ્રાહ્યગ્રાહકલક્ષણવ્યવહારાભાવાચ્ચૈતન્યમાત્રમેવ
તસ્યાવશિષ્યતે તચ્ચૈતન્યં ચિતિમાત્રત્વેનૈવોપપદ્યતે
ન પુનરાત્મસંવેદનેન । યસ્માદ્વિષયગ્રહણસમર્થનમેવ
ચિતે રૂપં નાત્મગ્રાહકત્વમ્ । તથાહિ — અર્થશ્ચિત્યા
ગૃહ્યમાણોઽયમિતિ ગૃહ્યતે સ્વરૂપં ગૃહ્યમાણમહમિતિ
ન પુનર્યુગપદ્બહિર્મુખતાઽન્તર્મુખતાલક્ષણવ્યાપારદ્વયં
પરસ્પરવિરુદ્ધં કર્તું શક્યમ્ । અત એકસ્મિન્ સમયે વ્યાપારદ્વયસ્ય
કર્તુમશક્યત્વાચ્ચિદ્રૂપતયૈવાવશિષ્યતે । અતો મોક્ષાવસ્થાયાં
નિવૃત્તાધિકારેષુ ગુણેષુ ચિન્માત્રરૂપ એવાત્માઽવતિષ્ઠત્ ઇત્યેવ
યુક્તમ્ ।
સંસારદશાયાં તુ એવમ્ભૂતસ્યૈવ કર્તૃત્વં
ભોક્તૃત્વમનુસન્ધાતૃત્વં ચ સર્વમુપપદ્યતે ।

તથાહિ — યોऽયં પ્રકૃત્યા સહાનાદિર્નૈસર્ગિકોऽસ્ય ભોગ્યભોક્તૃત્વલક્ષણસમ્બન્ધોऽવિવેકખ્યાતિમૂલઃ । અસ્મિન્ સતિ પુરુષાર્થકર્તવ્યતારૂપશક્તિદ્વયસદ્ભાવે યા મહદાદિભાવેન પરિણતિસ્તસ્યાં સંયોગે સતિ યદાત્મનોऽધિષ્ઠાતૃત્વં ચિચ્છાયાસમર્પણસામર્થ્યં બુદ્ધિસત્ત્વસ્ય ચ સંક્રાન્તચિચ્છાયાગ્રહણસામર્થ્યં ચિદવષ્ટબ્ધાયાશ્ચ બુદ્ધેર્યોऽયં કર્તૃત્વભોક્તૃત્વાધ્યવસાયસ્તત એવ સર્વસ્યાનુસન્ધાનપૂર્વકસ્ય વ્યવહારસ્ય નિષ્પત્તેઃ કિમન્યૈઃ ફલ્ગુભિઃ કલ્પનાજલ્પૈઃ । યદિ પુનરેવમ્ભૂતમાર્ગવ્યતિરેકેણ પારમાર્થિકમાત્મનઃ કર્તૃત્વાદ્યઙ્ગીક્રિયેત તદાऽસ્ય પરિણામિત્વપ્રસઙ્ગઃ । પરિણામિત્વાચ્ચાનિત્યત્વે તસ્યાऽऽત્મત્વમેવ ન સ્યાત્ । યથા હ્યેકસ્મિન્નેવ સમયે એકેનૈકરૂપેણ ન પરસ્પરવિરુદ્ધાવસ્થાનુભવઃ સમ્ભવતિ । તથાહિ — યસ્યામવસ્થાયામાત્મસમવેતે સુખે સમુત્પન્ને તસ્યાનુભવિતૃત્વં ન તસ્યામેવાવસ્થાયાં દુઃખાનુભવિતૃત્વમ્ । અતોऽવસ્થાનાનાત્વાત્ તદભિન્નસ્યાવસ્થાવતો નાનાત્વમ્ । નાનાત્વાચ્ચ પરિણામિત્વાન્નાત્મત્વમ્ । નાપિ નિત્યત્વમ્ । અત એવ શાન્તબ્રહ્મવાદિભિઃ સાંખ્યૈરાત્મનઃ સદૈવ સંસારદશાયાં મોક્ષદશાયાં ચૈકં રૂપમઙ્ગીક્રિયતે ।

યે તુ વેદાન્તવાદિનશ્ચિદાનન્દમયત્વમાત્મનો મોક્ષં મન્યન્તે તેષાં ન યુક્તઃ પક્ષઃ । તથાહિ — આનન્દસ્ય સુખસ્વરૂપત્વાત્ સુખસ્ય ચ સદૈવ સંવેદ્યમાનતયૈવ પ્રતિભાસાત્ સંવેદ્યમાનત્વં ચ સંવેદનવ્યતિરેકેણાનુપપન્નમિતિ સંબેદ્યસંવેદનયોર્દ્વયોરભ્યુપગમાદદ્વૈતહાનિઃ । અથ સુખાત્મકત્વમેવ તસ્યોચ્યેત તદ્વિરુદ્ધધર્માધ્યાસાદનુપપન્નમ્ । ન હિ સંવેદનં સંવેદ્યં ચૈકં ભવિતુમર્હતીતિ ।

કિઞ્ચાદ્વૈતવાદિભિઃ કર્માત્મપરમાત્મભેદેનાત્મા દ્વિવિધઃ સ્વીકૃતઃ । ઇત્થં ચ તત્ર યેનૈવ રૂપેણ સુખદુઃખભોક્તૃત્વં કર્માત્મનસ્તેનૈવ રૂપેણ યદિ પરમાત્મનઃ સ્યાત્તદા કર્માત્મવત્ પરમાત્મનઃ પરિણામિત્વમવિદ્યાસ્વભાવત્વં ચ સ્યાત્ । અથ ન તસ્ય સાક્ષાદ્ભોક્તૃત્વં કિન્તુ તદુપઢૌકિતમુદાસીનતયાऽધિષ્ઠાતૃત્વેન સ્વીકરોતિ તદાऽસ્મદ્દર્શનાનુપ્રવેશઃ । આનન્દરૂપતા ચ પૂર્વમેવ નિરાકૃતા ।

કિઞ્ચાવિદ્યાસ્વભાવત્વે નિઃસ્વભાવત્વાત્ કર્માત્મનાં કઃ શાસ્ત્રાધિકારી ।
ન તાવન્નિત્યનિર્મુક્તત્વાત્ પરમાત્મા । નાપ્યવિદ્યા સ્વભાવત્વાત્ કર્માત્મા ।
તતશ્ચ સકલશાસ્ત્રવૈયર્થ્યપ્રસઙ્ગઃ । અવિદ્યામયત્વે ચ
જગતોઽઙ્ગીક્રિયમાણે કસ્યાવિદ્યેતિ વિચાર્યતે । ન તાવત્ પરમાત્મનો
નિત્યમુક્તત્વાદ્વિદ્યારૂપત્વાચ્ચ । કર્માત્મનોઽપિ પરમાર્થતો
નિઃસ્વભાવતયા શશવિષાણપ્રખ્યત્વે કથમવિદ્યાસમ્બન્ધઃ ।
અથોચ્યતે નમ । એતદેવાવિદ્યાયા અવિદ્યાત્વં યદવિચારણીયત્વમ્ ।
યૈવ હિ વિચારેણ દિનકરસ્પૃષ્ટનીહારવદ્વિમલમુપયાતિ
સાઽવિદ્યેત્યુચ્યતે । મૈવમ્ । યદ્વસ્તુ કિઞ્ચિત્ કાર્યં કરોતિ
તદવશ્યં કુતશ્ચિદ્ભિન્નમભિન્નં વા વક્તવ્યમ્ । અવિદ્યાયાશ્ચ
સંસારલક્ષણકાર્યકર્તૃત્વમવશ્યમઙ્ગીકર્તવ્યમ્ । તસ્મિન્
સત્યપિ યદ્યનિર્વાચ્યત્વમુચ્યતે તદા કસ્યચિદપિ વાચ્યત્વં ન સ્યાત્
બ્રહ્મણોઽપ્યવાચ્યત્વપ્રસક્તિઃ । તસ્માદધિષ્ઠાતૃતારૂપવ્યતિરેકેણ
નાન્યદાત્મનો રૂપમુપપદ્યતે । અધિષ્ઠાતૃત્વં ચ ચિદ્રૂપત્વમેવ
તદ્વ્યતિરિક્તસ્ય ધર્મસ્ય કસ્યચિત્ પ્રમાણાનુપપત્તેઃ ।
યૈરપિ નૈયાયિકાદિભિરાત્મા ચેતનાયોગાચ્ચેતન ઇત્યુચ્યતે ચેતનાપિ
તસ્ય મનઃસંયોગજા । તથાહિ — ઇચ્છાજ્ઞાનપ્રયત્નાદયો
યે ગુણાસ્તસ્ય વ્યવહારદશાયામાત્મમનઃસંયોગાદુત્પદ્યન્તે
તૈરેવ ચ ગુણૈઃ સ્વયં જ્ઞાતા કર્તા ભોક્તેતિ વ્યપદિશ્યતે ।
મોક્ષદશાયાં તુ મિથ્યાજ્ઞાનનિવૃત્તૌ તન્મૂલાનાં દોષાણામપિ
નિવૃત્તિઃ । તેષાં બુદ્ધ્યાદીનાં વિશેષગુણાનામત્યન્તોચ્છિત્તિઃ
સ્વરૂપમાત્રપ્રતિષ્ઠત્વમાત્મનોઽઙ્ગીકૃતં તેષામયુક્તઃ પક્ષઃ ।
યતસ્તસ્યાં દશાયાં નિત્યત્વવ્યાપકત્વાદયો ગુણા આકાશાદીનામપિ
સન્તિ । અતસ્તદ્વૈલક્ષણ્યેનાત્મનશ્ચિદ્રૂપત્વમવશ્યમઙ્ગીકાર્યમ્ ।
આત્મત્વવિલક્ષણજાતિયોગ ઇતિ ચેન્ન । સર્વસ્યૈવ તજ્જાતિયોગઃ
સમ્ભવતિ । અતો જાતિભ્યો વૈલક્ષણ્યમાત્મનોઽવશ્યમઙ્ગીકર્તવ્યમ્ ।
તસ્યાધિષ્ઠાતૃત્વં ચિદ્રૂપતયૈવ ઘટતે નાન્યથા ।
યૈરપિ મીમાંસકૈઃ કર્મકર્તૃરૂપ આત્માઽઙ્ગીક્રિયતે તેષામપિ
ન યુક્તઃ પક્ષઃ । તથાહિ — અહંપ્રત્યયગ્રાહ્ય આત્મેતિ તેષાં
પ્રતિજ્ઞા । અહંપ્રત્યયે ચ કર્તૃત્વં કર્મત્વં ચાત્મન એવ । ન
ચૈતદ્વિરુદ્ધત્વાદુપપદ્યતે । કર્તૃત્વં પ્રમાતૃત્વં કર્મત્વં
ચ પ્રમેયત્વમ્ । ન ચૈતદ્વિરુદ્ધધર્માધ્યાસો યુગપદેકસ્ય ઘટતે ।

યદ્વિરુદ્ધધર્માધ્યસ્તં ન તદેકં યથા ભાવાભાવૌ । વિરુદ્ધે ચ
કર્તૃત્વકર્મત્વે । અથોચ્યતે — ન કર્તૃત્વકર્મત્વયોર્વિરોધઃ
કિન્તુ કર્તૃત્વકરણત્વયોઃ । નૈતદ્યુક્તમ્ । વિરુદ્ધધર્માધ્યાસસ્ય
તુલ્યત્વાત્ કર્તૃત્વકર્મત્વયોરેવ વિરોધો ન કર્તૃત્વકર્મત્વયોઃ ।
તસ્માદહંપ્રત્યયગ્રાહ્યત્વંપરિહૃત્યાત્મનોઽધિષ્ઠાતૃત્વમેવોપપન્નમ્ ।
તચ્ચ ચેતનત્વમેવ ।
યૈરપિ દ્રવ્યબોધપર્યાયભેદેનાત્મનોઽવ્યાપકસ્ય શરીરપરિમાણસ્ય
પરિણામિત્વમિષ્યતે તેષામુત્થાનપરાહત એવ પક્ષઃ । પરિણામિત્વે
ચિદ્રૂપતાહાનિઃ । ચિદ્રૂપતાઽભાવે કિમાત્મન આત્મત્વમ્ । તસ્માદાત્મન
આત્મત્વમિચ્છતા ચિદ્રૂપત્વમેવાઙ્ગીકર્તવ્યમ્ । તચ્ચાધિષ્ઠાતૃત્વમેવ
।
કેચિત્ કર્તૃરૂપમેવાત્માનમિચ્છન્તિ । તથાહિ — વિષયસાન્નિધ્યે યા
જ્ઞાનલક્ષણા ક્રિયા સમુત્પન્ના તસ્યા વિષયસંવિત્તિઃ ફલમ્ । તસ્યાં
ચ ફલરૂપાયાં સંવિત્તૌ સ્વરૂપં પ્રકાશરૂપતયા પ્રતિભાસતે ।
વિષયશ્ચ ગ્રાહ્યતયા । આત્મા ચ ગ્રાહકતયા । ઘટમહં
જાનામીત્યાકારેણ તસ્યાઃ સમુત્પત્તેઃ । ક્રિયાયાશ્ચ કારણં કર્તૈવ
ભવતીત્યતઃ કર્તૃત્વં ભોક્તૃત્વં ચાત્મનો રૂપમિતિ । તદનુપપન્નમ્ ।
યસ્માત્તાસાં સંવિત્તીનાં સ કિં કર્તૃત્વં યુગપત્ પ્રતિપદ્યતે ક્રમેણ
વા । યુગપત્ કર્તૃત્વે ક્ષણાન્તરે તસ્ય કર્તૃત્વં ન સ્યાત્ । અથ
ક્રમેણ કર્તૃત્વં તદૈકરૂપસ્ય ન ઘટતે । એકેન રૂપેણ ચેત્તસ્ય
કતૃત્વં તદૈકસ્ય સદૈવ સન્નિહિતત્વાત્ સર્વં ફલમેકરૂપં
સ્યાત્ । અથ નાનારૂપતયા તસ્ય કર્તૃત્વમ્ । તદા પરિણામિત્વમ્ ।
પરિણામિત્વાચ્ચ ન ચિદ્રૂપત્વમ્ । અતશ્ચિદ્રૂપત્વમાત્મન ઇચ્છદ્ભિર્ન
સાક્ષાત્કર્તૃત્વમઙ્ગીકર્તવ્યમ્ । યાદૃશમસ્માભિઃ કર્તૃત્વમાત્મનઃ
પ્રતિપાદિતં કૂટસ્થસ્ય નિત્યસ્ય ચિદ્રૂપસ્ય તદેવોપપન્નમ્ ।
એતેન સ્વપ્રકાશસ્યાત્મનો વિષયસંવિત્તિદ્વારેણ ગ્રાહકત્વમભિવ્યજ્યત
ઇતિ યે વદન્તિ તેઽપિ અનેનૈવ નિરાકૃતાઃ ।
કેચિદ્વિમર્શાત્મકત્વેનાત્મનશ્ચિન્મયત્વમિચ્છન્તિ । ત આહુઃ
— ન વિમર્શવ્યતિરેકેણ ચિદ્રૂપત્વમાત્મનો નિરૂપયિતું
શક્યમ્ । જડાદ્વૈલક્ષણ્યમેવ ચિદ્રૂપત્વમુચ્યતે । તચ્ચ
વિમર્શવ્યતિરેકેણ નિરૂપ્યમાણં નાન્યથાઽવતિષ્ઠતે । —
તદનુપપન્નમ્ । ઇદમિત્થમેવ રૂપમિતિ યો વિચારઃ સઃ વિમર્શ

ઇત્યુચ્યતે । સ ચાસ્મિતાવ્યતિરેકેણ નોત્થાનમેવ લભતે । તથાહિ —
આત્મન્યુપજાયમાનો વિમર્શોઽહમેવમ્ભૂત ઇત્યનેનાઽઽકારેણ સંવેદ્યતે ।
તતશ્ચાહંશબ્દસમ્ભિન્નસ્યાત્મલક્ષણસ્યાર્થસ્ય તત્ર સ્ફુરણાન્ન
તત્ર વિકલ્પસ્વરૂપતાઽતિક્રમઃ । વિકલ્પશ્ચાધ્યવસાયાત્મા
બુદ્ધિધર્મો ન ચિદ્ધર્મઃ । કૂટસ્થનિત્યત્વેન ચિતેઃ
સદૈકરૂપત્વાન્નિત્યત્વાન્નાહઙ્કારાનુપ્રવેશઃ । તદનેન
સવિમર્શત્વમાત્મનઃ પ્રતિપાદયતા બુદ્ધિરેવાત્મત્વેન ભ્રાન્ત્યા
પ્રતિપાદિતા ન પ્રકાશાત્મનઃ પરસ્ય પુરુષસ્ય સ્વરૂપમવગતમિતિ ।
ઇત્થં સર્વેષ્વેવ દર્શનેષ્વધિષ્ઠાતૃત્વં વિહાય નાન્યદાત્મનો
રૂપમુપપદ્યતે । અધિષ્ઠાતૃત્વં ચ ચિદ્રૂપત્વમ્ । તચ્ચ
જડાદ્વૈલક્ષણ્યમેવ । ચિદ્રૂપતયા યદધિતિષ્ઠતિ તદેવ ભોગ્યતાં
નયતિ । યચ્ચ ચેતનાધિષ્ઠિતં તદેવ સકલવ્યાપારયોગ્યં ભવતિ ।
એવં ચ સતિ નિત્યત્વાત્ પ્રધાનસ્ય વ્યાપારનિવૃત્તૌ યદાત્મનઃ
કૈવલ્યમસ્માભિરુક્તં તદ્વિહાય દર્શનાન્તરાણાં નાન્યા ગતિઃ ।
તસ્માદિદમેવ યુક્તમુક્તં વૃત્તિસારૂપ્યપરિહારેણ સ્વરૂપે પ્રતિષ્ઠા
ચિતિશક્તેઃ કૈવલ્યમ્ । ]

સર્વે યસ્ય વશાઃ પ્રતાપવસતેઃ પાદાન્તસેવાનતિપ્રભ્રશ્યન્મુકુટેષુ
મૂર્ધસુ દધત્યાજ્ઞાં ધરિત્રીભૃતઃ ।
યદ્વક્ત્રામ્બુજમાપ્ય ગર્વમસમં વાગ્દેવતા સંશ્રિતા સ શ્રીભોજપતિઃ
ફણાધિપતિકૃત્સૂત્રેષુ વૃત્તિં વ્યધાત્ ॥

ઇતિ શ્રીધારેશ્વરભોજદેવવિરચિતાયાં રાજમાર્તણ્ડાભિધાયાં
પાતઞ્જલવૃત્તૌ કૈવલ્યપાદશ્ચતુર્થઃ ।

સમાપ્તશ્ચાયં ગ્રન્થઃ ।
॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

અથ પાતઞ્જલયોગસૂત્રાણિ ।

અથ સમાધિપાદઃ ॥ ૧॥

અથ યોગાનુશાસનમ્ ॥ સમાધિ ૧॥

યોગશ્ચિત્તવૃત્તિનિરોધઃ ॥ સમાધિ ૨॥

તદા દ્રષ્ટુઃ સ્વરૂપેઽવસ્થાનમ્ ॥ સમાધિ ૩॥

વૃત્તિસારૂપ્યમિતરત્ર ॥ સમાધિ ૪ ॥

વૃત્તયઃ પઞ્ચતય્યઃ ક્લિષ્ટાક્લિષ્ટાઃ ॥ સમાધિ ૫ ॥

પ્રમાણવિપર્યયવિકલ્પનિદ્રાસ્મૃતયઃ ॥ સમાધિ ૬ ॥

પ્રત્યક્ષાનુમાનાગમાઃ પ્રમાણાનિ ॥ સમાધિ ૭ ॥

વિપર્યયો મિથ્યાજ્ઞાનમતદ્રૂપપ્રતિષ્ઠમ્ ॥ સમાધિ ૮ ॥

શબ્દજ્ઞાનાનુપાતી વસ્તુશૂન્યો વિકલ્પઃ ॥ સમાધિ ૯ ॥

અભાવપ્રત્યયાલમ્બના વૃત્તિર્નિદ્રા ॥ સમાધિ ૧૦ ॥

અનુભૂતવિષયાસમ્પ્રમોષઃ સ્મૃતિઃ ॥ સમાધિ ૧૧ ॥

અભ્યાસવૈરાગ્યાભ્યાં તન્નિરોધઃ ॥ સમાધિ ૧૨ ॥

તત્ર સ્થિતૌ યત્નોઽભ્યાસઃ ॥ સમાધિ ૧૩ ॥

સ તુ દીર્ઘકાલાદરનૈરન્તર્યસત્કારાસેવિતો દૃઢભૂમિઃ ॥ સમાધિ ૧૪ ॥

દૃષ્ટાનુશ્રવિકવિષયવિતૃષ્ણસ્ય વશીકારસંજ્ઞા વૈરાગ્યમ્ ॥ સમાધિ ૧૫ ॥

તત્પરં પુરુષખ્યાતેર્ગુણવૈતૃષ્ણ્યમ્ ॥ સમાધિ ૧૬ ॥

વિતર્કવિચારાનન્દાસ્મિતારૂપાનુગમાત્સમ્પ્રજ્ઞાતઃ ॥ સમાધિ ૧૭ ॥

વિરામપ્રત્યયાભ્યાસપૂર્વઃ સંસ્કારશેષોઽન્યઃ ॥ સમાધિ ૧૮ ॥

ભવપ્રત્યયો વિદેહપ્રકૃતિલયાનામ્ ॥ સમાધિ ૧૯ ॥

શ્રદ્ધાવીર્યસ્મૃતિસમાધિપ્રજ્ઞાપૂર્વક ઇતરેષામ્ ॥ સમાધિ ૨૦ ॥

તીવ્રસંવેગાનામાસન્નઃ ॥ સમાધિ ૨૧ ॥

મૃદુમધ્યાધિમાત્રત્વાત્તતોઽપિ વિશેષઃ ॥ સમાધિ ૨૨ ॥

ઈશ્વરપ્રણિધાનાદ્વા ॥ સમાધિ ૨૩ ॥

ક્લેશકર્મવિપાકાશયૈરપરામૃષ્ટઃ પુરુષવિશેષ ઈશ્વરઃ ॥ સમાધિ ૨૪ ॥

તત્ર નિરતિશયં સાર્વજ્ઞ્યબીજમ્ ॥ સમાધિ ૨૫ ॥

સ પૂર્વેષામપિ ગુરુઃ કાલેનાનવચ્છેદાત્ ॥ સમાધિ ૨૬ ॥

તસ્ય વાચકઃ પ્રણવઃ ॥ સમાધિ ૨૭ ॥

તજ્જપસ્તદર્થભાવનમ્ ॥ સમાધિ ૨૮ ॥

તતઃ પ્રત્યક્ચેતનાઽધિગમોઽપ્યન્તરાયાભાવશ્ચ ॥ સમાધિ ૨૯ ॥

વ્યાધિસ્ત્યાનસંશયપ્રમાદાલસ્યાવિરતિભ્રાન્તિદર્શનાલબ્ધભૂમિકત્વાનવસ્થિતત્વાનિ
ચિત્તવિક્ષેપાસ્તેઽન્તરાયાઃ ॥ સમાધિ ૩૦ ॥

દુઃખદૌર્મનસ્યાઙ્ગમેજયત્વશ્વાસપ્રશ્વાસા વિક્ષેપસહભુવઃ ॥ સમાધિ ૩૧ ॥

તત્પ્રતિષેધાર્થમેકતત્ત્વાભ્યાસઃ ॥ સમાધિ ૩૨ ॥

મૈત્રીકરુણામુદિતોપેક્ષાણાં સુખદુઃખપુણ્યાપુણ્યવિષયાનાં
ભાવનાતશ્ચિત્તપ્રસાદનમ્
॥ સમાધિ ૩૩ ॥

પ્રચ્છર્દનવિધારણાભ્યાં વા પ્રાણસ્ય ॥ સમાધિ ૩૪ ॥

વિષયવતી વા પ્રવૃતિરુત્પન્ના સ્થિતિનિબન્ધિની ॥ સમાધિ ૩૫ ॥

વિશોકા વા જ્યોતિષ્મતી ॥ સમાધિ ૩૬ ॥

વીતરાગવિષયં વા ચિત્તમ્ ॥ સમાધિ ૩૭ ॥

સ્વપ્નનિદ્રાજ્ઞાનાલમ્બનં વા ॥ સમાધિ ૩૮ ॥

યથાભિમતધ્યાનાદ્વા ॥ સમાધિ ૩૯ ॥

પરમાણુપરમમહત્ત્વાન્તોઽસ્ય વશીકારઃ ॥ સમાધિ ૪૦ ॥

ક્ષીણવૃત્તેરભિજાતસ્યેવ મણેર્ગ્રહીતૃગ્રહણગ્રાહ્યેષુ
તત્સ્થતદઞ્જનતા સમાપત્તિઃ ॥ સમાધિ ૪૧ ॥

શબ્દાર્થજ્ઞાનવિકલ્પૈઃ સઙ્કીર્ણા સવિતર્કા સમાપત્તિઃ ॥ સમાધિ ૪૨ ॥

સ્મૃતિપરિશુદ્ધૌ સ્વરૂપશૂન્યેવાઽર્થમાત્રનિર્ભાસા નિર્વિતર્કા ॥ સમાધિ ૪૩ ॥

એતયૈવ સવિચારા નિર્વિચારા ચ સૂક્ષ્મવિષયા વ્યાખ્યાતા ॥ સમધિ ૪૪ ॥

સૂક્ષ્મવિષયત્વં ચાલિઙ્ગપર્યવસાનમ્ ॥ સમાધિ ૪૫ ॥

તા એવ સબીજઃ સમાધિઃ ॥ સમાધિ ૪૬ ॥

નિર્વિચારવૈશારદ્યેઽધ્યાત્મપ્રસાદઃ ॥ સમાધિ ૪૭ ॥

ઋતમ્ભરા તત્ર પ્રજ્ઞા ॥ સમધિ ૪૮ ॥

શ્રુતાનુમાનપ્રજ્ઞાભ્યામન્યવિષયા વિશેષાર્થત્વાત્ ॥ સમાધિ ૪૯ ॥

[ પ્રજ્ઞાભ્યાં સામાન્યવિષયા ઇતિ પાઠોઽપિ દૃશ્યતે । ]
તજ્જઃ સંસ્કારોઽન્યસંસ્કારપ્રતિબન્ધી ॥ સમાધિ ૫૦ ॥

તસ્યાપિ નિરોધે સર્વનિરોધાન્નિર્બીજઃ સમાધિઃ ॥ સમાધિ ૫૧ ॥

ઇતિ સમાધિપાદઃ ॥ ૧ ॥

અથ સાધનપાદઃ ॥ ૨ ॥

તપઃ સ્વાધ્યાયેશ્વરપ્રણિધાનાનિ ક્રિયાયોગઃ ॥ સાધન ૧ ॥

સમાધિભાવનાર્થઃ ક્લેશતનૂકરણાર્થશ્ચ ॥ સાધન ૨ ॥

અવિદ્યાઽસ્મિતારાગદ્વેષાભિનિવેશાઃ ક્લેશાઃ ॥ સાધન ૩ ॥

અવિદ્યા ક્ષેત્રમુત્તરેષાં પ્રસુપ્તતનુવિચ્છિન્નોદારાણામ્ ॥ સાધન ૪ ॥

અનિત્યાશુચિદુઃખાનાત્મસુ નિત્યશુચિસુખાત્મખ્યાતિરવિદ્યા ॥ સાધન ૫ ॥

દૃગ્દર્શનશક્ત્યોરેકાત્મતેવાસ્મિતા ॥ સાધન ૬ ॥

સુખાનુશયી રાગઃ ॥ સાધન ૭ ॥

દુઃખાનુશયી દ્વેષઃ ॥ સાધન ૮ ॥

સ્વરસવાહી વિદુષોઽપિ તથારૂઢોઽભિનિવેશઃ ॥ સાધન ૯ ॥

તે પ્રતિપ્રસવહેયાઃ સૂક્ષ્માઃ ॥ સાધન ૧૦ ॥

ધ્યાનહેયાસ્તદ્વૃત્તયઃ ॥ સાધન ૧૧ ॥

ક્લેશમૂલઃ કર્માશયો દૃષ્ટાદૃષ્ટજન્મવેદનીયઃ ॥ સાધન ૧૨ ॥

સતિ મૂલે તદ્વિપાકો જાત્યાયુર્ભોગાઃ ॥ સાધન ૧૩ ॥

તે હ્લાદપરિતાપફલાઃ પુણ્યાપુણ્યહેતુત્વાત્ ॥ સાધન ૧૪ ॥

પરિણામતાપસંસ્કારદુઃખૈર્ગુણવૃત્તિવિરોધાચ્ચ દુઃખમેવ સર્વં
વિવેકિનઃ ॥ સાધન ૧૫ ॥

હેયં દુઃખમનાગતમ્ ॥ સાધન ૧૬ ॥

દ્રષ્ટૃદૃશ્યયોઃ સંયોગો હેયહેતુઃ ॥ સાધન ૧૭ ॥

પ્રકાશક્રિયાસ્થિતિશીલં ભૂતેન્દ્રિયાત્મકં ભોગાપવર્ગાર્થં દૃશ્યમ્ ॥ સાધન ૧૮ ॥

વિશેષાવિશેષલિઙ્ગમાત્રાલિઙ્ગાનિ ગુણપર્વાણિ ॥ સાધન ૧૯॥

દ્રષ્ટા દૃશિમાત્રઃ શુદ્ધોઽપિ પ્રત્યયાનુપશ્યઃ ॥ સાધન ૨૦॥

તદર્થ એવ દૃશ્યસ્યાત્મા ॥ સાધન ૨૧॥ [તદર્થઃ એવ ]
કૃતાર્થં પ્રતિ નષ્ટમપ્યનષ્ટં તદન્યસાધારણત્વાત્ ॥ સાધન ૨૨॥

સ્વસ્વામિશક્ત્યોઃ સ્વરૂપોપલબ્ધિહેતુઃ સંયોગઃ ॥ સાધન ૨૩॥

તસ્ય હેતુરવિદ્યા ॥ સાધન ૨૪॥

તદભાવે સંયોગાભાવો હાનં તદ્દૃશેઃ કૈવલ્યમ્ ॥ સાધન ૨૫॥

વિવેકખ્યાતિરવિપ્લવા હાનોપાયઃ ॥ સાધન ૨૬॥

તસ્ય સપ્તધા પ્રાન્તભૂમૌ પ્રજ્ઞા ॥ સાધન ૨૭॥

[ તસ્ય સપ્તધા પ્રાન્તભૂમિઃ પ્રજ્ઞા ઇતિ વા બહુસમ્મતઃ સૂત્રપાઠઃ
]
યોગાઙ્ગાનુષ્ઠાનાદશુદ્ધિક્ષયે જ્ઞાનદીપ્તિરાવિવેકખ્યાતેઃ ॥ સાધન
૨૮॥

યમનિયમાસનપ્રાણાયામપ્રત્યાહારધારણાધ્યાનસમાધયોઽષ્ટાવઙ્ગાનિ ॥ સાધન ૨૯॥

અહિંસાસત્યાસ્તેયબ્રહ્મચર્યાપરિગ્રહા યમાઃ ॥ સાધન ૩૦॥

જાતિદેશકાલસમયાનવચ્છિન્નાઃ સાર્વભૌમા મહાવ્રતમ્ ॥ સાધન ૩૧॥

શૌચસન્તોષતપઃસ્વાધ્યાયેશ્વરપ્રણિધાનાનિ નિયમાઃ ॥ સાધન ૩૨॥

વિતર્કબાધને પ્રતિપક્ષભાવનમ્ ॥ સાધન ૩૩॥

વિતર્કા હિંસાદયઃ કૃતકારિતાનુમોદિતા લોભક્રોધમોહપૂર્વકા
મૃદુમધ્યાધિમાત્રા દુઃખાજ્ઞાનાનન્તફલા ઇતિ પ્રતિપક્ષભાવનમ્ ॥ સાધન ૩૪॥

અહિંસાપ્રતિષ્ઠાયાં તત્સન્નિધૌ વૈરત્યાગઃ ॥ સાધન ૩૫॥

સત્યપ્રતિષ્ઠાયાં ક્રિયાફલાશ્રયત્વમ્ ॥ સાધન ૩૬॥

અસ્તેયપ્રતિષ્ઠાયાં સર્વરત્નોપસ્થાનમ્ ॥ સાધન ૩૭॥

બ્રહ્મચર્યપ્રતિષ્ઠાયાં વીર્યલાભઃ ॥ સાધન ૩૮॥

અપરિગ્રહસ્થૈર્યે જન્મકથન્તાસમ્બોધઃ ॥ સાધન ૩૯॥

શૌચાત્સ્વાઙ્ગજુગુપ્સા પરૈરસંસર્ગઃ ॥ સાધન ૪૦ ॥

સત્ત્વશુદ્ધિસૌમનસ્યૈકાગ્ર્યેન્દ્રિયજયાત્મદર્શનયોગ્યત્વાનિ ચ ॥ સાધન ૪૧ ॥

સન્તોષાદનુત્તમઃ સુખલાભઃ ॥ સાધન ૪૨ ॥

કાયેન્દ્રિયસિદ્ધિરશુદ્ધિક્ષયાત્તપસઃ ॥ સાધન ૪૩ ॥

સ્વાધ્યાયાદિષ્ટદેવતાસમ્પ્રયોગઃ ॥ સાધન ૪૪ ॥

સમાધિસિદ્ધિરીશ્વરપ્રણિધાનાત્ ॥ સાધન ૪૫ ॥

સ્થિરસુખમાસનમ્ ॥ સાધન ૪૬ ॥

પ્રયત્નશૈથિલ્યાનન્ત્યસમાપત્તિભ્યામ્ ॥ સાધન ૪૭ ॥

તતો દ્વન્દ્વાનભિઘાતઃ ॥ સાધન ૪૮ ॥

તસ્મિન્સતિ શ્વાસપ્રશ્વાસયોર્ગતિવિચ્છેદઃ પ્રાણાયામઃ ॥ સાધન ૪૯ ॥

સ તુ બાહ્યાભ્યન્તરસ્તમ્ભવૃત્તિર્દેશકાલસઙ્ખ્યાભિઃ પરિદૃષ્ટો
દીર્ઘસૂક્ષ્મઃ
॥ સાધન ૫૦ ॥

બાહ્યાભ્યન્તરવિષયાક્ષેપી ચતુર્થઃ ॥ સાધન ૫૧ ॥

તતઃ ક્ષીયતે પ્રકાશાવરણમ્ ॥ સાધન ૫૨ ॥

ધારણાસુ ચ યોગ્યતા મનસઃ ॥ સાધન ૫૩ ॥

સ્વવિષયાસમ્પ્રયોગે ચિત્તસ્વરૂપાનુકાર ઇવેન્દ્રિયાણાં પ્રત્યાહારઃ ॥ સાધન ૫૪ ॥

તતઃ પરમા વશ્યતેન્દ્રિયાણામ્ ॥ સાધન ૫૫ ॥

ઇતિ સાધનપાદઃ ॥ ૨ ॥

અથ વિભૂતિપાદઃ ॥ ૩ ॥

દેશબન્ધશ્ચિત્તસ્ય ધારણા ॥ વિભૂતિ ૧ ॥

તત્ર પ્રત્યયૈકતાનતા ધ્યાનમ્ ॥ વિભૂતિ ૨ ॥

તદેવાર્થમાત્રનિર્ભાસં સ્વરૂપશૂન્યમિવ સમાધિઃ ॥ વિભૂતિ ૩ ॥

ત્રયમેકત્ર સંયમઃ ॥ વિભૂતિ ૪ ॥

તજ્જયાત્પ્રજ્ઞાલોકઃ ॥ વિભૂતિ ૫ ॥

તસ્ય ભૂમિષુ વિનિયોગઃ ॥ વિભૂતિ ૬॥

ત્રયમન્તરઙ્ગં પૂર્વેભ્યઃ ॥ વિભૂતિ ૭॥

તદપિ બહિરઙ્ગં નિર્બીજસ્ય ॥ વિભૂતિ ૮॥

વ્યુત્થાનનિરોધસંસ્કારયોરભિભવપ્રાદુર્ભાવૌ નિરોધક્ષણચિત્તાન્વયો
નિરોધપરિણામઃ ॥ વિભૂતિ ૯॥

તસ્ય પ્રશાન્તવાહિતા સંસ્કારાત્ ॥ વિભૂતિ ૧૦॥

સર્વાર્થતૈકાગ્રતયોઃ ક્ષયોદયૌ ચિત્તસ્ય સમાધિપરિણામઃ ॥ વિભૂતિ
૧૧॥

શાન્તોદિતૌ તુલ્યપ્રત્યયૌ ચિત્તસ્યૈકાગ્રતાપરિણામઃ ॥ વિભૂતિ ૧૨॥

એતેન ભૂતેન્દ્રિયેષુ ધર્મલક્ષણાવસ્થાપરિણામા વ્યાખ્યાતાઃ ॥ વિભૂતિ
૧૩॥

શાન્તોદિતાવ્યપદેશ્યધર્માનુપાતી ધર્મી ॥ વિભૂતિ ૧૪॥

ક્રમાન્યત્વં પરિણામાન્યત્વે હેતુઃ ॥ વિભૂતિ ૧૫॥

પરિણામત્રયસંયમાદતીતાનાગતજ્ઞાનમ્ ॥ વિભૂતિ ૧૬॥

શબ્દાર્થપ્રત્યયાનામિતરેતરાધ્યાસાત્સઙ્કરસ્તત્પ્રવિભાગસંયમાત્સર્વભૂતરુતજ્ઞાનમ્ ॥ વિભૂતિ ૧૭॥

સંસ્કારસાક્ષાત્કરણાત્પૂર્વજાતિજ્ઞાનમ્ ॥ વિભૂતિ ૧૮॥

પ્રત્યયસ્ય પરચિત્તજ્ઞાનમ્ ॥ વિભૂતિ ૧૯॥

ન ચ તત્સાલમ્બનં તસ્યાવિષયીભૂતત્વાત્ ॥ વિભૂતિ ૨૦॥

કાયરૂપસંયમાત્તદ્ગ્રાહ્યશક્તિસ્તમ્ભે
ચક્ષુષ્પ્રકાશાસંયોગેઽન્તર્ધાનમ્ ॥ વિભૂતિ ૨૧॥

સોપક્રમં નિરુપક્રમં ચ કર્મ તત્સંયમાદપરાન્તજ્ઞાનમરિષ્ટેભ્યો
વા ॥ વિભૂતિ ૨૨॥

મૈત્ર્યાદિષુ બલાનિ ॥ વિભૂતિ ૨૩॥

બલેષુ હસ્તિબલાદીનિ ॥ વિભૂતિ ૨૪॥

પ્રવૃત્ત્યાલોકન્યાસાત્સૂક્ષ્મવ્યવહિતવિપ્રકૃષ્ટજ્ઞાનમ્ ॥ વિભૂતિ ૨૫॥

ભુવનજ્ઞાનં સૂર્યે સંયમાત્ ॥ વિભૂતિ ૨૬॥

ચન્દ્રે તારાવ્યૂહજ્ઞાનમ્ ॥ વિભૂતિ ૨૭॥

ધ્રુવે તદ્ગતિજ્ઞાનમ્ ॥ વિભૂતિ ૨૮॥

નાભિચક્રે કાયવ્યૂહજ્ઞાનમ્ ॥ વિભૂતિ ૨૯॥

કણ્ઠકૂપે ક્ષુત્પિપાસાનિવૃત્તિઃ ॥ વિભૂતિ ૩૦॥

કૂર્મનાડ્યાં સ્થૈર્યમ્ ॥ વિભૂતિ ૩૧॥

મૂર્ધજ્યોતિષિ સિદ્ધદર્શનમ્ ॥ વિભૂતિ ૩૨॥

પ્રાતિભાદ્વા સર્વમ્ ॥ વિભૂતિ ૩૩॥

હૃદયે ચિત્તસંવિત્ ॥ વિભૂતિ ૩૪॥

સત્ત્વપુરુષયોરત્યન્તાસઙ્કીર્ણયોઃ પ્રત્યયાવિશેષો ભોગઃ
પરાર્થાન્યસ્વાર્થસંયમાત્પુરુષજ્ઞાનમ્ ॥ વિભૂતિ ૩૫॥

[ પરાર્થત્વાત્ સ્વાર્થસંયમાત્ ઇત્યેવ બહુસમ્મતઃ સૂત્રપાઠઃ । ]
તતઃ પ્રાતિભશ્રાવણવેદનાદર્શાસ્વાદવાર્તા જાયન્તે ॥ વિભૂતિ ૩૬॥

તે સમાધાવુપસર્ગા વ્યુત્થાને સિદ્ધયઃ ॥ વિભૂતિ ૩૭॥

બન્ધકારણશૈથિલ્યાત્પ્રચારસંવેદનાચ્ચ ચિત્તસ્ય પરશરીરાવેશઃ ॥ વિભૂતિ ૩૮॥

ઉદાનજયાજ્જલપઙ્કકણ્ટકાદિષ્વસઙ્ગ ઉત્ક્રાન્તિશ્ચ ॥ વિભૂતિ ૩૯॥

સમાનજયાત્પ્રજ્વલનમ્ ॥ વિભૂતિ ૪૦॥

[ જ્વલનમ્ ઇત્યેવ્ બહુસમ્મતઃ સૂત્રપાઠઃ ]
શ્રોત્રાકાશયોઃ સમ્બન્ધસંયમાદ્દિવ્યં શ્રોત્રમ્ ॥ વિભૂતિ ૪૧॥

કાયાકાશયોઃ સમ્બન્ધસંયમાલ્લઘુતૂલસમાપત્તેશ્ચાકાશગમનમ્ ॥ વિભૂતિ ૪૨॥

બહિરકલ્પિતા વૃત્તિર્મહાવિદેહા તતઃ પ્રકાશાવરણક્ષયઃ ॥ વિભૂતિ
૪૩॥

સ્થૂલસ્વરૂપસૂક્ષ્માન્વયાર્થવત્ત્વસંયમાદ્ભૂતજયઃ ॥ વિભૂતિ ૪૪॥

તતોઽણિમાદિપ્રાદુર્ભાવઃ કાયસમ્પત્તદ્ધર્માનભિઘાતશ્ચ ॥ વિભૂતિ
૪૫॥

રૂપલાવણ્યબલવજ્રસંહનનત્વાનિ કાયસમ્પત્ ॥ વિભૂતિ ૪૬ ॥

ગ્રહણસ્વરૂપાસ્મિતાન્વયાર્થવત્ત્વસંયમાદિન્દ્રિયજયઃ ॥ વિભૂતિ ૪૭ ॥

તતો મનોજવિત્વં વિકરણભાવઃ પ્રધાનજયશ્ચ ॥ વિભૂતિ ૪૮ ॥

સત્ત્વપુરુષાન્યતાખ્યાતિમાત્રસ્ય સર્વભાવાધિષ્ઠાતૃત્વં
સર્વજ્ઞાતૃત્વં ચ ॥ વિભૂતિ ૪૯ ॥

તદ્વૈરાગ્યાદપિ દોષબીજક્ષયે કૈવલ્યમ્ ॥ વિભૂતિ ૫૦ ॥

સ્વામ્યુપનિમન્ત્રણે સઙ્ગસ્મયાઽકરણં પુનરનિષ્ટપ્રસઙ્ગાત્ ॥ વિભૂતિ
૫૧ ॥

ક્ષણતત્ક્રમયોઃ સંયમાદ્વિવેકજં જ્ઞાનમ્ ॥ વિભૂતિ ૫૨ ॥

જાતિલક્ષણદેશૈરન્યતાનવચ્છેદાત્તુલ્યયોસ્તતઃ પ્રતિપત્તિઃ ॥ વિભૂતિ
૫૩ ॥

તારકં સર્વવિષયં સર્વથાવિષયમક્રમં ચેતિ વિવેકજં જ્ઞાનમ્ ॥ વિભૂતિ ૫૪ ॥

સત્ત્વપુરુષયોઃ શુદ્ધિસામ્યે કૈવલ્યમ્ ॥ વિભૂતિ ૫૫ ॥

ઇતિ વિભૂતિપાદઃ ॥ ૩ ॥

અથ કૈવલ્યપાદઃ ॥ ૪ ॥

જન્મૌષધિમન્ત્રતપઃસમાધિજાઃ સિદ્ધયઃ ॥ કૈવલ્ય ૧ ॥

જાત્યન્તરપરિણામઃ પ્રકૃત્યાપૂરાત્ ॥ કૈવલ્ય ૨ ॥

નિમિત્તમપ્રયોજકં પ્રકૃતીનાં વરણભેદસ્તુ તતઃ ક્ષેત્રિકવત્ ॥ કૈવલ્ય ૩ ॥

નિર્માણચિત્તાન્યસ્મિતામાત્રાત્ ॥ કૈવલ્ય ૪ ॥

પ્રવૃત્તિભેદે પ્રયોજકં ચિત્તમેકમનેકેષામ્ ॥ કૈવલ્ય ૫ ॥

તત્ર ધ્યાનજમનાશયમ્ ॥ કૈવલ્ય ૬ ॥

કર્માશુક્લાકૃષ્ણં યોગિનસ્ત્રિવિધમિતરેષામ્ ॥ કૈવલ્ય ૭ ॥

તતસ્તદ્વિપાકાનુગુણાનામેવાભિવ્યક્તિર્વાસનાનામ્ ॥ કૈવલ્ય ૮ ॥

જાતિદેશકાલવ્યવહિતાનામપ્યાનન્તર્યં સ્મૃતિસંસ્કારયોરેકરૂપત્વાત્ ॥ કૈવલ્ય ૯ ॥

તાસામનાદિત્વં ચાઽઽશિષો નિત્યત્વાત્ ॥ કૈવલ્ય ૧૦ ॥

હેતુફલાશ્રયાલમ્બનૈઃ સંગૃહીતત્વાદેષામભાવે તદભાવઃ ॥ કૈવલ્ય
૧૧ ॥

અતીતાનાગતં સ્વરૂપતોઽસ્ત્યધ્વભેદાદ્ધર્માણામ્ ॥ કૈવલ્ય ૧૨ ॥

તે વ્યક્તસૂક્ષ્મા ગુણાત્માનઃ ॥ કૈવલ્ય ૧૩ ॥

પરિણામૈકત્વાદ્વસ્તુતત્ત્વમ્ ॥ કૈવલ્ય ૧૪ ॥

વસ્તુસામ્યે ચિત્તભેદાત્તયોર્વિવિક્તઃ પન્થાઃ ॥ કૈવલ્ય ૧૫ ॥

તદુપરાગાપેક્ષિત્વાચ્ચિત્તસ્ય વસ્તુ જ્ઞાતાજ્ઞાતમ્ ॥ કૈવલ્ય ૧૬ ॥

સદા જ્ઞાતાશ્ચિત્તવૃત્તયઃ તત્પ્રભોઃ પુરુષસ્યાપરિણામિત્વાત્ ॥ કૈવલ્ય ૧૭ ॥

ન તત્સ્વાભાસં દૃશ્યત્વાત્ ॥ કૈવલ્ય ૧૮ ॥

એકસમયે ચોભયાનવધારણમ્ ॥ કૈવલ્ય ૧૯ ॥

ચિત્તાન્તરદૃશ્યે બુદ્ધિબુદ્ધેરતિપ્રસઙ્ગઃ સ્મૃતિસઙ્કરશ્ચ ॥ કૈવલ્ય ૨૦ ॥

ચિત્તેરપ્રતિસઙ્ક્રમાયાસ્તદાકારાપત્તૌ સ્વબુદ્ધિસંવેદનમ્ ॥ કૈવલ્ય
૨૧ ॥

દ્રષ્ટૃદૃશ્યોપરક્તં ચિત્તં સર્વાર્થમ્ ॥ કૈવલ્ય ૨૨ ॥

તદસઙ્ખ્યેયવાસનાભિશ્ચિત્રમપિ પરાર્થં સંહત્યકારિત્વાત્ ॥ કૈવલ્ય
૨૩ ॥

વિશેષદર્શિન આત્મભાવભાવનાનિવૃત્તિઃ ॥ કૈવલ્ય ૨૪ ॥

તદા વિવેકનિમ્નં કૈવલ્યપ્રાગ્ભારં ચિત્તમ્ ॥ કૈવલ્ય ૨૫ ॥

તચ્છિદ્રેષુ પ્રત્યયાન્તરાણિ સંસ્કારેભ્યઃ ॥ કૈવલ્ય ૨૬ ॥

હાનમેષાં ક્લેશવદુક્તમ્ ॥ કૈવલ્ય ૨૭ ॥

પ્રસઙ્ખ્યાનેઽપ્યકુસીદસ્ય સર્વથા વિવેકખ્યાતેર્ધર્મમેઘઃ સમાધિઃ ॥ કૈવલ્ય ૨૮ ॥

તતઃ ક્લેશકર્મનિવૃત્તિઃ ॥ કૈવલ્ય ૨૯ ॥

તદા સર્વાવરણમલાપેતસ્ય જ્ઞાનસ્યાનન્ત્યાજ્જ્ઞેયમલ્પમ્ ॥ કૈવલ્ય ૩૦ ॥

તતઃ કૃતાર્થાનાં પરિણામક્રમસમાપ્તિર્ગુણાનામ્ ॥ કૈવલ્ય ૩૧ ॥

ક્ષણપ્રતિયોગી પરિણામાપરાન્તનિર્ગ્રાહ્યઃ ક્રમઃ ॥ કૈવલ્ય ૩૨ ॥

પુરુષાર્થશૂન્યાનાં ગુણાનાં પ્રતિપ્રસવઃ કૈવલ્યં સ્વરૂપપ્રતિષ્ઠા
વા ચિતિશક્તેરિતિ ॥ કૈવલ્ય ૩૩॥

ચિતિશક્તિઃ ઇતિ બહુસમ્મતઃ સૂત્રપાઠઃ ।

ઇતિ કૈવલ્ય પાદઃ ॥ ૪॥

ઇતિ પાતઞ્જલયોગસૂત્રાણિ ।

પ્રમાદાઃ સૂર્યાંશુ રાયાય પ્રેષિતવ્યાઃ ।

Encoded and proofread by Suryansu Ray suryansuray at yahoo.com

*BhojaVritti*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*